शास्त्रिस्तरीयः

**पाठ्यक्रमः**

# द्वितीयवर्षः

# २०७९

Bachelor Level

Curriculum

Second Year

2022

नेपाल–संस्कृतविश्वविद्यालयः

बेलझुण्डी, दाङ

## १.पाठ्यक्रमपरिचयः

नेपालसंस्कृतविश्वविद्यालयस्य २०७८ वैक्रमाब्दतः सञ्चाल्यमाने वर्षचतुष्टयात्मक( शास्त्रिस्तरीयशैक्षिककार्यक्रमे पठनाय पाठनाय च निर्धारितोऽयं पाठ्यक्रमः । विश्व-विद्यालयस्य आङ्गिकविद्यापीठेषु तत्सम्बनप्राप्तविद्यापीठेषु च पाठ्यक्रमोऽयमधीयते, अध्याप्यते च । उत्तीर्णपूर्वावश्यकपाठ्यांशसम्बद्ध-परीक्षाः स्वतन्त्रछात्रा अपि अमुं पाठ्यक्रममधीत्य अस्य कार्यक्रमस्य वार्षिकपरीक्षायां संलग्ना भवितुं शक्नुवन्ति ।

## २. स्तरगतं शिक्षणस्योद्देश्यानि

- सांस्कृतिकनैतिकसामाजिकक्षेत्रेषु कार्यकुशलाया उच्चस्तरीय-जनशक्तेरुत्पादनम् ।
- संस्कृतवाङ्मयपरिचयप्रदानसमर्थाया जनशक्तेरुत्पादनम् ।
- स्वाधीतविषयस्यान्तस्तलं प्रविश्य स्तरानुरूपाया विद्वत्तायाः प्रदर्शन-शक्तस्य जनशक्तेरुत्पादनम् ।
- राष्ट्रस्य विविधक्षेत्रेषु स्तरानुरूपेण प्रशासनिककार्यसम्पादनकुशलाया जनशक्ते-रुत्पादनम् ।
- माध्यमिकस्तरीयसम्बद्धविषयशिक्षणकार्ये निपुणाया जनशक्तेरुत्पादनम् ।

## ३. समयावधिः पूर्णाङ्काश्च

शास्त्रीकक्षा वर्षचतुष्टयात्मिका विद्यते । अस्मिन् पाठ्यक्रमे वार्षिकपरीक्षायाः कृते २१०० पूर्णाङ्का निर्धारिताः सन्ति । विषयक्षेत्रानुसारेण प्रतिवर्षं तेषां विभाजनम्-

### १. प्रथमवर्षे

| | |
|---|---|
| अनिवार्यक्षेत्रेषु | २०० |
| संस्कृतमूलविषयेषु | २०० |
| आधुनिकमूलविषयेषु | २०० |

### २. द्वितीयवर्षे

अनिवार्यक्षेत्रेषु २००

संस्कृतमूलविषयेषु २००

आधुनिकमूलविषयेषु २००

**३ तृतीयवर्षे**

अनिवार्यक्षेत्रेषु १००

संस्कृतमूलविषयेषु २००

आधुनिकमूलविषयेषु २००

**४. चतुर्थवर्षे**

संस्कृतमूलविषयेषु २००

आधुनिकमूलविषयेषु २००

तद्यथा तालिकायाम्–

**चतुर्वर्षात्मकशास्त्रिस्तरीयपाठ्यक्रमस्य प्रारुपम्– २०७७**

| स्तरः/ खण्डः/ वर्षः | पूर्णाङ्काः | अनिवार्यः | अनिवार्य | अनिवार्य | अनिवार्य | शास्त्रीय विषयाः | आधुनिक विषयाः |
|---|---|---|---|---|---|---|---|
| | | नेपाली | अंग्रेजी/ अवैसंर | संस्कृत | क) नेपाल अध्ययन – ५० ख)संस्कृत वाङ्म–याध्ययनम् –५० | | |
| प्रथमवर्षः | ६०० | १०० | १०० | | | २०० | २०० |
| द्वितीयवर्षः | ६०० | | १०० | १०० | | २०० | २०० |
| तृतीयवर्षः | ५०० | | | | १०० | २०० | २०० |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| चतुर्थवर्षः | ४०० | | | | | २०० | २०० |
| | २१०० | ५०० | | | | ८०० | ८०० |

अनिवार्यक्षेत्रे संस्कृतमूलक्षेत्रे आधुनिकमूलक्षेत्रे च निर्धारिता विषयाः–

१.अनिवार्यक्षेत्रे– संस्कृतरचना, नेपालीभाषा, आङ्लभाषा, अथवा वैकल्पिकसंस्कृतरचना।

२.संस्कृतमूलक्षेत्रे – ऋग्वेदः, शुक्लयजुर्वेदः, सामवेदः, अथर्ववेदः नव्यव्याकरणम्, सिद्धान्तज्योतिषम्, फलितज्योतिषम्, पूर्वमीमांसा, शाङ्करवेदान्तः, धर्मशास्त्रम्, प्राचीनन्यायः, नव्यन्यायः, साहित्यम्, इतिहासपुराणम्, सर्वदर्शनम्, बौद्धदर्शनम्, तन्त्रम्, प्राच्यनीतिशास्त्रञ्च ।

३. आधुनिकमूलक्षेत्रे – नेपाली भाषा र साहित्य, मैथिली भाषा र साहित्य, हिन्दी भाषा र साहित्य, अङ्ग्रेजी साहित्य , अर्थशास्त्र, राजनीतिशास्त्र, गणित।

## ४. विषयचयनविधिः

एषु अनिवार्यविषये निर्धारिता सर्व एव विषया पाठ्याः । संस्कृतमूलविषयेषु कमप्येकम्, आधुनिकमूलविषयेषु च कमप्येकं विषयमवलम्ब्य छात्राः पठितुं शक्नुवन्ति । अनिवार्यक्षेत्रे उत्तरमध्यमायाम्, द्वादशकक्षायाम् अन्यतत्समकक्षायां वा आङ्लभाषमवलम्ब्य समुत्तीर्णा छात्रा एव शास्त्रिस्तरे आङ्गलभाषामध्येतुमर्हन्ति । छात्राः शास्त्रिकक्षायाः प्रथमखण्डेऽधीतानेव विषयान् तस्याः कक्षाया द्वितीयवर्षे, तृतीयवर्षे, चतुर्थवर्षे चाध्येतुं शक्नुवन्ति।

## ५. प्रवेशयोग्यता

शास्त्रिस्तरे प्रवेशाय अधोलिखितपरीक्षायाम् उत्तीर्णाः छात्राः प्रवेशार्हा भवन्ति –

१.नेपालसंस्कृतविश्वविद्यालयतः,तन्मान्यताप्राप्तविश्वविद्यालयतश्च संस्कृतविषयं अवलम्ब्य उत्तरमध्यमपरीक्षायां समुत्तीर्णाः छात्राः।

२.संस्कृत वाङ्मयस्य कमपि विषयमबलम्ब्य प्राक्शास्त्रिपरीक्षायां समुत्तीर्णाः छात्राः।

३. संस्कृतविषयमवलम्ब्य उच्चमाध्यमिक –शिक्षा –परीक्षायां समुत्तीर्णाः छात्राः।

## ६.शैक्षिक कार्यक्रमः

१.अनेन पाठ्यक्रमानुसारेण शैक्षिककार्यक्रमसञ्चालनाय विश्वविद्यालयेन प्रतिवर्षं शैक्षिकतालिका प्रकाश्यते। तदनुसारेण पठनपाठनस्य व्यवस्था विधीयते। पाठ्यक्रमे निर्धारितानां प्रतिवर्षं प्रतिसत्रं च पाठसङ्ख्यानां आधारेण पठनपाठनादिकं सञ्चाल्यते।

## २. मूल्याङ्कनविधिः

मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते।

### (क) निर्माणात्मकमूल्याङ्कनम्

कक्षाकार्य–गृहकार्य–कक्षासहभागिता–प्रकरणपरीक्षा–पाक्षिकपरीक्षा–मासिकपरीक्षामाध्यमेन शिक्षार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलशिक्षार्थिनां स्तरोन्नतये शिक्षणकार्यस्य सहजीकरणाय चोपयुक्तवातावरणनिर्माणं क्रियते। तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिक–विमर्शन–मौखिकपरीक्षा– लिखितपरीक्षा – विशेषयोग्यता – प्रदर्शन–प्रश्नोत्तरण–कक्षाकार्यपरीक्षणप्रभृतिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन शिक्षार्थिनां योग्यतावृद्धिर्भवेत् । निर्माणात्मकमूल्याङ्कनमेवान्तरिकं मूल्याङ्कनम् । अस्य कृते प्रतिशतं पञ्चविंशत्यङ्का निर्धारिताः । आन्तरमूल्याङ्कनं विद्यापीठस्य विभागेन सम्बद्धशिक्षकस्य सम्मतौ विधेयम् । शिक्षणक्रम औपचारिकरूपेणानौपचारिकरूपेण च शिक्षणोपलब्धिः परिमापणीया । शिक्षणसहजीकरणस्य क्रमे शिक्षार्थिभिरधिगतानां प्रदर्शितानाञ्च यथायथज्ञानशिल्पप्रयोगदक्षतादीनामा–धारेणैवान्तरमूल्याङ्कनं कर्तव्यम् । सामान्यतया तस्य कृतेऽधोनिर्दिष्टतालिकानुसारेणाङ्क–संयोजनं कर्तुं शक्यते।

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | उपस्थितिः | ३ |
| २. | शिक्षणसहभागिता | ३ |
| ३. | कक्षाकार्यं परियोजनाकार्यं वा | ९ |
| ४. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| योगः | | २५ |

### (ख) निर्णयात्मकमूल्याङ्कनम्

पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं शिक्षार्थिभिः प्राप्तं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । कक्षोन्नतये शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । निर्णयात्मकमूल्याङ्कनमेव बाह्यमूल्याङ्कनम् । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिक-मूल्याङ्कनस्याङ्कानां ने.सं.वि. परीक्षानियन्त्रणकार्यालयेनानुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनायाङ्क-वितरणविधिः सम्बद्धविषयस्य पाठ्यक्रम एव उल्लिखितो विद्यते ।

### ७.उत्तीर्णतायै प्राप्तव्या अङ्काः श्रेणीनिर्धारणञ्च

| | |
|---|---|
| उत्तीर्णतायै प्राप्ताव्या अङ्काः- | ३५% |
| तृतीय श्रेणी - | ३५%–४४% |
| द्वितीयश्रेणी- | ४५%–५९% |
| प्रथमश्रेणी- | ६०%–७९% |
| विशिष्टश्रेणी- | ८०% अङ्कास्तदधिकाश्च |

### ८.माध्यमभाषाविषयको निर्देशः

शास्त्रिस्तरे पठनपाठनयोः परीक्षायाञ्च नेपाली-आङ्ग्लभाषा-हिन्दीमैथिली-प्रभृतिभाषासमूहान्तर्गत-विषयषु तत्तद्भाषाणां माध्यम-भाषारूपेण प्रयोगः कर्तव्यः । अर्थशास्त्र-राजनीतिशास्त्र-गणितादिषु खवर्गीयविषयेषु माध्यमभाषारूपेण नेपाली -आङ्ग्लभाषयोर्मध्ये एकतरस्याः प्रयोगो विधेयः । बौद्धदर्शनविषये माध्यमभाषारूपेण संस्कृत-नेपाल्याङ्ग्लभाषासु कस्या अप्येकस्या भाषायाः प्रयोगो भवितुमर्हः । विषयानेतान् विहायान्यविषयेषु माध्यमभाषारूपेण संस्कृत-भाषायाः प्रयोगो विधेय :।

### पाठ्यांशविवरणम्

#### द्वितीयवर्षे-

| विषयसङ्केताः | पाठ्यांशनामानि | पूर्णाङ्काः |
|---|---|---|
| अ.वै.सं.र. ४०२ | अनिवार्यवैकल्पिकसंस्कृतरचना | १०० |

| | | |
|---|---|---|
| Com.Eng 402 | Reading and Writing across the Curriculum | 100 |
| अ.सं.४०१ | संस्कृतवाङ्मयपचियः | १०० |
| ऋ.वे. ४०१ | श्रौतकल्पनिरूपणम् | १०० |
| ऋ.वे. ४०२ | स्वरवैदिकी प्रक्रिया, वैदिक शब्दकोषः शब्दनिर्वचनादिकञ्च | १०० |
| शु.वे. ४०१ | कल्पसूत्रम् | १०० |
| शु.वे. ४०२ | स्वरवैदिक प्रक्रिया, निरुक्तञ्च | १०० |
| सामवे. ४०१ | सामस्वरसज्ञापरिभाषाध्ययनम् | १०० |
| सामवे. ४०२ | स्वरवैदिकनिघण्टुनिरुक्ताध्ययनम् | १०० |
| अ.वे. ४०१ | **शिक्षा–मीमांसाशास्त्र** | १०० |
| अ.वे. ४०२ | निरुक्त व्याकरणशास्त्रे | १०० |
| न.व्या.४०१ | पतञ्जलसिद्धान्तः नैयायिकाभिमतप्रमाणानि च | १०० |
| न.व्या.४०२ | नागेशाभिमतवृ यर्थादिकम् | १०० |
| सि.ज्यो.४०१ | चापियत्रिकोणमितिसहितं सूर्यसिद्धान्त गणितम् | १०० |
| सि.ज्यो.४०२ | सचलनकलनं ग्रहस्पष्टीकरणम् | १०० |
| फ.ज्यो.४०१ | ससामुद्रिकं प्रश्नशास्त्रम् | १०० |
| फ.ज्यो.४०२ | व्यवहारोपयोगिमुहूर्तविषयकज्ञानं वास्तुशास्त्रस्याध्ययनञ्च | १०० |
| पू.मी.४०१ | मीमांसादर्शनसम्मतप्रमेयाणि | १०० |
| पू.मी.४०२ | मीमांसादर्शनसम्मतप्रमेयाणि | १०० |
| शा.वे.४०१ | गीतातत्त्वबोधः तत्त्वविवेकश्च | १०० |
| शा.वे.४०२ | परमपुरुषार्थसाधननिरूपणम् | १०० |

| | | |
|---|---|---|
| ध.शा. ४०१ | अग्निप्रणयनादिसहितसंस्कारादिज्ञानम् | १०० |
| ध.शा. ४०२ | संस्काराशौचयोर्धर्ममीमांसायाश्च स्वरूपम् | १०० |
| प्रा.न्या. ४०१ | वैशेषिकसम्मतपदार्थाः<br>पाश्चात्यदर्शनाभिमतपरमाणुवादश्च | १०० |
| प्रा.न्या. ४०२ | न्यायदर्शनाभिमतपदार्थाः पाश्चात्यतर्कशास्त्रञ्च | १०० |
| न.न्या. ४०१ | व्याप्तिसिद्धान्तलक्षण स्वरूपम् | १०० |
| न.न्या. ४०२ | अवच्छेदकत्वस्वरूपनिर्वचनम् | १०० |
| सा. ४०१ | साहित्यशास्त्रं काव्यञ्च | १०० |
| सा. ४०२ | महाकाव्ये, कथा च | १०० |
| इ.पु. ४०१ | विराट्स्वरूपसृष्ट्यवतारादिज्ञानम्, देवीचरितं<br>शृङ्ग्युपाख्यानञ्च | १०० |
| इ.पु. ४०२ | विदुरतीर्थयात्रादिवर्णनम्, शक्तितत्त्ववर्णनं<br>मन्वन्तरादिवर्णनं च | १०० |
| स.द. ४०१ | साङ्ख्ययोगदर्शनाध्ययनम् | १०० |
| स.द. ४०२ | चार्वाकजैनबौद्धदर्शनाध्ययनम् | १०० |
| बौ.द. ४०१ | माध्यमिकदर्शनाध्ययनम् | १०० |
| बौ.द. ४०२ | योगाचारदर्शनम् | १०० |
| तन्त्र. ४०१ | साङ्ख्यसिद्धान्त—पातञ्जलयोग—<br>कुण्डलिनीयोगविमर्शः | १०० |
| तन्त्र. ४०२ | शाक्ततान्त्रिकदर्शनसिद्धान्तविचारः | १०० |
| नेपा.४०१ | नेपाली कविता र काव्य | १०० |
| नेपा. ४०२ | आधुनिक नेपाली नाटक तथा निबन्ध | १०० |
| मैथिली ४०१ | मैथिली पद्य साहित्य | १०० |

| | | |
|---|---|---|
| मैथिली ४०२ | मैथिली नाट्य साहित्य | १०० |
| हिन्दी ४०१ | हिन्दी पद्य साहित्य | १०० |
| हिन्दी ४०२ | भाषा, भाषाविज्ञान तथा हिन्दी भाषा प्रयोग | १०० |
| Eng.401 | Literary Criticism | 100 |
| Eng.402 | Poetry: Medieval to the Present | 100 |
| Eco.401 | Microeconomics | 100 |
| Eco.402 | Public Financial System and International Trade | 100 |
| Pol.Sc.401 | Ancient Hindu Political Thought | 100 |
| Pol.Sc.402 | Government and Polities of Nepal | 100 |
| Math.401 | Linear Algebra | 100 |
| Math.402 | Real Analysis | 100 |

# संस्कृतरचना

**पाठ्यांशनाम** –अनिवार्यवैकल्पिकसंस्कृतरचना **पाठ्यांशसंकेतः** अ.वै.सं.र. ४०२

**स्तरः** - शास्त्री **पूर्णाङ्काः** १००

**वर्षः** –द्वितीयः **वार्षिकः पाठ्यभारः** १६० घण्टाः

**पत्रम्** - द्वितीयम् **साप्ताहिकः पाठ्यभारः** ६

## १.पाठ्यांशपरिचयः

अयं पाठ्यांशः पञ्चसु प्रकरणेषु विभक्तः । शास्त्रिस्तरस्य द्वितीयवर्षे आङ्लभाषाया वैकल्पिकविषयत्वेनासौ पाठ्यांशो निर्धारितो विद्यते। पत्रेऽस्मिन्–

**क**–प्रकरणे, संस्कृतभाषाया गद्यपद्यखण्डयोर्नेपालीभाषायाम्, नेपालीभाषा–रचितगद्यखण्डानां संस्कृतभाषायाञ्चानुवादविषयः शिक्ष्यते । एतदर्थं नेपालीभाषायामनुवादार्थँ सुभाषितरत्नभण्डागारादुद्धृतानि नीतिपद्यानि, हितोपदेशान्तर्गत **विग्रह**शीर्षकान्तर्गतो गद्यभागस्तथा च गोरखापत्रे **नयाँनेपालपृष्ठ**मध्ये प्रतिमासं वारद्वयं प्रकाश्यमानः संस्कृतगद्यपद्यभागश्च पाठ्यविषयतया सन्ति निर्धारितानि । निर्धारितविषयक्षेत्रस्य गद्यपद्यभागमादाय नेपालीभाषातः संस्कृते संस्कृतभाषायाश्च नेपालीभाषायामनुवादोऽत्र प्रकरणे भूयो भूयोऽभ्यस्यते।

**ख**–प्रकरणे, विशेषेण स्तरीयसंस्कृतभाषायाः प्रयोगनैपुण्याभिवृद्धये निर्धारितः पाठ्यांशोऽयं परमोपयोगी । संस्कृतभाषायां रचिता वाक्यरचनासम्बद्धा विषयाः पाठ्यविषयत्वेन निर्धारिताः सन्ति । संस्कृते, आत्मपरकवस्तुपरकादिविविधप्रकारचनाशिल्पप्रदर्शनायात्र तेषां प्रकाराणां पृथक् पृथक् स्वरूपमनुसृत्य तदनुसारिरचना शिक्ष्यते।

**ग**–प्रकरणे संस्कृतगद्यकाव्याध्ययनं विधीयते। अम्बिकादत्तप्रणीतस्य**शिवराजविजयस्य प्रथमविरामान्तर्गतचतुर्थनिःश्वासः** पाठ्यांशत्वेन निर्धारितः । प्रकरणारम्भे अम्बिकास्यावदानं तस्य प्रवृत्तिगतं वैशिष्ट्यञ्च शिक्ष्यते, तदनन्तरञ्च प्रसङ्गकोशविग्रहसमासालङ्कारिदिप्रकाशनपुरस्सरं निर्धारितगद्यभागो व्याख्यान–सरण्या अत्र पाठ्यते।

**घ**-प्रकरणे, महाकवेः, कालिदासस्य तदीयप्रवृत्तिगतवैशिष्ट्यस्य च परिचयमुपस्थाप्य तद्रचितमहाकाव्यस्याध्ययनं क्रियते । तदर्थं कालिदासविरचितस्य **रघुवंश**महाकाव्यस्य पञ्चमसर्गस्य त्रिंशत्पद्यानि पाठ्यांशरूपेण निर्धारितानि सन्ति । तत्र प्रसङ्गकोशविग्रहसमासालङ्कारादिप्रकाशनपुरः सरं निर्धारितपद्यानां व्याख्यानं विधीयते।

**ङ** -प्रकरणे सरलानि नीतिपद्यानि सुभाषितरत्नभाण्डागारे संगृहितानि कानिचित्पद्यानि निर्धारितानि सन्ति । तेषां पद्यानां व्याख्या,भावार्थप्रकाशनम्,संक्षिप्तोत्तराणि वा अपेक्ष्यन्ते।

## २. पाठ्यांशस्य सामान्योद्देश्यानि –

अस्य पाठ्यांशस्याध्ययनेन छात्रा अधोलिखितविषये प्रावीण्यमेष्यन्ति

- संस्कृतगद्यखण्डानां नेपालीभाषायामनुवादशिल्पप्रदर्शने,
- नेपालीगद्यखण्डस्य संस्कृतभाषायां छायानुवादभावानुवादशिल्पनिदर्शने,
- संस्कृतभाषायां गद्यपद्यरचनाप्रदर्शने,
- गद्यकाव्यपद्यकाव्यनीतिपद्यानां व्याख्यानविवेचनसामर्थ्यप्रदर्शने च।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | १.नेपालीगद्यभागस्यसंस्कृत-भाषायां संस्कृतगद्यखण्डस्य च नेपालीभाषायामनुवादशिल्पप्रदर्शनम्।<br>२.संस्कृतपद्यभागस्य नेपालीभाषायामनुवादनकलाप्रस्तवनम् | अनुवादरचना | १५ | २५ |
| ख | स्तरीयसंस्कृतरचनाशिल्पार्जनम् | संस्कृतवाक्यरचना | २५ | ४० |
| ग | निर्धारितगद्य-काव्यस्य कृतिगतवैशिष्ट्यप्रदर्शन- पुरःसरं प्रतिपदंसमासविग्रहपर्यायालङ्कारा-दिकं प्रदर्श्य व्याख्यानम्। | अम्बिकादत्तस्य परिचयः, तदीयमवदानं शिवराजविजयस्य वैशिष्ट्यं गद्यकाव्यस्यास्य प्रथमविरामान्तर्गत चतुर्थनिश्वासस्य | २० | ३० |

| | | | | |
|---|---|---|---|---|
| | | व्याख्यानञ्च । | | |
| घ | निर्धारितपद्य–काव्यस्य कृतिगतवैशिष्ट्यप्रदर्शन– पुरःसरं प्रतिपदंसमासविग्रहपर्यायालङ्कारा–दिकं प्रदर्श्य व्याख्यानम् । | कालिदासस्य परिचयः, तदीयमवदानम्, रघुवंशमहाकाव्यस्य वैशिष्ट्यम्, रघुवंशमहाकाव्यस्य पञ्चमसर्गस्य आदितः त्रिंशत्पद्यानां व्याख्यानञ्च | २० | ३० |
| ङ | सुललितानां मर्मस्पृशां नीतिपद्यानां व्याख्यानम्, भावार्थप्रकाशनम्, संक्षिप्तोत्तरदानञ्च । | निर्धारितानि नीतिपद्यानि, अन्तरालापाः, बहिरालापाः, कूटपद्यानि, प्रहेलिकाः,समस्यापूर्तिश्च | २० | ३५ |

**४. पाठ्यवस्तुविवरणम्**

**'क' प्रकरणे**

अनुवादशब्दस्यार्थः, अनुवादस्य प्रकाराः, संस्कृतगद्यभागस्य नेपाली भाषायां नेपालीगद्यखण्डस्य संस्कृतभाषायां चानुवादे समुपस्थिताः समस्याः, समाधानोपायाश्च, गोरखापत्रस्य शनिवासरीयविशेषाङ्केषु सम्बद्धशैक्षिकवर्षे नेपालीभाषायां प्रकाशितानां लेखानां गद्यांशमादाय संस्कृतभाषयामनुवादाभ्यासः, गोरखापत्रस्यैव नयाँनेपालपृष्ठमध्ये सम्बद्धशैक्षिकवर्षे प्रतिमासं वारद्वयं संस्कृतभाषायां प्रकाशितानां लेखरचनानाञ्च नेपालीभाषायामनुवादाभ्यासः, हितोपदेशस्य विग्रहे प्रयुक्तस्य संस्कृतगद्यभागस्य नेपालीभाषायामनुवादाभ्यासः, अदृष्टांशस्य ( शिक्षकेण/प्राश्निकेन स्वयं रचितस्य कुतश्चिदुद्धृतस्य वा गद्यखण्डस्य)अनुवादाभ्यासश्च ॥

**'ख' प्रकरणे**

कारकनियममनुसृत्य वाक्यरचनाभ्यासः । लिङ्गवचनपुरुषकालवाच्यार्थानुसारेण वाक्यानां परस्परं परिवर्तनेऽभ्यासः, सरलसंयुक्तमिश्रवाक्यानां रचने मिथः परिवर्तने चाभ्यासः। उपमानपदानि प्रयुज्य वाक्यरचनाभ्यासः(यथा– अयं नरः करी इव गच्छति । रासभ इव शब्दायते । वंशौ इव उन्नतौ पादौ स्तः। मेघ इव श्यामः अस्ति इत्यादि) उत्प्रेक्षाव्यञ्जकानि पदानि प्रयुज्य वाक्यरचनायामभ्यासः । (यथा मन्ये अयं पुरुषः वानरः अस्ति । नूनम् अस्य पादौ

वृक्षौ इव प्रतिभातः, अस्य रोमाणि मेघाच्छादितानीव दृश्यन्ते इत्यादि)

सन्देहप्रधानवाक्यरचनाभ्यासः (यथा गृहीतपुस्तकोऽयं गुरु : छात्रो वा नाहं जानामि इत्यादि) पूर्ववाक्यार्थस्य परवाक्यार्थेन समर्थने रचनाभ्यासः ( त्वदीयकथनम् अप्रियमपि सत्यमस्ति, हितं मनोहारि च दुर्लभं वचः इत्यादि ) अनयैव पद्धत्या वसन्तादीनां षड्तूनां वर्णनाभ्यासः । ततश्च अनुष्टुप्छन्दसि रचनाभ्यासः । प्रथमं निरर्थकपदैस्ततश्च

सार्थकपदैरभ्यासः ।कदाचित् स्वकीयाभिः पदावलिभिः कदाचिच्च परकृतपद्यस्य पदावलीनां परिवर्तनेन कृते**ऽभ्यासेऽनायासेनैव** छन्दसिद्धिर्जायते। सिद्धे चास्मिन् छन्दसि उपजातौ, मालिन्यां, वसन्ततिलके, पञ्चचामरे शिखरिण्यां शार्दूविक्रीडिते च प्रयत्नो विधेयः ।

## 'ग' प्रकरणे

अम्बिकादत्तस्यपरिचयः, तस्यावदानम्, तत्कृतिगतवैशिष्ट्यञ्च । शिवराजविजयस्य प्रथमविरामान्तर्गतचतुर्थनिःश्वासस्थ– गद्यभागस्य प्रतिपदं पर्यायविग्रहसमासतात्पर्यालङ्कारादिप्रदर्शनपुरःसरं व्याख्यानम् ।

## 'घ' प्रकरणे

कालिदासस्य परिचयः, तस्यावदानम्, तदीयकृतिगतं वैशिष्ट्यम्, रघुवंशमहाकाव्यस्य पञ्चमसर्गस्य आदितः त्रिंशतपद्यानां प्रसङ्गकोशपर्यायविग्रहसमासतात्पर्यालङ्कारादिप्रदर्शनपुरः सरं व्याख्यानञ्च ।

## 'ङ' प्रकरणे

### १.अधोलिखितानि नीतिपद्यानि

१. न चौरहार्यं न च राजहार्यं. (३०.१३) लङ्कापतेः सङ्कुचितं यशो यत् (३३.२९) २. साहित्यसङ्गीतकलाविहीन .(४०.३०) यस्यास्ति वित्तं स नरः कुलीनः (६४.९) भवन्ति नम्रास्तरवः फलोद्गमैः (७५.११) जाउद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः (८३.२०) केयूरा न विभूषयन्ति. (८५.१४) जाड्यं धियो हरति. (८७.२९) पित्रोर्नैव वचः शृणोति (९०. १२) चित्ते भ्रान्तिर्जायते मद्यपानत् .(१००.६) कुग्रामवासः कुजनस्य सेवा. (१७३.८७५), अर्थागमो नित्यमरोगिता च (१७१.१२३) रत्नैर्महार्हैं (७७.१०) असम्भवं हेममृगस्य जन्म. (९२.५३) वरं वनं व्याघ्रगजेन्द्रसेवितं (६६.४६) मौनान्मूकः प्रवचनपटुः ।(९७.१५) चित्ते भ्रान्तिर्जायते मद्यपानात्. (१००.५) यशस्करे कर्मणि (१७५.९२०) कुले कलङ्क. (१७५.९२३) कुदेशमासाद्य

कुतोऽर्थसञ्चय (१७५.९१५) कुग्रामवासः कुजनस्य सेवा(१७२.८७६) प्रारभ्यते न खलु. ( ३९०.५४८) निन्दन्तु नीतिनिपुणा (७८.११) हंसो विभाति (१०६.९६३) स हि गगनविहारी ( ९३.८३) उदयति यदि भानुः (५१.२२२) यदा किञ्चिदज्ञोऽहम्. (४१.५८) शक्यो वारयितुं जलेन हूतभुक् (४१.६८) यावत्स्वस्थमिदं शरीरमरुजं (१७८.१००७) ) विद्यानाम नरस्य. ( ३०.१६)

२. कानिचिदन्तरालापपद्यानि– कस्तूरी जायते कस्मात् (१९६.१) युधिष्ठिरः कस्य पुत्रो ( १९६.४) भोजनान्ते च किं पेयम्(१९६.५)

३.बहिरालापपद्यम्—बुधः कीदृग्वचो व्रूते (२००.३७)

४. कूटपद्यानि– केशवं पतितं दृष्ट्वा (१८६.१) पनीयं पातुमिच्छामि (१८६.२) शस्त्रं न खलु कर्तव्यम् (१८८.२९)

५.समस्यापूर्तिपरिचयः—तक्रं शक्रस्य दुर्लभम्, सिन्दूरविन्दुर्विधवाललाटे।

६. प्रहेलिकापद्यानि– अपदो दूरगामी च (१८४.१) वने जाता वने त्यक्ता (१८४.२) पर्वताग्रे रथो याति(१८५.१९) कृष्णमुखी न मार्जारी (१८५.२५)

**५. शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शाद्याः शिक्षणविधयोऽत्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरेऽपि विधयः प्रयोक्तुं शक्यन्ते । शिक्षकैर्यथासम्भवं निर्धारितपाठ्यांशस्य सम्यग् बोधाय कवलं मार्गनिर्देशनं विधाय स्वयमेव विषयपरिज्ञानार्थं छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां शैक्षिकसामग्रीणां व्यवस्थापनं सति सम्भवे शिक्षकैरन्यथा च सम्बद्धविभागेन विद्यापीठेन वा विधेया।

**६.मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तमस्ति– **आन्तरिकं (निर्माणात्मकम्) बाह्यं (निर्णयात्मकम्) च** । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति।

आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतकार्येष्वाधृतं भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकण विभागसमन्वितकार्ययोजनायां मूल्याङ्कनमेतद्विधीयते । गृहकार्यं कक्षापरीक्षा परियोजनाकार्यं सामूहिक-विमर्शादधिगतनिष्कर्षोपलब्ध्यादीनां प्रतिवेदनरूपेण प्रस्तुतिश्चेत्यादीन्यन्यानि साधनान्यप्यान्तरिकमूल्याङ्कनस्याधाररूपेण ग्रहीतुं शक्यन्ते । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्काः सन्ति निर्धारिताः।

बाह्यमूल्याङ्कने सत्रान्ते बाह्यपरीक्षा भवति । बाह्यमूल्याङ्कनस्य परीक्षैषा नेपालसंस्कृतविश्वविद्यालयेन वर्षान्ते वार्षिकपरीक्षारूपेण सञ्चाल्यते ।सा च परीक्षा लेखानात्मिका भवति। प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां ने.स.वि. परीक्षानियन्त्रण–कार्यालयेन, अनुपातपद्धत्या समायोजनं विधास्यते।

बाह्यपरीक्षा साधारणतया भौतिकोपस्थित्या साकं सञ्चाल्यते परन्तु महामार्यादिप्रकोपविशेषादसामान्यपरिस्थितेः कारणात् परीक्षाकर्(द्रगतत्वेन व्यवस्थापनस्य काठिन्ये समुपस्थिते, अन्तर्जालादिमाध्यमेनापि सञ्चालयितुं शक्यते। अत्र मूल्याङ्कने यथासम्भवं विश्वविद्यालयान्तःस्थाः सम्बद्धविषयस्य प्राध्यापका एव बाहुल्येनोपयुज्यन्ते।

## वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारणी

| प्रकरणानि क,ख,ग,घ, ङ | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २ × १२ = २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३ × ८ = २४ |
| | वस्तुगताः | १० | १० | १० ×१ = १० |
| | | २६ | २१ | १०० |

### ६. पाठ्यसूची

#### (क) पाठ्यग्रन्थाः

१. अम्बिकादत्त व्यासः, सन् २००७. **शिवराजविजयः** वाराणसी चौखम्बा अमरभारती प्रकाशन।

२. कालिदासः रघुवंशमहाकाव्यम्,(पञ्चमसर्गः) सम्पा.वासुदेव शर्मा,. (षष्ठं संस्करणम्). मुम्बई : निर्णयसागर प्रेस।

#### (ख) सहायकग्रन्थाः

**क–प्रकरणस्य कृते आधारग्रन्थाः**

१. द्विवेदी, कपिलदेव (डा.). ***रचनानुवादकौमुदी,*** सन् १९८७. वाराणसीः विश्वविद्यालयप्रकाशन।

३. विष्णुशर्मा. **हितोपदेशः*(विग्रहस्य गद्यभागः)*** वाराणसीः चौखम्बा प्रकाशन।

४.सम्बद्धशैक्षिकवर्षे गोरखापत्रस्य नियमिताङ्केषु ***नयाँनेपालपृष्ठ***मध्ये संस्कृतभाषायां शनिवासरीयविशेषाङ्केषु च नेपालीभाषायां प्रकाशिता लेखाः।

**ख–प्रकरणस्य कृते आधारग्रन्थाः**

**१** सिग्द्याल, सोमनाथ. २०२५. ***अनुवादचन्द्रिका*** (तृतीय–चतुर्थभागौ) ठमेल : ललितादेवी।

**२**. ढुङ्गाना, नीलमणि (प्रा.).२०५५. ***संस्कृतरचनाप्रकाशः***. बेलभुन्डी दाङ : नेपाल संस्कृत विश्वविद्यालयः

३. अधिकारी, जीवन, संस्कृतरचना ,

३. मिश्रः, रामचन्द्र. प्रबन्धपारिजातः, वाराणसीः चौखम्बा अमरभारती प्रकाशन।

**ग, घ, –प्रकरणयोः कृते आधारग्रन्थाः**

२. मिश्रः रामचन्द्रः, सन् १९९०, ***संस्कृतसाहित्येतिहासः,*** वाराणसीः चौखम्बा प्रकाशन।

३. रमेशचन्द्रः (डा.) वि.सं.२०२३. प्रबन्धरत्नाकरः. चतुर्थसस्करणम्. वाराणसीः चौखम्बा सुरभारती प्रकाशन।

**ङप्रकरणस्य कृते आधारग्रन्थः**

नारायणराम आचार्य (पुनर्मुद्रितसंस्करण २०१४), सुभाषितसुधारत्नभाण्डागारम्, चौखम्बा संस्कृत प्रष्ठिान, जवाहर नगर, दिल्ली

**(ग) सन्दर्भग्रन्थाः।**

४.नौटियाल, चक्रधर हंस. सन् १९८८. ***बृहद् अनुवादचन्द्रिका.*** (पुनर्मुद्रणसंस्करणम्). वाराणसी : मोतीलाल बनारसीदास।

## नेपाल संस्कृत विश्वविद्यालयः

## शास्त्रिपरीक्षा

**विषयः** – अ.वै.सं.र. **पूणाङ्काः** – १००

**सङ्केताङ्कः** – ४०२ **समयः** – घण्टात्रयम्

**पत्रम्** – द्वितीयम्

### निबन्धात्मकाः प्रश्नाः

१ अम्विकादत्तस्य गद्यकाव्यवैशिष्ट्यं प्रकश्यताम्। १२

**अथवा**

शिवराजविजयस्य प्रथमविरामान्तर्गतचतुर्थनिःश्वासस्य सारांशः प्रकाश्यताम्।

२. महाकवेः कालिदासस्य काव्यवैशिष्ट्यं निरूप्यताम्। १२

### व्याख्यात्मकाः प्रश्नाः

३.अधस्तनगद्यखण्डस्य प्रसङ्गपर्यायविग्रहादिप्रदर्शनपुः सरं व्याख्या क्रियताम्। ८

अथ क्षणेनैव पार्वतनदीवेग इव निर्जगाम झञ्झावातोत्पातोऽपि । ततो नूतनवारिधाराक्षालनप्रकटितपरमहारीत्यानां परकोटीकीरपटलपरीतानामिव समवालोक्यत लोचनरोचिका शोभा पलाशिनाम्। सादी च चञ्चच्चन्द्रचमत्कारेण द्विगुणितोत्साहः मा भूद् द्वाररोधो मद्गमनात् पूर्वमेव इति सत्वरसत्वरः तोरणदुर्गयामिकपादचारमर्दितायां भुवि समाजगाम ।

**अथवा**

कार्यं वा साधयेयम्, देहं वा पातयेयम्, इत्युक्तेराशयो प्रसङ्गमनुसृत्य स्फुटीक्रियताम्।

४. अधस्तनपद्यस्य सप्रसङ्गादिनिर्देशं व्याख्या विधीयताम्। ८

आधारबन्धैः प्रमुखप्रयत्नैः संवर्धितानां सुतनिर्विशेषम्।
कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम्॥

५. सप्रसङ्गं भावार्थः स्फुटीक्रियताम् । ८

चित्ते भ्रान्तिर्जायते मद्यपानाद् भ्रान्ते चित्ते पापचर्यामुपैति।

पापं कृत्वा दुर्जनं यान्ति मूढास्तस्मान्मद्यं नैव पेयं न पेयम् ॥

## संक्षिप्तोत्तरात्मकाः प्रश्नाः

६. अधोलिखितगद्यभागस्य संस्कृतभाषायामनुवादं कुरुत। ७

जसले जीवनलाई नकारात्मक दृष्टिले हेर्छ, त्यसले आफ्नो अगाडि सँधै अँध्यारो देख्छ। ऊ कहिल्यै हास्दैन र आनन्दको अनुभव गर्नसक्दैन। उसको अनुहार बादल लागेको आकाशजस्तै कालो र विरक्त लाग्दो देखिन्छ। विस्तारै उसको जीवनको वटवृक्ष ओइलाउदै जान्छ र अन्त्य हुन्छ। जसले जीवनलाई सकारात्मक दृष्टिले हेर्छ, उसको उत्साह बढ्दछ र आनन्दको वर्षा भएको अनुभव गर्दछ। उसको जीवनमा निराशाका वादलहरू देखिदैनन्। सदा शारदीय घमाइलो दिनको अनुभूति हुन्छ।

७. अधोलिखितपद्यानां नेपालीभाषायामनुवादं कुरुत। ७

धरातलेऽस्मिन् विविधैश्वर्यसम्पन्नं वर्द्धमानं नाम नगरं विलसति। तत्र दन्तिलो नाम नानाभाण्डपतिः सकलपुरनायकः प्रतिवसति स्म। तेन स्वपुरविकासकार्यं विधाय तत्पुरवासिनो लोका नेतारश्च तुष्टिं नीताः। पूर्वमितो न कोऽपि वणिक् तादृक् श्रुतो दृष्टो वा। अथैवं गच्छति काले दन्तिलस्य विवाहः सञ्जातः। तत्र तेन सर्वे पुरवासिनः नेतारश्च सम्मानपुरःसरमामन्त्र्य भोजिताः सम्मानिताश्च वस्त्रादिभिः। ८

उपमानप्रधानैर्दशाधिकैर्वाक्यैर्वसन्तवैभवं वर्ण्यताम् ७

**अथवा**

मिश्रवाक्यानि प्रयुज्य शारदीप्रभा प्रकाश्यताम्

९. अनुष्टुप्छन्दसि स्वेच्छया कोऽप्येको विषयो वर्ण्यताम्। ७

**अथवा**

दशभिः सुललितैः संयुक्तवाक्यैः शिशिरर्तोरवस्था समुपवर्ण्यताम्।

१० पद्यमिदं साधु व्याख्यायताम्। ७

स हि गगनविहारी कल्मषध्वंसकारी

दशशतकरधारी ज्योतिषां मध्यचारी।

विधुरपि विधियोगाद् ग्रस्यते राहुणासौ

लिखितमपि ललाटे प्रोज्झितुं कः समर्थः

११. अस्यार्थो स्फुटं प्रकाश्यताम्। ७

केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः।

रुदन्ति कौरवाः सर्वे हा केशवः केशवः

**अतिसंक्षिप्तोत्तरात्मकाः प्रश्नाः**

१२. वाक्यैनैकेनोत्तराणि लिख्यन्ताम् १०

(क) रामो भूयते इत्यत्र कस्य वाच्यस्य प्रयोगः?

(ख) बालिका पाठं पठति इतयस्य बहुवचने किं रूपम् ?

(ग ) साहित्यसङ्गीतहीनः पुरुषः कीदृशः ?

(घ) विनाशकाले बुद्धिः कीदृशी भवति ?

(ङ) जीवलोकस्य सुखानि कानि ?

(च) विद्वान् कुत्र न भाति ?

(छ) धीराः कस्मात् पथो न चिलन्ति ?

(ज) ल्यबन्तपदेन वाक्ये संयुज्येताम् – स पुनःपुनः कर्म विदधाति, स फलं लभते।

(झ) सम्भावनार्थे परिवर्तनं क्रियताम् – रामः कार्यं करिष्यति।

(ञ) संयुक्तवाक्यस्योदाहरणं लिख्यताम्।

**विशिष्टीकरणतालिका**

| **प्रकरणानि** | **प्रश्नप्रकृतयः** | **प्रष्टव्याः** | **समाधेयाः** | **अङ्काः** | **विवरणम्** |
|---|---|---|---|---|---|
| ग,घ | निबन्धात्मकाः | ३ | २ | १२×२ | निबन्धात्मकप्रश्नाः ग्रन्थसम्बद्धाः विवेचनात्मका भविष्यन्ति। |

| | | | | | |
|---|---|---|---|---|---|
| ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८×३ | |
| क ख ङ | संक्षिप्तोत्तरात्मकाः | ९ | ६ | ७×६ | |
| क , ख, ङ | अतिसंक्षिप्तोत्तरात्मकाः | १० | १० | १×१० | |

**Nepal Sanskrit University**

**Compulsory English Courses**

**Level: Shastri Second Year**

**Course Title: Reading and Writing across the Curriculum**

**Code: Comp. Eng. 402** **Full Marks: 100**

**Teaching Hours: 150** **Pass Marks: 40**

**Course Description:** The purpose of the course is to develop reading and writing competence among the students. Students will familiarize themselves with discourses from different disciplines. Once the diverse texts are read, students will attempt to summarize, critique, analyze, synthesize, and reflect upon such readings. Through practice, students will also acquaint themselves with the fundamental principles of usage of English language. Finally, the course aims to prepare them for advanced level of reading and writing skills essential for academic and professional life.

**UNIT I: Usage, Composition, and Style** **30 hrs.**

Rules of Usage

Principles of Composition

Matters of Form

Words and Expressions Commonly Misused

An approach to Style

| | |
|---|---|
| **UNIT II: Reading and Writing Summaries and Critiques** Summary, Paraphrase, and Quotation | **30 hrs.** |

Critical Reading and Critique

Introductions, Theses, and Conclusions

| | |
|---|---|
| **UNIT III: Reading and Writing Syntheses and Analyses** | **30 hrs.** |

Explanatory Synthesis

Argument Synthesis

Analysis

| | |
|---|---|
| **UNIT IV: Economics, Environment/ Public Policy, Sociology Readings**: | **30 hrs.** |

Ursula Huws. “Fixed and Footloose Work and Identity in the Twenty-First Century’

Thomas Friedman. “The Untouchable”

Lubber Mindy. “Balance Sheets and Climate Crisis: How American Business can Help”

Michael Totty. "The Case for and Against Nuclear Power"

Stephanie Coontz. "The Radical Idea of Marrying for Love"

Eric Bartels. "My Problem with Her Anger"

**Unit V: Biology, Business, Fairy Tales, Psychology, 30 hrs.**

**Readings:**

Paul Martin. "A Third of Life"

William C. Dement and Christopher Vaughan. "Sleep Debt and the Mortgaged Mind"

Courtland L. Bovee, et.el.. "Making the Pitch in Print Advertising"

Arthur Schlesinger Jr. "What Great Books do for Children"

StithThompson. "Universality of Folktale"

Erich Fromm. "Disobedience as a Psychological and Moral Problem"

**Prescribed Texts:**

Behrens, Laurence and Leonard J. Rosen. *Writing and Reading Across the Curriculum.* (11th Edition). Pearson, 2011.

Strunk, William Jr. and E. B. White. *The Element of Style*. (4th Edition). Allyn and Bacon , 2000.

**Weightage**:

Writing and Reading Across the Curriculum 80%

The Element of Style. 20%

**Evaluation System**

**Final Examination: 80 Internal Examination 20**

i. Internal Exam 10
ii. Attendance and Classroom Activities 5
iii. Project work and Presentation 5

## विषय – अनिवार्यसंस्कृतम्

**पाठ्यांशनाम** – संस्कृतवाङ्मयपचियः **पाठ्यांशसंकेतः** – अ.सं.४०१

**स्तरः**–शास्त्री **पूर्णाङ्का** :–१००

**बर्षः**– द्वितीयः **वार्षिकः पाठ्यभारः**–१६० पा.घ.

**पत्रम्**– प्रथमम् **साप्ताहिकः पाठ्यभारः** –६

**१.पठ्यांशपरिचयः**

पञ्चसु प्रकरणेषु विभक्तोऽयं पाठ्यांशः । उत्तरमध्यमस्तरपरीक्षां तत्समकक्षान्यपरीक्षां वा समुत्तीर्य शास्त्रिस्तरेऽध्येतुकामानां छात्राणां संस्कृतवाङ्मयस्य वैशिष्ट्यविश्लेषणाय प्रवेशद्वारभूतोऽयं पाठ्याशोऽस्ति निर्धारितः । स्तरीयसंस्कृतभाषाया विशेषेण प्रयोगनैपुण्याभिवृद्धये पाठ्यांशोऽयं परमोपयोगी । गहनतमसंस्कृतकाव्यानामध्ययनमत्र **क**प्रकरणे विधीयते । तदर्थं बाणभट्टप्रणीतायाः कादम्बर्याः कथामुखमत्र निर्धारितं विद्यते । प्रतिपदं विग्रहसमासालङ्कारादिकमत्र पाठ्यते । प्रकणस्य प्रारम्भे संस्कृतगद्यकाव्यस्य परम्परायां वाणभट्टस्य प्रवृत्तिगतं वैशिष्ट्यञ्चात्र प्रकाश्यते । **ख**प्रकरणे महाकवेः कालिदासस्यावदानेन तदीयप्रवृत्तिगतवैशिष्ट्येन च सहैव समासविग्रहपर्यायकोषादिप्रदर्शनपुरःसरं व्याख्यानाय रघुवशंमहाकशाव्यस्य तृतीयसर्गो निर्धारितः । **ग** प्रकरणे च नाटकलक्षणज्ञानपुरःसरं

नाटककारभवभूतेरावदानस्य विषयः, तदीयं उत्तररामचरितं नाम नाटकञ्च निर्धारितम् । **घ** प्रकरणे संस्कृतवाङ्मयपरिचयप्रदा पृथग् विषयसम्बद्धाः केचन निबन्धाः समाविष्टाः सन्ति । तेषामध्ययनेनच्छात्रा संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां प्रमुखसिद्धान्तानां व्याख्याने च शक्ता भविष्यन्तीति प्रतीयते । **ङ** प्रकरणे सुललितसंस्कृतरचनासम्बद्धा विषयाः समाविष्टाः सन्ति । च प्रकरणे च व्यावहारिकजीवनसम्बद्धा सदाचार–पञ्चाङ्गाशौचपरिचयप्रदा विषयाः सन्ति निर्धारिताः ।

## २. पठ्यांशस्य सामान्योश्यानि

अस्य पाठ्यांशस्याध्ययनेन छात्रा अधोलिखितविषयषुप्रावीण्यमेष्यन्ति–

- बाणभट्टविरचितगद्यकाव्यस्य वैशिष्ट्यप्रदर्शने
- समस्तपदानां श्लिष्टपदानाञ्च विग्रहप्रदर्शनमुखेन निर्धारितगद्यभागस्य व्याख्याने
- महाकवेः कालिदासस्य सपरिचयं काव्यगतवैशिष्ट्यप्रदर्शने ।
- निर्धारितमहाकाव्यान्तर्गततृतीयसर्गस्थपद्यानां प्रसङ्गविग्रहपर्यायकोशभावार्थप्रदर्शन पुरःस्सरं व्याख्याने ।
- भवभूतिरचितस्य उत्तररमचरितनाटकस्य परिचयप्रदाने , प्रथमाङ्कपद्यानां व्यख्याने, भावार्थप्रकाशने च ।
- संस्कृतवाङ्मयप्रतिनिधिभूतानां प्रमुखाणां विषयाणां सिद्धान्तानाञ्च विश्लेषणे
- सुललितसंस्कृतरचनाकौशलवर्धने ।
- व्यावहारिकजीवनसम्बद्धानां सदाचारपञ्चाङ्गाशौचपरिचयप्रदानां विषयाणां निरूपणे च ।

## ३. पठ्यांशस्य विशिष्येद्देश्याानि,पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्येद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठ |
|---|---|---|---|---|
| क | वाणभट्टस्य प्रवृत्तिगतवैशिष्ट्यस्य प्रकाशनम् संस्कृतप्रौढगद्यभागस्य विग्रहपर्यायकोशप्रदर्शनमुखे | आदितः शुककृतशूद्रक नरपतिप्रशंसान्तो भागः। | २० | ३० |

| | | | | |
|---|---|---|---|---|
| | न व्याख्यानञ्च। | | | |
| ख | निर्धारितमहाकाव्यस्य कृतिगतवैशिष्ट्य प्रदर्शनपुरः सरं प्रतिपदं समासविग्रह–भावार्थपर्यायालङ्कारादिकं प्रदर्श्य व्याख्यानम् | रघुवंशमहाकाव्यस्य तृतीयसर्गस्थानि निर्धारितानि आदिदतःपञ्चत्रिंशत्पद्यानि। | १० | १५ |
| ग | भवभूतिरचितोत्तररामचरितस्य कृतिगतवैशिष्ट्यप्रदर्शनपूरः सरं निर्धारितपद्यानां प्रतिपदं समासविग्रह–भावार्थपर्यायालङ्कारादिकं प्रदर्श्य व्याख्यानम्। | भवभूतिप्रणीतोत्तररामचरितसम्बद्धा निर्धारिता विषयाः | १० | १५ |
| घ | संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां प्रमुखसिद्धान्तानां व्याख्यानम्। | संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां सिद्धान्तानाञ्च निरूपकाः केचन निर्धारिता निबन्धाः | ३० | ५० |
| ङ | कानिचिदाधारभूतानि वाक्यानि प्रकल्प्य कारकनियमानुसारेण तेषां विस्तारकलाप्रदर्शनम् अनुवादकलानिदर्शनम् निबन्धलघुकथासंवादसङ्कथन लेखनकलाप्रकाशनम्। समासनियमानुसारेण | संस्कृतगद्यखण्डस्य नेपालीभाषायां नेपालीभाषायां रचितस्य गद्यखण्डस्य च संस्कृतभाषायामनुवादः,निबन्धरचना, लघुकथाः, स्वल्पसंवादाः, सङ्कथनानि, कस्यापि अनुच्छ्दस्य संक्षेपीकरणम्,कस्यापिसूक्तेर्विस्तृती | २० | |

| | | | | |
|---|---|---|---|---|
| | समस्तपदानां विग्रहप्रदर्शनम् । | करणञ्च । | | |
| च | व्यावहारिकजीवनसम्बद्धानां सदाचारपञ्चाङ्गाशौचपरिचयप्रदानां विषयाणां निरूपणञ्च | सदाचारपञ्चाङ्गाशौचपरिचयप्रदा निर्धारिता विषयाः | १० | १५ |

## ४. पाठ्यवस्तुविवरणम्

### क प्रकरणे

गद्यकाव्यस्य लक्षणम्: बाणभट्टस्य परिचयः,बाणभट्टस्य प्रवृत्तिगतं वैशिष्ट्यम् । कादम्बर्या : कथावस्तु । मङ्गलाचरणम्, शूद्रकवर्णनम्,तस्य राजधान्या विदिशाया वर्णनम्, राजानं द्रष्टुं समागताया मातलिकन्यकाया वर्णनम्, नरपतेराज्ञया शुकमादाय प्रवेशितया च तया आस्थानमण्डपे निषण्णस्य तया विलोकितस्य राज्ञो वर्णनम्, राज्ञा विलोकिताया पुरुषधिष्ठितपुरोभागाया मातङ्गकुमार्या वर्णनम्, पुरुषेण समर्पिते च शुके तन्मुखेन शुकस्य वैशिष्ट्यवर्णनम्, ततश्च आर्याछन्दसा राज्ञः प्रशंसनम्, कादम्बर्या आदितः शूककृतशूद्रकप्रशंसनपर्यन्तगद्यभागस्य विग्रहपर्यायालङ्कारादिप्रदर्शनपुरःसरं व्याख्यानञ्च ।

### खप्रकरणे

कालिदासस्य परिचयः, तदीयकृतिगतं वैशिष्ट्यम् । रधुवंशमहाकाव्यस्य तृतीयसर्गस्थानिआदितः त्रिंशतपद्यानि

### ग प्रकरणे

नाटकस्य लक्षणम्, तदवयवाश्च । नाटककारस्य भवभूतेः परिचयः, तदीयकृतिगतं वैशिष्ट्यञ्च, व्याख्यायाः कृते उक्तनाटकस्य प्रथमाङ्कस्थानि पद्यानि ।

### घ प्रकरणे

### सस्कृतवाङ्मयपरिचयः

(क) संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां प्रमुखसिद्धान्तानां व्याख्यानाय सहाय्यभूता प्रबन्धरत्नाकरादुद्धृता अधोऽङ्किता निबन्धाः–

१.वेदानां महत्त्वम् २. वेदाङ्गानि ३. उपनिषज्ज्योतिः ४. धर्मसूत्राणां वेदमूलकत्वम्, धर्मस्य च महनीयत्वम्, ५. पुराणनां महत्त्वम्, ५.वेदान्तदर्शनम् ७. साङ्ख्यदर्शनम्, ८ नास्ति योगसमं बलम् ९. वैशेषिकदर्शनम् १०. न्यायदर्शनम् ११. मीमांसा १२. बौद्धदर्शनम् १३. जैनदर्शनम् १४.चार्वाकदर्शनम् १७.श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम् १८ .महाभारतम् १९. ज्योतिश्शास्त्रस्य लोकोपकारित्वं महत्त्वञ्च २० शब्दानुशासनम् २१. साहित्यशास्त्रम्, २२ संस्कृतभाषा।

(ख) संस्कृतवाङ्मयस्य विविधविधासु प्रतिपादितानां विषयाणां प्रमुखसिद्धान्तानां व्याख्यानाय सहाय्यभूता संस्कृतवाङ्मये विज्ञानमित्यस्मात् संग्रहग्रन्थादुधृद्ता अधोऽङ्किता निबन्धाः–

१.शुल्वविद्यारम्भः २. संस्कृतवाङ्मये विमानविज्ञानम् ४.वास्तुविज्ञानम् ५. संस्कृते सङ्गणकव्रस्यि आवश्यकता, तत्प्रयोगश्च ६..आयुर्वेदे वनस्पतिविज्ञानम् ७..अर्वाचीनसंस्कृतसाहित्ये विमानकाव्यम् ।

## ङ प्रकरणे

१.नेपालीभाषातः संस्कृतभाषायां संस्कृतभाषातः नेपालीभाषायामनुवादः, आधारभूतानि कानिचिद् वाक्यानि प्रकल्प्य कारकनियमानुसारेण तेषां विस्तरणेऽभ्यासः,कस्याप्यनुच्छेदस्य संक्षेपीकरणेऽभ्यासः, अधोलिखितसूक्तीरवलम्ब्य भावार्थप्रकाशने वाक्येषु प्रयोगे चाभ्यासः– १.हितं मनोहारि च दुर्लभं वचः, २.यशः पूण्यैरवाप्यते,३. कीर्तिर्यस्य स जीवति,४. अजीर्णे भोजनं विषम्, ५. अति सर्वत्र वर्जयेत्,६.आलस्योपहता विद्या, ७.काले दत्तं वरं स्वल्पमकाले बहुनापि किम्, ८.कुवाक्यान्तञ्च सौहृदम् ९. निर्धनस्य कुतः सुखम् १०. परोपकाराय सतां विभूतयः ११.माता समं नास्ति शरीरपोषणम्, १२. विद्वान् सर्वत्र पूज्यते १३.विनाशकाले विपरीतबुद्धिः १४.बुद्धिर्यस्य बलं तस्य १५शीलं हि सर्वस्य नरस्य भूषणम् ।

२.समासपरिचयः, समासभेदाः, अव्ययीभाव– तत्पुरुष– कर्मधारय बहुव्रीहि–द्विगु– समाहारेतरेतरद्वन्द्वानां सोदाहरणमभ्यासः।

## च प्रकरणे

१.**आचाराः**–याज्ञवल्क्यप्रतिपादिता अधोलिखिता विषयाः– याज्ञवल्क्यपरिचयः, विद्यानां धर्मस्य च स्थानानि, धर्मशास्त्रप्रयाजकाः, धर्मलक्षणम्,वर्णानां संस्कारकालाः,शौचाचाराः,उपनयनस्य परमकालावधिः, वर्णत्रयस्य द्विजत्वनिरूपणम्, वेदाध्ययनफलम्, स्नानम्, स्नानानन्तरकर्तव्यम्, विवाहाय प्रशस्ता कन्या, प्रशस्तो वरः, विवाहप्रकारास्तेषां लक्षणानि च । गृहस्थधर्माः,श्राद्धपरिचयः, गृहस्थधर्माः।

**२. आशौचनिर्णयः–** सपिण्डसमानोदकसकूल्यपरिचयः,जननाशौचानि, मरणाशौचानि, आशौचसम्पातः अतिक्रान्ताशौचानि।

**३.पञ्चाङ्गपरिचयः–** पञ्चाङ्लक्षणम्,नेपाले पञ्चाङ्गनिर्माणस्य तत्प्रकाशनस्य च विकाशक्रमः, पञ्चाङ्गालोकनविधिः, पञ्चाङ्गे वर्णिताः प्रमुखविषयाः, तेषा परिचयश्च।संवत्सरस्य परिचयः, षष्टिः संवत्सराः, अयने, सौरचान्द्रमासपरिचयः,षड् ऋतवः, पक्षौ, तिथयः, नक्षत्राणि, केषाञ्चन नक्षत्राणां चित्रनिर्माणम् (कृत्तिकाः, मृगशीर्षम्, मघाः, हस्तः, अनुराधाः, ज्येष्ठा, मूलम्), द्वादशराशिपरिचयः, कषाञ्चन राशीनां चित्रनिर्माणम् (सिंहः, वृश्चिकः, धनुः),योगपरिचयः, करणपरिचयः, वारपरिचयः,नवग्रहाणां परिचयः अधिकमासाः ( २०६६–२०९५ वै.) यात्राविचारः, चन्द्रवासविचारः, योगिनीविचारः, पञ्चकज्ञानम्, अग्निवासविचारः, शिववासविचारः, वारवेलाचक्रम्, विवाहे मेलापकम्, गुणज्ञानम्, नक्षत्रपादाक्षरज्ञानम्, नक्षत्रपादाक्षरानुसारिनामकरणम् ग्रहणपरिचयः, ग्रहणे कर्तव्याकर्तव्यविचारःदेशान्तरानुसारेणसूर्योदयतदस्तकालयोर्घटिकानयनज्ञानम्,लग्नपत्रिकालेखनम्, व्रतपत्रिकालेखनञ्च, विवाहव्रतबन्धादिषु रविचन्द्रगुरुशुद्धि– प्रदर्शनम्।

### ५.शिक्षणविधयः शैक्षिकसामग्री च

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते। सति सम्भवे शिक्षकैस्तदिरा अन्वेषणपरियोजनयो प्राक्कल्पनादयश्छात्रकेन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते। यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव निर्धासितनिबन्धादीनां पाठाय छात्राः प्रेरणीयाः। विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः। तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया। साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते। तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते। शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया।

### ६.मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – **आन्तरिकं** (निर्माणात्मकम्) **बाह्यम्** (निर्णयात्मकम्) **च**। आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति। कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते। गृहकार्यं कक्षा परीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति। आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः। बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति। प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव

भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

## वार्षिक–परीक्षा–प्रश्नपत्रसारिणी

| **प्रकरणानि क,ख,ग,घ,ङ** | **प्रश्नप्रकाराः** | **प्रश्नसंख्याः** | | **अङ्काः** |
|---|---|---|---|---|
| | | **प्रष्टव्याः** | **समाधेयाः** | |
| | विवेचनात्मकाः | ३ | २ | २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| | व्याख्यात्मकाः | ४ | ३ | २४ |
| | वस्तुगताः | १० | १० | १० |
| | | २७ | २१ | १०० |

**पाठ्यग्रन्थाः**(पाठ्यांशत्रमेण)

(१) बाणभट्टः**, कादम्बरी** () चौखम्बाप्रकान, वाराणसी, भारत

(२) कालिदासः **रघुवंशकहाकाव्यम्** (निर्धारितांशः) चौखम्वाविद्याभवन, वाराणसी

३ भवभूतिः, **उत्तररामचरितम् ,** चौखम्बा संस्कृत सिरिज वाराणसी

३..याज्ञवल्क्यः, **याज्ञवल्क्यस्मृतिः** ( आचाराध्यायस्य निर्धारितांशः) चौखम्बा विद्याभवन वारणसी ।

४. शुक्ल, रमेशः (डा) **प्रबन्धरत्नाकरः**,(निर्धारितनिबन्धाः) चौखम्बा विद्याभवन वाराणसी

५.सं. सेमबालः, श्रीकृष्णः, **संस्कृतवाङ्मये विज्ञानम्** (निर्धारितनिबन्धाः) दिल्ली संस्कृत अकादमी, दिल्ली स

६. सिग्द्याल, सोमनाथ, **अनुवादचन्द्रिका,** तृतीय प्रकाशः,चतुर्थप्रकाशश्च। (ई.सन्.)

## सहायकग्रन्थाः (वर्णक्रमानुसारेण )

१. ईश्वर कृष्णः , **साङ्ख्यकारिका,** चौखम्वाविद्याभवन वाराणसी

२ . कपिलदेव द्विवेदी (डा.) **संस्कृतनिबन्धशतकम्,** (चतुर्थसंस्करणम्) विश्वविद्यालय प्रकाशन, वाराणसी।

३. काशीनाथ, **धर्मसिन्धु,** चौखम्बा संस्कृत सिरीज वाराणसी, सन् १९६८।

४. कौण्डिन्यायन, प्रमोदः (डा.) **वैदिकतिथिपत्रम्,**, काष्ठमण्डपनगरम् : स्वाद्ध्यायशाला, २०७८

५. गौतम, रामचन्द्र, (डा.) आशौच विवेचन, नेपाल संस्कृत विश्वविद्यालय (दोस्रो संस्करण) २०६८

६. जगत प्रसाद उपाध्याय (अनुवादक) **नेपाली टीका** विशेषटिप्पणीसहित, तर्कामृतम् , काठमाडौं,

नेपाल, २०६७।

७. ढुङ्गाना, नीलमणि **व्युत्पत्तिमूलक संस्कृत– नेपाली शब्दकोश,** ललितपुर : साझाप्रकशन, २०७८ ।

८.नेपाल संस्कृतविश्वविद्यालय,***नेपालदेशीयपञ्चाङ्गम्,*** *बेलझुण्डी, दाङ*

९.**पूर्णिमा** (त्रैमासिकी पत्रिका) (३४, वेदाङ्गज्योतिषाङ्कः, काठमाडौं : संशोधनमण्डलम्, २०३३

१०. भट्टराई ,पद्मप्रसाद, **पौरस्त्य दर्शन एक चिनारी,** विद्यार्थी पुस्तक भण्डार, भोटाहिटी, काठमाडौं, नेपाल २०७४।

११. भट्टाचार्य , जगदीशः,**तर्कामृतम्** ,चौखम्वाविद्याभवन वाराणस

१२. मिश्र, रामचन्द्रः, **संस्कृसाहित्येतिहासः** चौखम्बा विद्याभवन, वाराणसी १९९०

१३. यति सदानन्दः (इं.२००३) **वेदान्तसारः** परिमलपब्लिकेशन, दिल्ली, भारत।

१४. लौहाक्षिभास्करः **अर्थसंग्रहः**,चौखम्वाविद्याभवन वाराणसी

## विषयक्षेत्रम् — अनिवार्यसंस्कृतम्

**स्तरः —**शास्त्री **वर्षः** — द्वितीयः,

**पठ्यांशनाम —** संस्कृतवाङ्मयम् **पूर्णाङ्काः** – १००

## विशिष्टीकरणतालिका

| **प्रश्नप्रकाराः** | **प्रकरणानि** | **प्रष्टव्याः प्रश्नाः** | **समाधेयाः प्रश्नाः** | **अंकाः** | **अङ्क वितरणम्** | **विशेष** |
|---|---|---|---|---|---|---|
| विवेचनात्मकाः प्रश्नाः | क घ | ३ | २ | १२ | २४ | |
| व्याख्यात्मकाः | क,ख,ग | ४ | ३ | ८ | २४ | |
| संक्षिप्तो-त्तरात्मकाः | ख (१) ग (१) घ (३) ङ (१) | ९ | ६ | ७ | ४२ | अत्र निर्धारित क्षेत्रेभ्यो नव प्रश्नाः प्रष्टव्याः । तेषु षण्णामेव प्रश्नानामुत्तरदानाय च्छात्रा निर्देशनीयाः । तेषामङ्कभारश्च प्रतिप्रश्नं सप्तााङ्का निर्धारणीयाः , वैकल्पिकप्रश्नाः सम्बद्धप्रकरणादेव अथवारूपेण देयाः । |
| अतिसंक्षिप्तो-त्तरात्मकाः | | १० | १० | १० | १० | एतेषां प्रश्नानाम् उत्तराणि यथातिसंक्षिप्तानि स्युस्तथा प्रश्नाः प्रष्टव्याः। |

## आदर्शप्रश्नपत्रम्

## शास्त्रिपरीक्षा

**विषयः** – अनिवार्यसंस्कृतम् **खण्डः** – द्वितीयः

**पूर्णाङ्काः** – १०० **समयः** – घण्टात्रयम्

### विवेचनात्मकाः प्रश्ना

**१. कादम्बरीगद्यकाव्यस्य वैशिष्ट्यं प्रकाशयत ।** १२

**२. वैदिकावैदकदर्शनयोः पार्थक्यं विवेचयत ।** १२

**अथवा**

**३.साङ्ख्यदर्शनस्य नामकरणे बीजं निर्दिश्य तद्दर्शनतत्त्वानि लिखत।**

### व्याख्यात्मकाः प्रश्नाः

**४.अधोलिखितगद्यभागस्य प्रसङ्गपर्यायविग्रहालङ्कारनिर्देशं व्याख्यायताम्।** ८

आसने स्थितमपि धनुषि निषण्णम्, आयतलोचनमपि सूक्ष्मदर्शनम्, महादोषमपि सकलगुणाधिष्ठानम्, कुपतिमपि कलत्रवल्लभम्, अविरतप्रवृत्तदानमप्यमदम्, अत्यन्तशुद्धस्वभावमपि कृष्णचरितम्, अकरमपि हस्तस्थितभूवनमण्डलम् राजानमद्राक्षीत्।

**५. अधस्तनपद्यस्य प्रसङ्गपर्यायविग्रहादिप्रदर्शनपुरःसरं व्याख्यायताम्।** ८

विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव ॥

बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ॥

**अथवा**

**अधस्तनपद्यं खण्डान्वयपद्धत्या व्याख्यायताम्।**

स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः।

महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ॥

**६. भावार्थं लिखत ।** ८

लैकिकानां हि साधूनामर्थं वागनुवर्तते।

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥

**७. बौद्धदर्शनशाखानां परिचयः प्रस्तूयताम् ।** **७**

**अथवा**

**धर्मस्य वेदमूलकत्वे युक्तयः प्रकाश्यन्ताम् ।**

**८.संस्कृतवाङ्मयानुशीलने सङ्गणकयन्त्रस्य कुत्र उपयोगो भवति ? समुल्लिख्यताम्।** **७**

**अथवा**

शुल्वविद्यायाः परिचयो दीयताम्।

९. षट्कारकलक्षणोपेतैर्दशभिर्वाक्यैर्वसन्तर्तुर्वर्ण्यताम् ॥ ७

१०. अधस्तनपदानां विग्रहं प्रदर्श्य समासनामानि च लिख्यन्ताम् ७

यथाशक्ति, घनश्यामः, पीताम्बरम्, अपुत्रः, किंपुरुषः, त्रिलोकी, मातापितरौ।

११. यशः पुण्यैरवाप्यते इत्युक्तेराशयो विस्तार्यताम्। ७

१२. विवाहप्रकाराणां नामानि निर्दिश्यन्ताम्

**अथवा**

रुद्राभिषेककर्मणि काः कास्तिथयो भवन्ति ग्राह्याः ? उल्लिख्यन्ताम्। ७

**अतिसंक्षिप्तोत्तरात्मकाः प्रश्नाः**

१३.सर्वेषामेव प्रश्नानामुत्तराणि अतिसंक्षेपेण लिख्यन्ताम्। १०

(क) स्याद्वादः कस्य मतमस्ति ?

(ख) न्यायदर्शने कति प्रमाणानि सन्ति?

(ग) ऋणं कृत्वा घृतं पिबेत् इति कस्य मतम् ?

(घ) काव्यशास्त्रे ध्वनिसिद्धान्तः केन प्रवर्तितः ?

(ङ) उत्तररामचरिते कस्य रसस्य प्राधान्यम् ?

(च) रघुवंशमहाकाव्यस्य रचयिता कोऽस्ति ?

(छ) भौमस्य कति उपग्रहाः सन्ति ?

(ज) ब्राह्मणस्य कृते उपनयनकालस्य परमावधिः कोऽस्ति ?

(झ) अनुराधानक्षत्रस्य पादाक्षराणि कानि ?

(ञ) विवाहितानां स्त्रीणां पितुर्मरणे कतिदिनानि आशौचानि भवन्ति ?

# ऋग्वेदः

**पाठ्यांशनाम** – श्रौतकल्पनिरूपणम्

**पाठ्यांशसंकेतः** – ऋ.वे.४०१

**स्तरः**–शास्त्री

**पूर्णाङ्का** :–१००

**बर्षः**– द्वितीयः

**वार्षिकः पाठ्यभारः**–१६० पा.घ.

**पत्रम्**– तृतीयम्

**साप्ताहिकः पाठ्यभारः** –६

## १. पाठ्यांशपरिचयः

अयं पाठ्यक्रमो मूलतःऋग्वेदस्य शाकलशाखायाः श्रौतकल्पसंबद्धो वर्तते । ऋग्वेदविषयमवलम्ब्याधीयानानां छात्राणाम् अग्निष्टोमादियागहौत्रप्रयोगविधिविषयशिक्षणार्थं निर्धारितो ऽ यं पाठ्यांशः। षट्प्रकरणेषु विभक्ते ऽस्मिन् पाठ्यांशे ऐतरेयब्राह्मणान्तर्गताग्निष्टोमयागविषयाः सहौत्रकाः पद्धतिविषयाः तत्संबद्धाः आख्याननिर्वचनप्राकरणिकशब्दार्थज्ञानविषयाःसमाविष्टाः सन्ति ।

प्रथमे **क** प्रकरणे सायणाचार्यकृतभाष्ययुतस्यैतरेयब्राह्मणस्य प्रथमद्वितीयपञ्चिकागतानां ग्रन्थस्य ग्रन्थकर्तुश्च परिचयः,दीक्षणीयप्रायणीयोदयनीयातिथ्योपसदिष्टीनाम् अग्नीषोमीयपशुपुरोडाशविधानादि प्रयाजानुयाजोपयाजसम्बद्धदेवतानां सङ्ख्यानिर्देशश्चेत्यन्तानां विषयाणामध्ययनम् ।

द्वितीये **ख** प्रकरणे पूर्ववद्द्वितीयतृतीयपञ्चिकयोर्गतानाम् आज्यशस्त्रादारभ्य वैश्वदेवशस्त्रप्रयोगसंबद्धविषयाणामध्यनम् ।

तृतीये **ग** प्रकरणे तृतीयचतुर्थपञ्चमपञ्चिकागतानां उक्थ्यक्रतोरारभ्य दक्षिणाग्रहणे विचारश्चेति विषयाणामध्ययनम् ।

चतुर्थे**घ** प्रकरणे ऐतरेयब्राह्मणस्य प्रथमादिपञ्चमपञ्चिकागतानामाख्यायिका ऽवबोधनम् ।

पञ्चमे **ङ** प्रकरणे संबद्धविषयाणां श्रौतशब्दार्थनिर्वचनम् ।

षष्ठे **च** प्रकरणे सहौत्राग्निष्टोमपद्धतेः परिज्ञानम् ।

## २. पाठ्यांशस्य सामान्योद्देश्यम्

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोङ्कितविषयेषु प्रावीण्यमेष्यन्ति-

- होत्रकैः ऋत्विग्भिसत्रिषु सवनेषु ऋग्भिर्मन्त्रैः संपाद्यमानायाः याज्यायाः प्रयोगावबोधने

- सुत्यासु शस्त्राणि याज्यापुरोनुवाक्यांश्चेति समपेक्षितविषयाणां विवेचने
- दीक्षणीयेष्ट्यादीनां, पशुपुरोडाशयागादि- प्रातः माध्यन्दिनोत्तरसवनगतानां सहौत्रसौमिकप्रयोगे
- आख्यायिकामुखेन, प्राकरणिकसन्दर्भावबोधेन शब्दनिर्वचनमाध्यमेन च सहौत्राग्निष्टोमयागविषयप्रकाशने
- सहौत्रपद्धतिमनुसृत्याग्निष्टोमयागप्रयोगे

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यांशविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| **क** | ऐतरेयब्राह्मणग्रन्थपरिचयः, ग्रन्थकर्तुः परिचयः, ग्रन्थस्य दीक्षणीयेष्ट्यादिप्रयाजानुयाजोपयाज संबद्धदेवतानां सङ्ख्यानिर्देशश्चेत्यन्तानां विषयानां विवेचनम् । | ऐतरेयब्राह्मणस्य १, २ पञ्चिकागतविषयाः | २० | ३२ |
| **ख** | सायणाचार्यकृतभाष्यसहितस्य ऐतरेयब्राह्मणस्य आज्यशस्त्रादारभ्य वैश्वदेवशस्त्रप्रयोगसंबद्धविषयाणां , जातवेदसूक्तस्य शंसनविधिपर्यन्तानां तृतीयपञ्चिकायाः तृतीयाध्यायान्तविषयाणाञ्च विश्लेषणम् । | ऐतरेयब्राह्मणस्य द्वितीयतृतीययोः पञ्चिकयोर्विषयाः | २० | ३२ |
| **ग** | उक्थ्यक्रतोरारभ्य दक्षिणाग्रहणे विचारश्चेत्यन्तानां विषयाणां निरूपणम् । | ऐतरेयब्राह्मणस्य तृतीयचतुर्थपञ्चमपञ्चकागताः विषयाः | २० | ३२ |
| **घ** | आख्यायिकानामवबोधनपूर्वकं शब्दनिर्वचनम् । | ऐतरेयब्राह्मणम् पञ्चमपञ्चिकापर्यन्तम् । | १० | १६ |
| **ङ** | प्राकरणिकार्थज्ञानम् । | ऐतरेयब्राह्मणम् | १० | १६ |

| | | | | |
|---|---|---|---|---|
| | | पञ्चमपञ्चिकापर्यन्तम् । | | |
| **च** | सहौत्राग्निष्टोमपद्धतेः प्रयोगविधिनिरूपणम् । | अग्निष्टोमपद्धतिः । | २० | ३२ |
| | | योगः | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

### (क) प्रकरणे

सायणाचार्यकृतभाष्ययुतस्यैतरेयब्राह्मणस्य प्रथमद्वितीयपञ्चिकयोर्गतानां वक्ष्यमाणविषयाणामध्ययनम्

### प्रथमायां पञ्चिकायाम्

ग्रन्थस्य ग्रन्थकर्तुश्च परिचयः ’दीक्षणीयेष्टेर्विधानम् , दीक्षितस्य संस्काराः , दीक्षणीयेष्टौ याज्यापुरोनुवाक्याविधानम् , अग्नेर्विष्णोश्च प्रशंसा, स्विष्टकृद्यागे गायत्र्यादिसप्तछन्दसां प्रयोगः , दीक्षितस्य सत्यवदनविधानम् , प्रायणीयशब्दार्थनिर्णयः, दिग्देवतानुसारेण विधीयमानयागविधिः, पथ्यादीनां पञ्चदेवतानां याज्यानुवाक्यप्रयोगः , उदयनीयेष्टौ याज्यानुवाक्यानां व्यत्यासविधिः,सोमक्रयस्य दिङ्निरूपणम्,मन्त्रादिपाठविधिः,सोमस्य शकटादवरोहणविधिः ,आतिथ्येष्टेर्विधानम् कालनिर्णयश्च, आतिथ्येष्टौ याज्यानुवाक्याविधानम्,इडाभक्षणस्य द्वैविध्यवर्णनम् , प्रवर्ग्यस्याभिष्टवसंबद्धामृचां विधानम्, होमादूर्ध्वं होत्रा पठनीयानां सप्तर्चां विधिः , प्रवर्ग्यस्य हविः शेषभक्षणे होतुः प्रतीक्षा, उपसत्सु पूर्वापराह्णयो : सामिधेनीनां याज्यापुरोनुवाक्यानाञ्च विधानम्, अग्निप्रणयनीयानामृचां प्रदर्शनम् ।

### द्वितीयायां पञ्चिकायाम्

यूपविधानं निखननविधिश्च, यूपाञ्जनानुवचनीयानां सप्तानामृचां विधानम्, प्रयाजदेवतापरिगणनम् याज्याद्वयविधिश्च, पशुपुरोडाशस्य विधानम्,पशुपुरोडाशयागस्य प्रशंसनपूर्वक- याज्याया विधानम्, पर्यग्निकरणविधिः,प्रातरनुवाकार्थः, प्रातरनुवाकीया ऋचः, देवसम्बन्धविशदनम्, कालविशेषविधिः, सहस्रसङ्ख्याविधिः, प्रातरनुवाकस्यानुवचनप्रकारनिर्णयः, प्रयाजानुयाजोपयाजसंबद्धदेवतानां सङ्ख्यानिर्देशश्चेति ।

### (ख) प्रकरणे

सायणाचार्यकृतभाष्यसहितस्य ऐतरेयब्राह्मणस्य द्वितीयतृतीययोः पञ्चिकयोर्गतानां प्रमुखविषयाणामध्ययनम् -

**द्वितीयपञ्चिकायाम्**

अपोनप्त्रीयानुवचनविधिः , बहिष्पवमानार्थं प्रसर्पणविधानम्, सवनीयपुरोडाशानां याज्यामन्त्राणां व्यायानम् ,तूष्णीशंसस्य आहाव -निवित् -सूक्तानां प्रयोगः,आज्यनामनिर्वचनम्,आज्यशस्त्राज्यस्तोत्रयोस्तुल्यत्वबोधनम्, यज्ञस्य देवरथत्वेन वर्णनम्, स्तोत्रशस्त्रयोः सर्वथातुल्यताया विधानम्, होतृजपस्य विधानम्, पुरोरुचः शंसनविधिः,आज्यशस्त्रस्य याज्याया विधानम् ।

**तृतीयपञ्चिकायाम् तृतीयाध्यायान्तविषयाः**

प्रउगशस्त्रनिरूपणारम्भः ,प्रउगशस्त्रे तृचविधानम् , प्र उगशस्त्रस्य तद्वदनस्य च प्रशंसनम् ,स्तोत्रशस्त्रयोः देवताविषयकः प्रश्नः तत्समाधानश्च, शस्त्रयाज्यान्ते पठनीयस्य वषट् कारस्य विधिः, वषट् कारस्य स्वरूपनिर्णय :, वषट् कारस्य पाठकाले होतुर्ध्यानविधिः, निवित्पदानां सवनत्रये प्रयोगः, प्रातस्सवने आहावप्रतिगरयोः प्रयोगः, माध्यन्दिनसवने आहावप्रतिगरयोः प्रयोगः, तृतीयसवने आहावप्रतिगरयोः प्रयोगः, मरुत्वतीयशस्त्रस्य वर्णनम्, प्रतिपदनुचरयोः स्वरूपम्, मरुत्वतीयशस्त्रस्य ब्राह्मणस्पत्यप्रगाथविधिः,स्तोत्रशस्त्रयोः वैलक्षण्याशङ्का ,तन्निरासश्च, निविद्धानीयशब्दव्युत्पत्तिः, मरुत्वतीयशस्त्रे याज्यायाः प्रयोगः प्रशंसा च, निष्केवल्यशस्त्रे धाय्यायाः विधानम्, याज्यापाठे विशेषविधिः, निष्केवल्यशस्त्रे प्रगाथस्य शंसनविधिः, सवनत्रयस्योत्पत्तिकथनम् , आदित्यग्रहस्य विधिः, आर्भवसूक्तस्य विधानम्, वैश्वदेवसूक्तस्य शंसनप्रयोगविधिः, आग्निमारुतशस्त्रप्रसङ्गः, रुद्रप्राजापत्योर्वृत्तान्तवर्णनम्, आदित्यादिदेवतोत्पत्तिवर्णनम्, भृग्वादीनां ऋषीणामुत्पत्तिवर्णनम्, वैश्वानरीयसूक्तेनारम्भविधिः, जातवेदस्य सूक्तस्य शंसनविधिः, परिधानीयायाः विधिः व्याख्यानञ्च, अग्निष्टोमादर्वाचीनानां यज्ञानामग्निष्टोमप्राप्तिः ।

**(ग) प्रकरणे तृतीयचतुर्थपञ्चमपञ्चिकागतानाम् उक्थ्यक्रतोरारभ्य दक्षिणाग्रहणे विचारपर्यन्तानां विषयाणामध्ययनम्**

उक्थ्यक्रतोरग्निष्टोमप्रवेशप्रदर्शनाय उक्थ्यक्रतुर्वर्णनम् , षोडशिचमसानां तत्पर्यायाणाञ्च वर्णनम्, अग्निष्टोमस्य आद्यन्ततुल्यत्वे विचारः, दीक्षणीयादि -इष्टिषु होतुरनुवचनस्य मन्द्रस्वरविधिः, ब्राह्मणानामेवार्त्विज्यविधानम्, भरद्वाजस्य ऋषेः स्वरूपवर्णनम् ,उक्थ्यशस्त्रेषु मैत्रावरुण -ब्राह्मणाच्छंसि - अच्छावाकानां शस्त्रशंसनविधिः ,षोडशिशस्त्रस्य वज्रस्वरूपत्वेन प्रशंसा, षोडशीतिनाम्नो निदानकथनम्, रात्रि पर्यायेषु होतुः शस्त्राणि,

आश्विनशस्त्रस्य शंसनस्येतिकर्तव्यता, आश्विनशस्त्रस्य प्रशंसा , ब्राह्मणीयस्य परिधानीयायाविधिः,गवामयननाम संवत्सरसत्रस्य विधानारम्भः, महाव्रते निष्केवल्यशस्त्रे विशेषविधिः, सत्रयागेषु मध्यवर्तिनो विषुवन्नामकस्याह्नो विधानम् , दूरोहरणनामकस्य सूक्तस्य शंसनविधिः तत्प्रशंसा च, सूक्तशंसन आरोहावरोहयोः स्थितिः, द्वादशाहयागस्य अहः क्लृप्तिप्रदर्शनम् ।

**पञ्चमपञ्चिकायाः**

न्यूङ्खस्य विधानम् , आश्वलायनेन प्रोक्तं न्यूङ्खस्वरूपम् ,न्यूङ्खस्य स्थानविशेषविधानम् , विमदेन महर्षिणा दृष्टं न्यूङ्खसहितं सूक्तविधानम् , षडस्याह्नो देवक्षेत्रस्य वर्णनम्, अग्निहोत्रयागस्य विधयः, अग्निहोत्रस्य सायङ्कालीनं यजमानकर्तव्यम्, प्रातः कालीनं यजमानकर्तव्यम्, अग्निहोतृणा विधीयमानं प्रायश्चित्तविधानम्, अग्निहोत्रसिद्धये क्षीरद्रव्याभावे श्रद्धाहोमस्य विधानम्, अनुदितहोमनिन्दार्थं यज्ञगाथा, प्रश्नोत्तराभ्यां ब्रह्मण आर्त्विज्यनिरूपणम्, ब्रह्मणः मनसा वैकल्यराहित्यानुसन्धानविधिः वाग्व्यवहारे बाधप्रदर्शनम्, दक्षिणाग्रहणे विचारश्चेति विषयाः ।

**(घ ) प्रकरणे -आख्यायिकानामवबोधनम्**

आख्यायिकामुखेन प्रवर्ग्यस्य सम्पादनम्

उपसद्दिष्टेराख्यायिका , अग्निषोमीयपशुविधानसंबद्धा आख्यायिका, तूष्णीशंसविधानार्था आख्यायिका, आख्यायिकामुखेन निष्केवल्यशस्त्रस्य चर्चा, अतिरात्रक्रतुविधानार्था आख्यायिका, गवामयनसंबद्धा आख्यायिका, आख्यायिकामुखेनोदितानुदितहोमयोः प्रशंसा निन्दा च, प्रणवोत्पत्तिविषये आख्यायिका ।

**(ङ ) प्रकरणे श्रौतशब्दार्थनिर्वचनम्**

इष्टि -आहूति-ऊतिहोतृशब्दानां निर्वचनम्, प्रायणीयशब्दार्थनिर्णयः ,पुरोडाशशब्दनिर्वचनम् , आज्यनामनिर्वचनम्, प्रैष -पुरोरुक् -वेदि -ग्रह -निविच्छब्दानां निर्वचनम्,त्रशब्दनिर्वचनम्, निविद्धानीयशब्दव्युत्पत्तिः,मानुषनामनिर्वचनम्,अग्निष्टोमचतुष्टोमज्योतिष्टोमनाम्नां निर्वचनानि, चतुर्विंशनामनिर्वचनम्, स्वरसामनिर्वचनम्, महानाम्नीशब्दनिर्वचनञ्चेति ।

**(च) प्रकरणे अग्निष्टोमपद्धतेः सहौत्रविधीनामवबोधनम्**

अग्निष्टोमपद्धतौ विधेयानां निम्नाङ्कितानां सौमिकानां कृत्यानामवगमः -

-यजमानस्य स्नानादिदीक्षा, कृष्णाजिनादिदीक्षा, यजमानस्य पावनानि कृत्यानि, सोमक्रयणार्थं गच्छन्तं यजमानं प्रतिमन्त्रवाचनम् प्रचरणीहोमश्चेति।

अग्निष्टोमपद्धतौ होत्रा विधेयानां निम्नाङ्कितानां सौमिकानां कृत्यानामवबोधनम् -

यूपाञ्जनम् , सामिधेन्यनुवचनम् होत्रा पठ्यमानप्रातरनुवाकस्य प्रयोगः ,होत्रा पठितव्ययोः आज्यप्रउगशस्त्रयोः प्रयोगः ,होतृसंबद्धमाध्यन्दिनसवने पाठ्यमाने मरुत्वतीयनिष्केवल्यशस्त्रयोःशंसनप्रयोगः, होत्रा पठितव्ये तृतीयसवने आग्निमारुतवैश्वदेवशस्त्रयोः , प्रयोगश्च, अग्निमन्थनम्, पशुनियोजनादिकम्, एकादशप्रयाजयागः, वसतीवरीग्रहणम् ,पशुपुरोडाशनिर्वापादि, ऐन्द्राग्नः प्रधानयागः, अनुयाजयागः, पत्नीसंयाजा, सुत्यायाः पूर्वदिनकृत्यम् प्रातरनुवाकश्चेति ।

## ५ . शिक्षणविधयः शैक्षिकसामग्री च

निगमागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनायाः प्राक्कल्पनादयश्छात्रकेन्द्रिता विधयो ऽपि प्रयोक्तुं शक्यन्ते ।यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः ।विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः ।तद् व्यवस्था संबद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया ।साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते।तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते। शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

## ६ . मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति - आन्तरिकं निर्माणात्मकं, बाह्यं निर्णयात्मकञ्च।आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति ।कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरिकं मूल्याङ्कनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति। आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशतमङ्काः निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति।प्रश्नपत्रे बाह्यपरीक्षाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणाङ्कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां ने . सं. वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकाराः निर्धारिता : सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् अन्तर्वार्तादिनापि सिद्ध्यति ।

**वार्षिकपरीक्षा प्रश्नपत्रनिर्माण -सारणी**

| प्रकरणानि क,ख,ग,घ,ङ | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २X१२= २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६X ७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३X ८= २४ |
| | वस्तुगताः | १० | १० | १०X१= १० |
| | | २६ | २१ | १०० |

**पाठ्यग्रन्थाः**

१-ऋग्वेदीयम् ऐतरेयब्राह्मणम्सायणभाष्यसहितम् ( १-५ पञ्चिकायाः निर्दिष्टांशाः)

श्रीमत्सायणाचार्यकृत -वेदार्थप्रकाश नामभाष्येणसहितम् सम्पादकोनुवादकश्च डा सुधाकरमालवीय, प्रकाशकः ताराबुक , एजेन्सी, द्वितीय संस्करण सन् १९९६

२- अग्निष्टोमपद्धतिः वामनाचार्य नानाभाई रघुनाथद्विवेदि, चौखम्बा, संस्कृत सिरीज सन् १९३४ वाराणसी ।

**सहायकग्रन्थाः**

१ - ऐतरेयब्राह्मणम् सम्पा हरिनारायण आप्टे आनन्दाश्रम सं ग्रन्थावली पूना सन् १९३०-३१

२- श्रौतपदार्थनिर्वचनम्, विश्वनाथ शास्त्री, एफ जे, प्रभुदत्त अग्निहोत्री, लाजरस एन्ड कं वाराणसी सन् १९१९ ।

३ -कात्यायनश्रौतसूत्रम् -कर्कभाष्यसहितम् (द्वितीयोभागः षष्ठाध्यायतस्समाप्त्यन्तः) सम्पा डु आचार्य पट्टाभिरामशास्त्री, प्रका श्री लालबहादुर शास्त्री केन्द्रीयसंस्कृतविद्यापीठम्, नूतनदिल्ली -१६ सन् १९८२-१९८३

४- यज्ञतत्वप्रकाशः चिन्नस्वामी शास्त्री, मद्रास, सन् १९५३

**सन्दर्भग्रन्थाः-**

१- शाङ्खायनब्राह्मण संङ्ग हरिनारायण भट्टाचार्य, गवर्नमेन्ट संस्कृतकलेज कलकत्ता सन् १९७०

२ - कौषीतकिब्राह्मणम् सम्पा. ई. आर श्रीकृष्णशर्मा सन् १९६८

# ऋग्वेदः

**पाठ्यांशनाम** – स्वरवैदिकी प्रक्रिया, वैदिकशब्दकोषः शब्दनिर्वचनादिकञ्च

**स्तरः**–शास्त्री

**बर्षः–** द्वितीयः

**पत्रम्**- चतुर्थम्

**पाठ्यांशसंकेतः** - ऋ.वे.४०२

**पूर्णाङ्का ः**–१००

**वार्षिकः पाठ्यभारः**–१६० पा.घ.

**साप्ताहिकः पाठ्यभारः** –६

**१ पाठ्यांशपरिचयः**

अयं पाठ्यक्रमो मूलतः सिद्धान्तकौमुद्या : स्वरवैदिकीप्रक्रिया, निघण्टुशब्दकोषः, यास्कीयनिरुक्तञ्चाधृत्य निर्मितो वर्तते । षट्सु प्रकरणेषु विभक्तेऽस्मिन् पाठ्यांशे वेदस्यार्थपरिज्ञानविषयस्य निरुक्तस्यादितः तृतीयाध्यायान्ताः वैदिकशब्दनिर्वचनसंबद्धाः, निघण्टुशब्दकोषस्यादितः तृतीयाध्यायान्ताः निर्धारितशब्दाः, सिद्धान्तकौमुद्याः स्वरवैदिकप्रक्रियायाः निर्धारितसूत्राणां सविशेषकार्यबोधकविषयाश्च पाठ्यविषयत्वेन निर्धारिताः सन्ति ।

तत्र **क** प्रकरणे - सिद्धान्तकौमुद्याः वैदिकप्रकरणगतानां सुनियतानां सूत्राणां सोदाहरणमर्थज्ञानपूर्वकं सविशेषकार्यावबोधनञ्च

**ख** प्रकरणे सिद्धान्तकौमुद्याः स्वरप्रकरणगतानां निर्धारितसूत्राणां सोदाहरणमर्थज्ञानं सविशेषकार्यावगमश्च

**ग** प्रकरणे निरुक्तपरिचयादिकम् यास्कीयनिरुक्तस्य प्रथमाध्यायगतविषयानाञ्च परिज्ञानम्

**घ** प्रकरणे निरुक्तस्य द्वितीयाध्यायस्य वैदिकशब्दनिर्वचनादिज्ञानम्

**ङ** प्रकरणे निरुक्तस्य तृतीयाध्यायस्य वैदिकशब्दनिर्वचनादिज्ञानम्

**च** प्रकरणे निघण्टुनामधेयस्य वैदिकशब्दकोषस्य गौरादिद्यावापृथिवीत्यन्तानां निर्धारितशब्दानां प्रत्येकं दशनाम्ना मध्ययनम् ।

## २ पाठ्यांशस्य सामान्योद्देश्यम्

अस्य पाठ्यांशस्याध्ययनेन विद्यार्थिन : निम्नाङ्कितविषयेषु प्रावीण्यमेष्यन्ति -

- वैदिकशब्दानां लिङ्गवचनविभक्तिव्यत्ययज्ञाने, शब्दानां लोपागमवर्णविकारप्रकृतिभावादिज्ञाने, लेट्लकारस्य प्रयोगज्ञाने, वैदिकशब्दानां विशिष्टस्वरूपावबोधे ;
- धातुप्रत्ययसमासप्रातिपदिकादिस्वरनियमपरिज्ञाने ;
- निरुक्तशास्त्रस्य शास्त्रकारस्य च परिचयावबोधे, शब्दनिर्वचनादिविषयाणावबोधे;
- वैदिकशब्दकोशावबोधे च

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यांशविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| **क** | वैदिकशब्दानां | सिद्धान्तकौमुद्याः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | लिङ्गवचनविभक्तिव्यत्ययज्ञानम् ,शब्दानां लोपागमवर्णविकारप्रकृतिभावादिज्ञानम् , लेट्लकारस्य प्रयोगज्ञानम् , वैदिकशब्दानां विशिष्टस्वरूपावबोधनञ्च । | वैदिकप्रकरणगतविषयाः | | |
| **ख** | सिद्धान्तकौमुद्याः स्वरप्रक्रियायाः धातुप्रत्ययसमासप्रातिपदिकादिस्वरनियमाववबोधनम् | सिद्धान्तकौमुद्याः स्वरप्रक्रियाः | २० | ३२ |
| **ग** | निरुक्तशास्त्रस्य शास्त्रकारस्य च परिचयपूर्वकं निघण्टुपदव्युत्पत्तिश्शब्दनित्यत्वानित्यत्वपदभेदभावविकार - धातुजसिद्धान्तमन्त्राणामर्थवत्व - निरुक्तप्रयोजनमहत्व - ज्ञानप्रशंसानिन्दा चेत्यन्तानां समेषां प्रथमाध्यायगतानां विषयावबोधनम् | निरुक्तशास्त्रस्यप्रथमाध्यायगताः विषयाः | २० | ३२ |
| **घ** | यास्कोक्तशब्दनिर्वचनसिद्धान्त-ग्राह्यशिष्यनिरूपणादिद्वितियाध्यायगतानां | निरुक्तशास्त्रस्य द्वितीयाध्यायगताःविषयाः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | निर्धारितशब्दनिर्वचनादि परिज्ञानम् | | | |
| **ङ** | निरुक्तस्य तृतीयाध्यायगतानां कर्मापत्यादि शब्दनिर्वचनावबोध नम् | निरुक्तशास्त्रस्य तृतीयाध्यायगताः विषयाः | १० | १६ |
| **च** | निघण्टोः निर्धारितशब्दकोषावगमश्च | निघण्टुशब्दकोषः | १० | १६ |
| | | योगः | १०० | १६० |

## ४पाठ्यवस्तुविवरणम्

### (क) प्रकरणे

वैदिकप्रक्रिया

सिद्धान्तकौमुद्या वैदिकप्रकरणगतानि निम्नाङ्कितानि सूत्राणि तेषां सविशेषकार्यमुदाहरणानि च

-छन्दसि पुनर्वस्वोरेकवचनम् १/२/६१, षष्ठीयुक्तश्छन्दसि वा १/४/९, अयस्मयादीनिच्छन्दसि १/४/२०, छन्दसि परेऽपि १/४/८० ,व्यवहिताश्च १/४/८२, तृतीया च होश्छन्दसि २/३/३, चतुर्थ्यर्थे बहुलं छन्दसि २/३/६२ बहुलं छन्दसि २/४/३९, मन्त्रेघसह्वरणशवृदहाद् वृज् कृगमिजनिभ्यो लेः २/४/८०,छन्दसिनिष्टर्क्य .३/१/१२३, छन्दसि वनसनरक्षिमथाम् ३/२/२७, जनसनखनक्रमगमो विट् ३/२/६७ ,मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ३/२/७१, आतो मनिन्क्वनिब्वनिपश्च ३/२/७४ ,छन्दसि लिट् ३/२/१०५, लिटः कानज्वा, ३/२/१०६, णेश्छन्दसि, ३/२/१३७, भुवश्च ३/२/१३८, क्याच्छन्दसि ३/२/१७०, अन्येभ्योऽपि दृश्यते ३/३/१३०, छन्दसि लुङ्लङ्लिटः ३/४/६, लिङर्थे लेट् ३/४/७, सिप्बहुलं लेटि ३/४/३४, लेटो ऽडाटौ ३/४/९४, इतश्च लोपः परस्मैपदेषु ३/४/९७, स उत्तमस्य ३/४/९८, आत ऐ ३/४/९५, छन्दसि शायजपि ३/१/८४ ,हृग्रहोर्भश्छन्दसि (वा) व्यत्ययो बहुलम् ३/१/८५, सुप्तिङुपग्रह., छन्दस्युभयथा ३/४/११७, तुमर्थे सेसेनसे असेन् ... तवेनः ३/४/९, ईश्वरे तोसुन्कसुनौ ३/४/१३, कृत्यार्थे तवैकेन्केन्यत्वनः ३/४/१४, सृपितृदोः कसुन् ३/४/१७, रात्रेश्चाजसौ ४/१/३१,

मुद्गलाच्छन्दसि लिच्च (वा..)दीर्घजिह्वी च छन्दसि ४/१/५९ ,कद्रुकमण्डल्वोश्छन्दसि ४/१/७१/ ,छन्दसि ठञ् ४/३/१९ ,हेमन्ताच्च ४/३/२१ ,शौनकादिभ्यश्छन्दसि ४/३/१०६, भवे छन्दसि ४/४/११०,असुरस्य स्वम् ४/४/१२३, मत्वर्थे मासतन्वोः ४/४/१२८, मधोर्ञ च ४/४/१२९, अद्भिः संस्कृतम् ४/४/१३४, सहस्रेण सम्मितौ घः ४/४ /१३५ ,मतौ च ४/४/१३६ सर्वदेवात्तातिल् ४/४/१४२ ,छन्दसि च ५/१/६७, प्रत्नपूर्वविश्वेमात्थाल् छन्दसि, ५/३/१११, यजुष्युरः ६/१/११७, पितरामातरा च छन्दसि ६/३/३३, ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणाम् ६/३/१३३, अन्येषामपि दृश्यते ६/३/१३७, मन्त्रेष्वाङ्यादेरात्मनः ६/४/१४१, सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः ७/१/३९, इयाडियाजीकाराणामुपसङ्ख्यानम् (वा.) तप्तनप्तनथनाश्च ७/१/४५, ओमभ्यादाने ८/२/८७, प्रणवष्टेः ८/२ /८९

**(ख) प्रकरणे**

स्वरप्रक्रिया

सिद्धान्तकौमुद्याः स्वरप्रक्रियायां निम्नाङ्कितसूत्राणां सोदाहरणानि विशेषकार्याणि -

अनुदात्तं पदमेकवर्जम् ६/१/१५८ ,अनुदात्तस्य च यत्रोदात्तलोपः ,६/१/१६१ आमन्त्रितस्य च ,६/१/१९८ सुवा मन्त्रिते पराङ्गवत्स्वरे २/१/२, उदात्तस्वरितयोर्यणः स्वरितो ऽनुदात्तस्य, ८/२/४, स्वरितो वा ऽनुदात्ते पदादौ ८/२/६, उदात्तादनुदात्तस्य स्वरितः८/४/६६ ,एकश्रुतिदूरात्संबुद्धौ १/२/३३, यज्ञकर्मन्यजपन्यूङ्खसामसु १/२/३४, उच्चैस्तरां वा वषट् कारः १/२/३५, देवब्रह्मणोरनुदात्तः १/२/३८, स्वरितात्संहितायामनुदात्तानाम् १/२/३९ ,उदात्तस्वरितपरस्य सन्नतरः १/२/४०, धातोः ६/१/१६२, अभ्यस्तानामादिः ६/१/१८९/ अनुदात्ते च ६/१/१९०, चङ्यन्यतरस्याम् ६/१/२१८, चतुरः शसि, ६/१ /१६७, झल्युपोत्तमम् ६/१/१८०, सर्वस्य सुपि ६/१/१९१, पथिमथोः सर्वनामस्थाने ६/१/१९९ युष्मदस्मदोर्ङसि ६/ १/२११ ,ङयि च ६/१/२१२ , अन्तो ऽवत्याः ६/१/२२० , ईवत्याः ६/१/२२१ , फिषो ऽन्त उदात्तः ( फि . सू . १ ) , पाटलापालङ्काम्बासागरार्थानाम् ( फि . सू . २), ध्यपूर्वस्य स्त्रीविषयस्य (फि. सू. ५) , खान्तस्याश्मादेः (फि. सू. ६ ),दक्षिणस्य साधौ ( फि .सू. ८),स्वाङ्गाख्यायामादिर्वा (फि.सू ९ ) , घृतादीनाञ्च (फि . सू. २१ ) , ज्येष्ठकनिष्ठयोर्वयसि (फि . सू. २२) ,स्वाङ्गशिटामदन्तानाम् (फि .सू. २९) ,ग्रामादीनाञ्च ( फि. सू . ३८), त्र्यचां प्राङ्मकारात् ( फि. सू . ५१) , स्वाङ्गानामकुर्वादीनाम् ( फि .सू .५२), पान्तानां गुर्वादीनाम् (फि .सू .५५) युतान्यण्यन्तानाम् (फि . सू . ५६),त्वत्वसमसीमेत्यनुच्चानि ( फि . सू .७८ ), निपाता आद्युदात्ताः (फि . सू .७८) ,

प्रकारादि द्विरुक्तौ परस्यान्त उदात्तः ( फि . सू . ८६ ) , शेषं सर्वमनुदात्तम् ( फि . सू . ८७ ) , आद्युदात्तश्च ३/१/३ , अनुदात्तौ सुप्पितौ ३/१/४ , चितः ६/१/१६३ , तद्धितस्य ६/१/१६४ , कितः ६/१/१६५ , उदात्तयणो हल्पूर्वात् ६/१ /१७४ , ङ्याश्छन्दसि बहुलम् ६/१/७८ , तित्स्वरितम् ६/१/१८५ , द्विगौ प्रमाणे ६/१/१२ , स्वं स्वामिनि ६/२/१७ , पूर्वे भूतपूर्वे ६/२/२२ ,सङ्ख्या ६/२/३५ , गौ : सादसादिसारथिषु ६/२/४१ , अहीने द्वितीया ६/२/४७ , तृतीया कर्मणि ६/२/४८ , कतरकतमौ कर्मधारये ६/२/५७ , राजा च प्रशंसायाम् ६/२/६३ , आदिरुदात्तः ६/२/६४ , गोबिडालसिंहसैन्धवेषूपमाने ६/२/७२ , देवताद्वन्द्वे च ६/२/१४१ , कृत्योकेष्णुच्चार्वादयश्च ६/२/१६० द्वितृभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ६/२ १९७, तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्योः८/१ /२७ , तिङि चोदात्तवति ८/१/७१ इति ।

## (ग) प्रकरणे

निरुक्तस्य, निरुक्तग्रन्थकर्तुश्च परिचयः, निरुक्तस्य प्रथमाध्यायगतविषयाः, तेषां परिज्ञानावबोधनञ्च -

१.निरुक्तस्य परिचयः, २.यास्काचार्यस्य परिचयः, ३. निरुक्तव्याकरणशास्त्रयोः पार्थक्यम्, ४.निघण्टुसमाख्याधिकरणम् , ५. पदचतुष्टयोद्देशकथनम् , ६.नामाख्यातलक्षणाधिकरणम् , ७. भाववाचकप्रदर्शनम्, ८. सत्वोपदेशः, ९. भावोपदेशः, १०. शब्दानित्यत्वमौदुम्बरायणमतम्, ११ .शब्दानित्यत्वखण्डनम्, १२. लोकव्यवहारार्थं शब्दस्यावश्यकता, १३. कर्मणि वेदमन्त्रस्यावश्यकता, १४ . भावविकारनिरूपणम्, १५. उपसर्गनिरूपणम्, १६. उपसर्गविषये शाकटायनमतम्, १७.तत्र गार्ग्यमतम्, १८.निपातलक्षणनिरूपणम्, १९. निपातानां त्रैविध्यम्, २०. आचार्यशब्दनिर्वचनम्, २१. 'त्व' शब्दविषये आचार्याणां मतभेदाः, २२. नाम्नामाख्यातजत्वम्, २३. नाम्नामाख्यातजत्वखण्डनम्, २४. यास्केन धातुजसिद्धान्तप्रतिपादनम्, २५. निरुक्तप्रयोजनम्, २६. कौत्समतेन मन्त्राणामानर्थक्यहेतुनिरूपणम्, २७. मन्त्राणामर्थवत्वसाधनम्, २८. निरुक्तशास्त्रस्यावश्यकता, २९. संहितालक्षणम्, ३०. ज्ञानप्रशंसा अज्ञाननिन्दा च, ३१. निरुक्तशास्त्रस्य प्राधान्यम्, ३२. निरुक्तस्य काण्डत्रयेषु विभागः इति ।

## (घ) प्रकरणे

यास्कीयनिर्वचनसिद्धान्त - ग्राह्यशिष्यनिरूपणादि द्वितीयाध्यायगतानां वैदिकशब्दानां निर्वचनम्

१. यास्कोक्तनिर्वचननियमाः/सिद्धान्ताः, २. देशप्रसिद्ध्या शब्दरूढिनिर्णयः, ३ तद्धितसमासनिर्वचनम्, ४. वर्ज्यशिष्यनिरूपणम्, ५. ग्राह्यशिष्यनिरूपणम्, ६. देवापिशन्तन्वोरितिहासः, ७. साधारणानां षण्णां नाम्नां निर्वचनम्, ८. नदीशब्दनिर्वचने इतिहासः, विश्वामित्रस्य नदीनां च संवादः, ९. अधोङ्कितानां पदानां सोदाहरणं निर्वचनम् -

(क) गौः , (ख)हिरण्यम्,(ग)समुद्रः , (घ) रश्मिः (ङ) वृत्रः , (च ) रात्रिः , (छ ) उषाः , (ज )अहः , ( झ )मेघः , (ञ)वाक् , (ट) उदकम् , (ठ)अश्वः इति ।

**(ङ) प्रकरणे**

कर्मापत्यादिपदनिर्वचनम्

यास्कीयनिरुक्तस्य तृतीये ऽध्याये वक्ष्यमाणविषयानामध्ययनम् -

१ कर्मापत्यनिर्वचनोदाहरणे, २. दायविभागचर्चा, ३. उपमाभेदसंबद्धानि लक्षणोदाहरणानि, ४. अधोनिर्दिष्टपदानां सोदाहरणं निर्वचनम् -

( क) गर्तः , (ख) मनुष्यः , (ग) पञ्चजनः , (घ) बाहुः , (बलम्), (ङ) धनम्, (च) क्षिप्रम् , (छ) सङ्ग्रामः , (ज) एकद्वयादिसङ्ख्या : , (झ ) बहु, (ञ ) ह्रस्वः , (च ) महान् , (च) गृहम् , (छ) सुखम्, (ज) रूपम् , (झ) सत्यम्, (ञ) देवरः, (ट) सिंहः, (ठ) मेधावी, (ड) यज्ञः, (ढ) ऋत्विक्, (ण) दूरम्, (त) पुराणम्, (थ) नवम् इति ।

**(च) प्रकरणे**

वैदिकशब्दकोष :

१ गौः, २. हिरण्यम्, ३. अन्तरिक्षम्, ४. रश्मिः, ५. दिक्, ६. रात्रिः, ७. उषाः, ८. अहः, ९. मेघः, १०. वाक्, ११. उदकम्, १२. नदी, १३. अश्वः, १४. कर्म, १५. अपत्यम्, १६. मनुष्यः, १७. बाहुः, १८. अङ्गुलिः, १९. कान्तिः, २०. अन्नम्, २१. बलम्, २२. धनम्, २३ . क्रोधः , २४. क्षिप्रम्, २५. सङ्ग्रामः , २६. वज्रः, २७. बहुः, २८. गृहम्, २९. सुखम्, ३०. रूपम्, ३१. प्रज्ञा, ३२. मेधावी, ३३. यज्ञः, ३४ कूपः ३५. स्तेनः, ३६. द्यावापृथिवी, एतेषां यथासंभवं प्रत्येकं दशनाम्नामभिधानकोषाः ।

**५ . शिक्षणविधयः शैक्षिकसामग्री च**

निगमागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते ।सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनायाः प्राक्कल्पनादयश्छात्रकेन्द्रिता विधयो ऽपि प्रयोक्तुं शक्यन्ते ।यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः

प्रेरणीयाः ।विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः ।तद् व्यवस्था संबद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया ।साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते।तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते। शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

## ६ . मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति - आन्तरिकं निर्माणात्मकं, बाह्यं निर्णयात्मकञ्च।आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरिकं मूल्याङ्कनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशतमङ्काः निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणाङ्कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां ने. सं. वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकाराः निर्धारिता : सन्ति ।साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् अन्तर्वार्तादिनापि सिद्ध्यति ।

**वार्षिकपरीक्षा प्रश्नपत्रनिर्माण -सारणी**

| प्रकरणानि क,ख,ग,घ,ङ | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २X१२ = २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६X७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३X ८ = २४ |
| | वस्तुगताः | १० | १० | १०X१= १० |
| | | २६ | २१ | १०० |

**पाठ्यग्रन्थाः**

१ सिद्धान्तकौमुदी, स्वरवैदिकप्र क्रि योपेता, भट्टोजिदीक्षितप्रणीता ।

२ यास्कीयं निरुक्तम् १-३ अध्यायान्तम् ।

३ निघण्टुः १-३ अध्यायान्तः ।

**सहायकग्रन्थाः**


१ सिद्धान्तकौमुदी, बालमनोरमाटीकया तत्वबोधिन्या च समेता मोतीलाल बनारसीदास, दिल्ली १९९७ सन् ।

२ सिद्धान्तकौमुदी तत्वबोधिनीटीकया सहिता, मेहरचन्द लछमनदास, नई दिल्ली, १९८५ सन् ।

३ यास्कीयं निरुक्तम् व्याख्याकारः, पं. छज्जूराम -देवशर्मा -गभीरथ शास्त्री, प्रका. मेहरचन्द लछमनदास पब्लिकेसन, दरियागञ्ज, नई दिल्ली, तृतीयसं १९९३ सन् ।

४ हिन्दी निरुक्त डा. उमाशङ्कर शर्मा ऋषि : चौखम्भा सुरभारतीप्रकाशन वाराणसी : १९७७ सन् ।

# ऋग्वेदः

**पाठ्यांशनाम** – स्वरवैदिकीप्रक्रिया, वैदिकशब्दकोषः शब्दनिर्वचनादिकञ्च

**स्तर** - शास्त्री | **पाठ्यांशसङ्केत**- ऋ.वे.४०२

**वर्षः** - द्वितीय | **पूर्णाङ्क**- १००

**पत्र** - चतुर्थम् | **वार्षिक पाठ्यभार**- १६० घण्टा

**साप्ताहिक पाठ्यभार**- ६

(क) परीक्षार्थिभिः प्रश्नोत्तरं यथासंभवं स्वकीयैः शब्दैः लेखनीयम् ।

(ख) दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ।

## ( खण्ड क )

## अतिसंक्षिप्तोत्तराणि प्रश्नानि

१ भवाति इत्यत्र आडागमः केन सूत्रेण भवति ?

२ निरुक्तं कतिविधम् ?

३ पदभेदानां नामानि कानि ?

४ त्व इत्येतस्य सर्वनाम्नः प्रयोगः कः ?

५ कारिकां पूरयतउपसर्गेण धात्वर्थो ...

६ सुप्तिङुपलिङ्गनराणामिति कारिका स्वरप्रक्रियायाम् उत वैदिकप्रक्रियायाम् वर्तते?

७ शब्दं पूरयतहृदयरमणं भवतीति वा ... ।

८ सूत्रं पूरयतसुपां सुलुक् पूर्वसवर्णा...

९ सूत्रं लिखतत्मना इत्यत्र आत्मना कथं भवति?

१० सूत्रं पूरयतमन्त्रे घसह्वरणश

---

खण्ड (ख)

केचन त्रयैव प्रश्नाः समाधेयाः ५X ३=१५

१ निम्नाङ्कितसूत्राणां सविशेषकार्यमुदाहरणानि च देयानि ।

छन्दसि पुनर्वस्वोरेकवचनम् । हृग्रहोर्भश्छन्दसि ।मन्त्रेश्वेतवहोक्थसस्पुरोडाशो ण्विन् । प्रत्नपूर्वविश्वेमात्थाल्छन्दसि ।

२ निम्नाङ्कितानां सूत्राणां सविशेषकार्यमुदाहरणानि च देयानि

अनुदात्तं पदमेकवर्जम् ।यज्ञकर्मन्यजपन्यूङ्खसामसु ।उदात्तस्वरितयोर्यणः स्वरितो ऽनुदात्तस्य । अनुदात्तौ सुप्पितौ ।

३ गौः, हिरण्यम्, उषाः, वाक् इत्येतेषां पञ्च पञ्च नामान्युल्लिखत ।

४ आचार्यः , पुरुषः वृत्रः, रात्रिः, इत्येतेषां शब्दानां निर्वचनं कुरुत ।

(खण्ड ग )

सर्वे प्रश्नाः समाधेयाः । ६X४ =२४

१ मेघः, उदकम्, पुराणम्, यज्ञः, दूरम्, सिंहः इत्येषां पदानां निर्वचनं कुरुत ।

२ निघण्टुपदव्युत्पत्तिङ्कृत्वा उपसर्गलक्षणं देयम् ।

३ ग्राह्यशिष्यलक्षणं किम् ? ऋचां त्वः पोषमास्ते इति मन्त्रञ्च पूरयत ।

४ तुमर्थेसेसेनसे ... इति सूत्रं प्रपूर्य सोदाहरणमर्थञ्च देयम् ।

( खण्ड घ )

द्वावेव समाधेयौ । १३X २ =२६

१ निरुक्तोक्तदिशा मन्त्राणामर्थवत्वं साधयत ।

२ सुप्तिङुपग्रहेति कारिकां पूरयित्वा उदाहरणानि च देयानि ।

३ भावविकाराः के ? शब्दनित्यत्वञ्च साधयत ।

**(खण्ड ङ )**

(द्वावेव समाधेयौ । १५ X २ = ३०

१ वर्णागमो वर्णविपर्ययश्चेति कारिकां व्याख्याय निरुक्तसिद्धान्तञ्च प्रतिपादयत ।

२ निरुक्तस्य यास्काचार्यस्य च परिचयो देयः ।

३ निरुक्तप्रयोजनं किम् ? ज्ञानप्रशंसा अज्ञाननिन्दा च दर्शनीया ।

विशिष्टीकरणतालिका

| क.स | प्रश्नावल्याः | रूपरेखा : | प्रष्टव्याः | लेखनीयाः | पूर्णांकाः | विषयवस्तूनि |
|---|---|---|---|---|---|---|
| १ | ज्ञानक्षेत्रतः | अतिसंक्षिप्तो-त्तरात्मकम् | १० | १० | १० | सि.कौ .स्वरवैदिकप्रक्रिययोर्गतानां निरुक्तस्य प्रथमद्वितीयतृतीयाध्यायगतानां निघण्टुकोषगतानाञ्च अतिसंक्षिप्तोत्तरात्मकानि प्रश्नानि |
| २ | ज्ञानबोधक्षेत्रतः | संक्षिप्तोत्त-रात्मकम् | ४ | ३ | १५ | स.कौ .स्वरवैदिकप्रक्रिययोर्गतानां निरुक्तस्य प्रथमद्वितीयतृतीयाध्यायगतानां निघण्टुकोषगतानाञ्च संक्षिप्तोत्तरात्मकानि प्रश्नानि |
| ३ | ज्ञानबोधशिल्पोच्च दक्षताक्षेत्रतः | संक्षिप्तो | ४ | ४ | २४ | स.कौ .स्वरवैदिकप्रक्रिययोर्गतानां निरुक्तस्य प्रथमद्वितीयतृतीयाध्यायगतानां |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | निघण्टुकोषगतानाञ्च संक्षिप्तोत्तरात्मकानि प्रश्नानि |
| ४ | उच्चदक्षताक्षेत्रतः | रचनात्मकं निबन्धात्मकम् | ३ | २ | २६ | स.कौ .स्वरवैदिकप्रक्रिययोर्गतानां निरुक्तस्य प्रथमद्वितीयतृतीयाध्यायगतानां निघण्टुकोषगतानाञ्च निबन्धात्मकम्प्रश्नानि |
| ५ | उच्चदक्षताक्षेत्रतः | निबन्धात्मकम् | ३ | २ | ३० | स.कौ .स्वरवैदिकप्रक्रिययोर्गतानां निरुक्तस्य प्रथमद्वितीयतृतीयाध्यायगतानां निघण्टुकोषगतानाञ्च निबन्धात्मकम्प्रश्नानि |

# शुक्लयजुर्वेदः

पाठ्यांशनाम—**कल्पसूत्रम्** पाठ्यांशसङ्केतः— शु.वे. ४०१

स्तरः— शास्त्री पूर्णाङ्काः— १००

वर्षः- द्वितीयः वार्षिकः पाठ्यभारः—१६० घण्टाः

पत्रम्— तृतीयम् साप्ताहिकः पाठ्यभारः— ६

**१. पाठ्यांशपरिचयः**

शास्त्रिकक्षाया द्वितीये वर्षे शुक्लयजुर्वेदं पठितुं प्रविष्टानां छात्राणां कृतेऽयं पाठ्यांशो निर्धारितो वर्तते अयं पाठ्यांशः पञ्चसु प्रकरणेषु विभक्तोऽस्ति वेदस्य शुद्धोच्चारणस्य ज्ञानार्थं शिक्षानामकं प्रथमं वेदाङ्गं श्रौतयज्ञस्वरूपज्ञानार्थं कल्पशास्त्रान्तर्गतं श्रौतसूत्ररूपं द्वितीयं वेदाङ्गं च प्रथमवर्षस्य पाठ्यक्रमे निर्धारितमासीत् वेदमन्त्रार्थज्ञानार्थं वेदप्रयोगज्ञानार्थं चाऽऽवश्यकाः पाठ्यांशाश्च प्रथमे वर्ष एव निर्धारिता आसन् अधुना द्वितीये वर्षे एतस्मिन् पत्रे मुख्यतया कल्पसूत्रान्तर्गतस्य सम्पूर्णस्य पारस्करगृह्यसूत्रस्य तत्परिशिष्टानां च अधिकांशा विषयाः पाठ्यक्रमे निर्धारिताः सन्ति तथैव अन्ययोर्गृह्यसूत्रयोः कश्चन अंशः, गौतमधर्मसूत्रस्य कतिपये विषयाश्च पाठ्यत्वेन समाविष्टा वर्तन्ते अत्र पाठ्यक्रमे मुख्यतया सदाचारसम्बद्धाः, संस्कारसम्बद्धाः, श्राद्धसम्बद्धाश्च विषया निर्धारिताः सन्ति

वेदस्य मुख्यः प्रतिपाद्यो विषयः कर्मकाण्डमस्ति श्रौतकर्मकाण्डस्य विषयाः श्रौतसूत्रेषु प्रतिपादिताः सन्ति तथैव गृह्यकर्मकाण्डस्य विषया गृह्यसूत्रेषु प्रतिपादिताः सन्ति सदाचारस्य विषया धर्मसूत्रेषु निर्दिष्टा वर्तन्ते वेदाध्येतृभिरुक्तानां विषयाणामध्ययनं करणीयं भवति

पारस्करगृह्यसूत्रे तत्परिशिष्टेषु च प्रतिपादितानां सदाचाराणाम्, संस्काराणाम्, पाकयज्ञानाम्, श्राद्धानां च ज्ञानं प्राचीनभाष्याधारेण करणीयमिति हेतोः पारस्करगृह्यसूत्रस्य त्रयाणामेव काण्डानां प्रमुखा विषयाः तत्परिशिष्टानां वापीकूप-तडागा-ऽऽरामप्रतिष्ठा-स्नानसूत्र-श्राद्धसूत्र-भोजनसूत्राणां च महत्त्वपूर्णा विषया अत्र पाठ्यांशत्वेन निर्धारिताः सन्ति धर्मसूत्रस्य विषयशैल्यवबोधाय सदाचारज्ञानाय च गौतमधर्मसूत्रस्य कतिपये विषयाः पाठ्यक्रमे निर्धारिता वर्तन्ते

## २.पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याऽध्ययनेनच्छात्रा अधोलिखितेषु विषयेषु समर्था भविष्यन्ति–

- संस्काराणां परिचयस्य प्रदाने तेषां समन्त्रकस्य विधेर्वर्णने च,
- विभिन्नानां गृह्यकर्मणां स्वरूपस्य ज्ञाने तेषां विधेर्निरूपणे च,
- श्राद्धानां स्वरूपस्य प्रयोगस्य च ज्ञाने,
- गृह्यसूत्रे तत्परिशिष्टेषु धर्मसूत्रे चोक्तानां सदाचारसम्बद्धानां विषयाणां बोधे,
- पारस्करगृह्यसूत्रस्य तत्परिशिष्टानां धर्मसूत्रस्य च सूत्राणां व्याख्याने च

## ३.पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | विवाहादीनां संस्काराणां विधेर्निरूपणम् | पारस्करगृह्यसूत्रस्य प्रथमकाण्डे प्रतिपादिता विषयाः | २० | ३२ |
| ख | चूडाकरणोपनयनादीनां संस्काराणां सीतायज्ञ–श्रवणाकर्मादीनां गृह्यकर्मणां च विधेर्ज्ञानम् | पारस्करगृह्यसूत्रस्य द्वितीय–तृतीय–काण्डयोर्निरूपिता विषयाः | ३० | ४८ |
| ग | शौचस्नानादिसदाचाराणां श्राद्धानां च विधेर्ज्ञानम् | पारस्करगृह्यसूत्रस्य परिशिष्टेषु प्रतिपादिता निर्धारिता विषयाः | २५ | ४० |
| घ | धर्मसूत्रे प्रतिपादितानां कतिपयानां सम्बद्धानां विषयाणामवबोधः | गौतमधर्मसूत्रस्य निर्धारिता विषयाः। | १५ | २४ |
| ङ | भूसंस्काराः, समित्, स्रुवः, आवसथ्यः, मधुपर्कः इत्यादीनां गृह्यपदानामर्थप्रदर्शनम् | निर्धारितानां गृह्यपदानामर्थाः | १० | २४ |

## ४. पाठ्यवस्तुविवरणम्

### 'क'प्रकरणे

पारस्करस्य पारस्करगृह्यसूत्रस्य च परिचयः पारस्करगृह्यसूत्रस्य प्रमुखाणां भाष्यकाराणां विवरणम्

होमसाधारणधर्माः, आवसथ्याग्न्याधानम्, अर्घ्याः, मधुपर्कविधिः, पाकयज्ञाः, विवाहकालनिरूपणम्, विवाहकालविषये आश्वलायनगृह्यसूत्र–कौषीतकिगृह्यसूत्रयोर्मतम् विवाहे वासःपरिधापनम्, समञ्जनम्, कन्यादानम्, समीक्षणम्, आघारौ, आज्यभागौ, महाव्याहृतिहोमः, सर्वप्रायश्चित्तहोमः, राष्ट्रभृद्होमः, जयहोमः, अभ्यातानहोमः, आज्याहुतिहोमः, लाजहोमः, पाणिग्रहणम्, अश्मारोहणम्, स्त्रीयशोगाथागानम्, अग्निपरिक्रमणम्, प्राजापत्यहोमः, सप्तपदीप्रक्रमणम्, अभिषेकः, सूर्योदीक्षणम्, हृदयालम्भनम्, अभिमन्त्रणम्, वरदानम्, ध्रुवदर्शनम्, यथाशक्ति पालनीयो नियमः, सायम्प्रातर्विवाहाग्निपरिचरणम्, चतुर्थीकर्म

औपासनहोमः, पक्षादिकर्म, गर्भधारणाय नस्तविधिः, पुंसवनम्, सीमन्तोन्नयनम्, सोष्यन्तीकर्म, मेधाजननायुष्यकरणे ङ्कजातकर्म), रक्षाविधिः, नामकरणम्, निष्क्रमणम्, प्रोष्यागतस्य कर्म, अन्नप्राशनम्, चेति पारस्करगृह्यसूत्रस्य प्रथमकाण्डे प्रतिपादिता विषयाः

### 'ख'प्रकरणे

चूडाकरणम्, केशान्तः, उपनयनम्, उपनयने ब्राह्मणभोजनम्, कुमारस्य मुण्डनम्, अलङ्करणम्, आचार्यसमीपे नयनम्, आचार्यकर्तृककुमारवाचनम्, वासःपरिधापनम्, मेखलाबन्धनम्, दण्डप्रदानम्, अञ्जलिपूरणम्, सूर्योदीक्षणम्, हृदयालम्भनम्, दक्षिणहस्तग्रहणम्, नामादिप्रश्नः, परिदानम्, अग्निप्रदक्षिणीकरणम्,उपवेशनम्,आचार्यकर्तृकाज्याहुतिहवनम्, संशासनम्, सावित्र्यनुवचनम्, कुमारकर्तृकसमिदाधानम्, मुखविमार्जनम्, भिक्षाचर्यचरणम्, भैक्षनिवेदनम्, ब्रह्मचारिव्रतानि, चेति

समावर्तनम्, स्नातकनियमाः, पञ्चमहायज्ञाः, उपाकर्म, अनध्यायाः, उत्सर्जनम्, लाङ्गलयोजनम्, श्रवणाकर्म, इन्द्रयज्ञः, आश्वयुजीकर्म, सीतायज्ञः, नवान्नप्राशनम्, आग्रहायणीकर्म, स्रस्तरारोहणम्, अष्टकाः, अन्वष्टकाः, शालाकर्म ङ्कवास्तुशान्तिः), मणिकावधानम्, शूलगवः, वृषोत्सर्गः, उदककर्म ङ्कशवसंस्कारादिकर्म), अवकीर्णिप्रायश्चित्तम्, रथारोहणम्, हस्त्यादिरोहणञ्चेति पारस्करगृह्यसूत्रस्य द्वितीय–तृतीयकाण्डयोः प्रतिपादिता विषयाः

**'ग' प्रकरणे**

पारस्करगृह्यसूत्रस्य परिशिष्टेषु वापी-कूप-तडागा-ऽऽरामप्रतिष्ठा, त्रिकण्डिकस्नानसूत्रम् ङ्कस्नानविधिः, सन्ध्योपासनविधिः, तर्पणविधिश्चेति) भोजनसूत्रम्, श्राद्धकल्पसूत्रञ्चेति ङ्कआपरपक्षिकश्राद्धविधिः ङ्कपार्वणश्राद्धविधिः), एकोद्दिष्टश्राद्धविधिः, सपिण्डीकरणविधिः, आभ्युदयिकश्राद्धविधिः, द्रव्यविशेषेण तृप्तिविशेषः, अक्षय्यतृप्त्युपायाः, काम्यश्राद्धानि चेति) परिशिष्टानां विषयाः

**'घ' प्रकरणे**

गौतमधर्मसूत्रस्य अधोनिर्दिष्टा विषयाः– प्रथमप्रश्नस्य प्रथमाध्याये धर्मप्रमाणम्, श्रुतिस्मृत्योर्विरोधे व्यवस्था, उपनयनकालविवेचनम्, द्विजत्वम्, आचार्यत्वम्, उपनीतानां मेखलाजिनवासोदण्डाः, आचमनम्, द्रव्यशुद्धिः, भूमिशुद्धिः, रज्ज्वादिशुद्धिः, शौचनियमाः, आचमनविधिः, द्विराचमननिमित्तानि, दन्तलग्नस्योच्छिष्टस्य विषये व्यवस्था, अमेध्यलिप्तशुद्धिः, गुरूपसदनम्, प्राणायामः, अभिवादननियमः, गुरुशिष्यमध्ये प्राणिविशेषगमने नियमश्च

प्रथमप्रश्नस्य अष्टमेऽध्याये– समाजे ब्राह्मणस्य राज्ञश्च स्थानम्, बहुश्रुतता, बहुश्रुतब्राह्मणमाहात्म्यम्, संस्काराः, अष्टावात्मगुणाश्च उपलभ्यमानानि धर्मसूत्राणि, धर्मसूत्राणां विषयाः, गौतमधर्मसूत्रस्य परिचयश्च

**'ङ' प्रकरणे**

भूसंस्काराः, ब्रह्मा, प्रणीताप्रणयनम्, परिस्तरणम्, कुशतरुणम्, पवित्रे, प्रोक्षणीपात्रम्, सम्मार्गकुशाः, उपयमनकुशाः, समित्, स्रुवः, प्रोक्षणम्, पर्युक्षणम्, पर्यग्निकरणम्, उत्पवनम्, गोदानम्, अभ्युन्दनम्, क्षौरम्, वासःपरिधापनम्, यज्ञसूत्रम्, उपवीतम्, प्राचीनावीतम्, निवीतम्, अजिनम्, मेखला, दण्डः, कमण्डलुः, परिदानम्, संशासनम्, मेधाजननम्, अभिवादनम्, प्रत्यभिवादनम्, पादोपसङ्ग्रहणम्, अपोशनम्, दैवतीर्थम्, प्राजापत्यतीर्थम्, पित्र्यतीर्थम्, ब्राह्मतीर्थम्, मार्जनम्, प्राणायामः, वेदव्रतम्, भैक्षम्, व्रात्यः, अवकीर्णी, ब्रह्मचारी, केशान्तः, समावर्तनम्, उष्णीषम्, स्नातकः, पाणिग्रहः, मधुपर्कः, पद्यम्, अर्घः, समञ्जनम्, लाजहोमः, अश्मारोहणम्, सप्तपदीप्रक्रमणम्, चतुर्थी, आवसथ्याधानम्, पञ्चमहायज्ञाश्चेति गृह्यकर्मसम्बद्धानां पदानामर्थाः

## ५.शिक्षणविधिः

अस्य पाठ्यांशस्य शिक्षणे यथासम्भवं निगमना-ऽऽगमन-प्रवचन-विमर्श-व्याख्यान-प्रश्नोत्तराद्या विभिन्नाः पद्धतयोऽवलम्बनीयाः सति सम्भवे शिक्षणक्रमे छात्राः स्वयमेव यथा विशेषतो व्यापृता भवन्ति तथा प्रेरणीयाः छात्रा यथासम्भवमन्वेषणेऽपि प्रचोदनीयाः मन्त्राणां सूत्राणां च कण्ठस्थीकरणमपि तदर्थबोधप्रयोगाद्यर्थं लाभप्रदमिति छात्राः मन्त्रसूत्रकण्ठस्थीकरणाय उत्प्रेरणीयाः विषयानुसारेण प्रसङ्गानुसारेण च समुचितानां श्रव्यदृश्यसामग्रीणामपि प्रयोगः कर्तुं शक्यते आवश्यकतानुसारेण कदाचिद् दूरशिक्षणविधिरपि अवलम्बनीयो भवति अतस्तदनुकूलतया पाठयोजनाऽपि निर्मेया, प्रविध्युपयोगश्च विधेयः एतदर्थं विश्वविद्यालयेन विद्यापीठेन च साहाय्यं कार्यम्

## ६.मूल्याङ्कनविधिः

मूल्याङ्कनविधिर्द्विविधोऽवलम्ब्यते— आन्तरिकः ङ्कनिर्माणात्मकः), बाह्यः ङ्कनिर्णयात्मकः) चेति आन्तरिक-मूल्याङ्कनं मुख्यरूपेण कक्षागतमेव भवति तत्रोपस्थितिः, छात्राणामाचरणम्, कक्षाकार्यम्, गृहकार्यम्, कक्षापरीक्षा, चेत्यादीनामाधारेण विभागस्यापि समन्वयेनाऽऽन्तरिकं मूल्याङ्कनं विधीयते पञ्चविंशतिः प्रतिशतमङ्का आन्तरिकमूल्याङ्कनस्य कृते निर्धारिताः सन्ति बाह्यमूल्याङ्कनस्य कृते शतस्य पूर्णाङ्कानां लिखितपरीक्षा भवति परीक्षाफलप्रकाशने आन्तरिकमूल्याङ्कनस्याङ्कानां समायोजनं भवति बाह्यपरीक्षार्थं प्रश्नपत्रनिर्माणमधोनिर्दिष्टप्रकारेण भवति—

**वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, घ | विवेचनात्मकाः | ३ | २ | २४ |
| क, ख, ग, घ, ङ | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| क, ख, ग, घ | व्याख्यात्मकाः | ४ | ३ | २४ |
| क, ख, ग, घ | वस्तुगताः | १० | १० | १० |

| ङ | | | | |
|---|---|---|---|---|
| | योगः | २६ | २१ | १०० |

**७. पाठ्यसामग्रीसूची**

**क) पाठ्यग्रन्थाः**

**१.पारस्करगृह्यसूत्रम्,** हरिहरभाष्यसहितम्

२. **वापी(कूप(तडागा(ऽऽरामप्रतिष्ठा ङ्ककामदेवभाष्यसहिता), त्रिकण्डिकस्नानसूत्रम् (हरिहरकृतसूत्रविवरणसहितम्), श्राद्धकल्पसूत्रम् ( गदाधरभाष्यसहितम्), भोजनसूत्रञ्चेति पारस्करगृह्यसूत्रस्य परिशिष्यानि**

**३.गौतमधर्मसूत्रम्** (प्रथमप्रश्नस्य प्रथमाध्यायः, अष्टमाध्यायश्च), मिताक्षराख्यवृत्तिसहितम्

**ख) सहायकग्रन्थाः**

**१.आश्वलायनगृह्यसूत्रभाष्यम्,** देवस्वामिकृतभाष्यम्, सम्. के.पी. ऐतालः, अड्यार लाइब्रेरि, मद्रास, १९८० कै.

**२.कौषीतकिगृह्यसूत्रम्,** भवत्रातकृतव्याख्यासहितम्, सम्. टी.आर. चिन्तामणिः, पुनर्मु. पाणिनिः, नूतनदिल्ली,
१९८२ कै.

**३.पारस्करगृह्यसूत्रम्,** कर्कादिकृतभाष्यपञ्चकसहितम्, सम्. महादेवशर्मा, मुन्शीराम( मनोहरलाल(पब्लिशर्स,
१९८२ कै.

४. **गौतमधर्मसूत्रम् ,** हरदत्तकृतमिताक्षराख्यवृत्तिसहितम्, सम्. प्रमोदवर्धन( कौण्डिन्न्यायनः,चौखम्बा–विद्याभवनम्, वाराणसी, २०१५ कै.

**५. वेदभाषानिघण्टुः** ङ्कब्रह्मवर्गः), शिवराज आचार्यः कौण्डिन्न्यायनः, स्वाध्यायशाला, काष्ठमण्डपनगरम्, २०५० वै.

**ग) सन्दर्भग्रन्थाः**

**१.पारस्करगृह्यसूत्रम्,** हरिहर(गदाधर(भाष्यद्वयोपेतम्, सम्. जगदीशचन्द्र(मिश्रः, चौखम्बा सुरभारती प्रकाशनम्,

२०१५ऋै.

२.पारस्करगृह्यसूत्रानुसारिण्यः– (क) **सन्ध्योपासनपद्धतिः** ( सङ्क्षिप्तदैनिकसदाचारपद्धतिः), (ख) **संस्कारपद्धतिः,** (ग) **विवाहपद्धतिः,** **(**घ) **एकोद्दिष्टश्राद्धपद्धतिः,** (ङ) **पार्वणश्राद्धपद्धतिश्चेति** पद्धतयः, शिवराज आचार्यः कौण्डिन्न्यायनः, रत्न–पुस्तक–भाण्डारम्, स्वाध्यायशाला च, काष्ठमण्डपनगरम्, २०६४ वै.–

**३. वैदिकमन्त्रसङ्ग्रहः**, शिवराज आचार्यः कौण्डिन्न्यायनः, स्वाध्यायशाला, काष्ठमण्डपनगरम्, २०५२ वै.

**४.वैदिक धर्म मूल रूपमा,** शिवराज आचार्य कौण्डिन्न्यायन, स्वाध्यायशाला, काठमाण्डु, द्वि.सं. २०६२ वै.

**५.गृह्यानुष्ठानों का सांस्कृतिक अन्वेषण,** रीना अस्थाना, नाग–पब्लिशर्स, दिल्ली, २००४ ऋै.

**६.गौतमधर्मसूत्रम् ,** हरदत्तकृतमिताक्षराख्यवृत्तिसहितम्, सम्. उमेशचन्द्र(पाण्डेयः, चौखम्बा–संस्कृत–सिरिज्, वाराणसी, २०४३ वै.

**७.गौतमधर्मसूत्रम् ,** मस्करिभाष्यसहितम्, सम्. एल्. श्रीनिवासाचार्यः, मैसुरु, १९१७ ऋै.

**८.गौतमधर्मसूत्र ,** भावमीमांसा नेपाली व्याख्या,प्रमोदवर्धन कौण्डिन्न्यायन, विद्यार्थी पुस्तक भण्डार, काठमाडौं, २०६९ वै.

# शुक्लयजुर्वेदः

**पाठ्यांशनाम—स्वरवैदिकप्रक्रिया, निरुक्तञ्च** **पाठ्यांशसङ्केतः**— शु.वे. ४०२

**स्तरः**— शास्त्री **पूर्णाङ्काः**— १००

**वर्षः**- द्वितीयः **वार्षिकः पाठ्यभारः**—१६० घण्टाः

**पत्रम्**— चतुर्थम् **साप्ताहिकः पाठ्यभारः**— ६

**१. पाठ्यांशपरिचयः**

शास्त्रिकक्षायां प्रविश्य द्वितीये वर्षे शुक्लयजुर्वेदं पिपठिषूणां छात्राणां कृतेऽयं पाठ्यांशो निर्धारितो वर्तते अयं पाठ्यांशः पञ्चसु प्रकरणेषु विभक्तोऽस्ति ।

वेदस्य शुद्धतयोच्चारणस्य ज्ञानार्थं शिक्षानामकं प्रथमं वेदाङ्गं श्रौतयज्ञस्वरूपज्ञानार्थं कल्पशास्त्रान्तर्गतं श्रौतसूत्ररूपं द्वितीयं वेदाङ्गं च प्रथमवर्षस्य पाठ्यक्रमे निर्धारितमासीत् वेदमन्त्रार्थज्ञानार्थं वेदप्रयोगज्ञानार्थं चाऽऽवश्यकाः कतिपये पाठ्यांशाश्च प्रथमे वर्ष एव निर्धारिता आसन् अधुना द्वितीये वर्षे एतस्मिन् पत्रे सिद्धान्तकौमुद्याः स्वरवैदिकप्रक्रिये निघण्टुनिरुक्तयोर्नैघण्टुकं काण्डं च पाठ्यक्रमे निर्धारितानि सन्ति ।

वेदार्थं ज्ञातुं व्याकरणस्याध्ययनमपि अत्यावश्यकमस्तीति शास्त्रं निर्दिशति- **मुखं व्याकरणं स्मृतम्** इति पाणिनीयशिक्षायाम् तथैव **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोध्येयो ज्ञेयः** इति व्याकरणमहाभाष्य उक्तमस्ति अतोऽत्र व्याकरणस्य वैदिकप्रकरणं स्वरप्रकरणं च पाठ्यत्वेन निर्धारितं वर्तते तथैव षडङ्गेषु मध्ये निरुक्तं वेदपुरुषस्य श्रोत्रस्थानीयं वेदाङ्गं वर्तते वेदमन्त्रार्थबोधाय निरुक्तस्य महत्त्वं निरुक्तेपि सम्यक् प्रबोधितं दृश्यते- **अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते** इति अतोऽत्र निघण्टोर्निरुक्तस्य च नैघण्टुकं काण्डं पाठ्यत्वेन निर्धारितम् ।

**२.पाठ्यांशस्य सामान्योद्देश्यानि**

अस्य पाठ्यांशस्याऽध्ययनेनच्छात्रा अधोलिखितेषु विषयेषु समर्था भविष्यन्ति—

- वेद एव प्रयुक्तानां विभिन्नानां शब्दानां रूपाणां वैशिष्ट्यस्य निरूपणे,
- विभिन्नप्रकारकाणां पदानां निष्पादने व्याकरणनियमानां व्यत्ययस्य ज्ञाने,

- स्वरप्रक्रियाया अवबोधे,
- निरुक्ते निर्वचनभूमिकात्वेन प्रतिपादितानां विभिन्नानां विषयाणां विवेचने,
- निरुक्तस्य नैघण्टुककाण्डे निरुक्तानां प्रमुखाणां शब्दानां निर्वचने च

**३.पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च**

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | वैदिकप्रक्रियाया ज्ञानम् | सिद्धान्तकौमुद्या वैदिकप्रकरणस्य निर्धारितानां सूत्राणां विषयाः | ३० | ४८ |
| ख | स्वरप्रक्रियाया ज्ञानम् | सिद्धान्तकौमुद्याः स्वरप्रकरणस्य निर्धारितानां सूत्राणां विषयाः | २० | ३२ |
| ग | निरुक्ते निर्वचनभूमिकात्वेन प्रतिपादितानां विषयाणां विवेचनम् | निरुक्तस्य प्रथमद्वितीयाध्याययोः निर्वचनभूमिकात्वेन प्रतिपादिता निर्धारिता विषयाः | २५ | ४० |
| घ | निरुक्ते निरुक्तानां कतिपयानां पदानां निर्वचनस्य प्रदर्शनम् | निरुक्तस्य तृतीयाये प्रतिपादिता निर्धारिता विषयाः | १५ | २४ |
| ङ | निघण्टोः कतिपयानां पदानां ज्ञानम् | निघण्टोः निर्धारितानि पदानि | १० | १६ |

**४. पाठ्यवस्तुविवरणम्**

**'क'प्रकरणे**

सिद्धान्तकौमुद्या वैदिकप्रकरणस्य अधोनिर्दिष्टानां सूत्राणां वार्तिकानां च सोदाहरणमर्थज्ञानम्–

छन्दसि पुनर्वस्वोरेकवचनम् १।२।६१, ष ियुक्तश्छन्दसि वा १।४।९, अयस्मयादीनि च्छन्दसि १।४।२०, छन्दसि परेऽपि १।४।८०, व्यवहिताश्च १।४।८२, तृतीया च होश्छन्दसि २।३।३, चतुर्थ्यर्थे बहुलं छन्दसि २।३।६२, षष्ठ्यर्थे चतुर्थीति वाच्यम् ङ्कवार्तिकम्), बहुलं छन्दसि २।४।३९, मन्त्रे

घसह्वरणशवृदहाद्वृज्कृगमिजनिभ्यो लेः २।४।८०, छन्दसि नि र्क्यदेवहूय... ३।१।१२३, छन्दसि वनसनरक्षिमथाम् ३।२।२७, जनसनखनक्रमगमो विट् ३।२।६७, मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ३।२।७१, आतो मनिन्क्वनिब्वनिपश्च ३।२।७४, छन्दसि लिट् ३।२।१०५, लिटः कानज्वा ३।२।१०६, णेश्छन्दसि ३।२।१३७, भुवश्च ३।२।१३८, क्याच्छन्दसि ३।२।१७०, अन्येभ्योऽपि दृश्यते ३।३।१३०, छन्दसि लुङ्लङ्लिटः ३।४।६, लिङर्थे लेट् ३।४।७, सिब्बहुलं लेटि ३।४।३४, लेटोऽडाटौ ३।४।९४, इतश्च लोपः परस्मैपदेषु ३।४।९७, स उत्तमस्य ३।४।९८, आत ऐ ३।४।९५, वैतोऽन्यत्र ३।४।९६, उपसंवादाशङ्कयोश्च ३।४।८, छन्दसि शायजपि ३।१।८४, हृग्रहोर्भश्छन्दसि ङ्कवार्तिकम्), व्यत्ययो बहुलम् ३।१।८५, सुप्तिङुपग्रहलिङ्ग...ङ्ककारिका), छन्दस्युभयथा ३।४।११७, तुमर्थे सेसेनसे.... ३।४।९, ईश्वरे तोसुन्कसुनौ ३।४।१३, कृत्यार्थे तवैकेन्केन्यत्वनः ३।४।१४, सृपितृदोः कसुन् ३।४।१७, रात्रेश्चाजसौ ४।१।३१, मुद्गलाच्छन्दसि लिच्च ङ्कवार्तिकम्), दीर्घजिह्वी च च्छन्दसि ४।१।५९, कद्रुकमण्डल्वोश्छन्दसि ४।१।७१, छन्दसि ठञ् ४।३।१९, हेमन्ताच्च ४।३।२१, शौनकादिभ्यश्छन्दसि ४।३।१०६, भवे छन्दसि ४।४।११०, असुरस्य स्वम् ४।४।१२३, मत्वर्थे मासतन्वोः ४।४।१२८, मधोर्ञ च ४।४।१२९, अद्भिः संस्कृतम् ४।४।१३४, सहस्रेण सम्मितौ घः ४।४।१३५, मतौ च ४।४।१३६, नक्षत्राद् घः ४।४।१४१, सर्वदेवात् तातिल् ४।४।१४२, छन्दसि च ५।१।६७, सम्परिपूर्वात् ख च ५।१।९२, तुश्छन्दसि ५।३।५९, प्रत्नपूर्वविश्वेमात्थाल्छन्दसि ५।३।१११, चायः की ६।१।३५, शीर्षश्छन्दसि ६।१।६०, शेश्छन्दसि बहुलम् ६।१।७०, प्रकृत्यान्तःपादमव्यपरे ६।१।११५, यजुष्युरः ६।१।११७, आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे ६।३।११८, स्यश्छन्दसि बहुलम् ६।१।१३३, पितरामातरा च च्छन्दसि ६।३।३३, पथि च च्छन्दसि ६।३।१०८, ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ६।३।१३३, द्व्यचोऽतस्तिङः ६।३।१३५, अन्येषामपि दृश्यते ६।३।१३७, इरयो रे ६।४।७६, मन्त्रेष्वाङ्यादेरात्मनः ६।४।१४१, बहुलं छन्दसि ७।१।१०, सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ७।१।३९, इयाडियाजीकाराणामुपसङ्ख्यानम् (वार्तिकम्), तप्तनप्तनथनाश्च ७।१।४५, इदन्तो मसि ७।१।४६, आज्जसेरसुक् ७।१।५०, सोमे ह्वरितः ७।२।३३, घोर्लोपो लेटि वा ७।३।७०, देवसुम्नयोर्यजुषि काठके ७।४।३८, विभाषा छन्दसि ७।४।४४, कृषेश्छन्दसि ७।४।६४, ओमभ्यादाने ८।२।८७, प्रणव`ः ८।२।८९, एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ८।२।१०७, प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्वेव ङ्कवार्तिकम्), छन्दस्यृदवग्रहात् ८।४।२६, नश्च धातुस्थोरुषुभ्यः ८।४।२७

**'ख'प्रकरणे**

सिद्धान्तकौमुद्याः स्वरप्रकरणस्य अधोनिर्दिष्टानां सूत्राणां सोदाहरणमर्थज्ञानम्-

अनुदात्तं पदमेकवर्जम् ६।१।१५८, अनुदात्तस्य च यत्रोदात्तलोपः ६।१।१६१, आमन्त्रितस्य च ६।१।१९८, सुबामन्त्रिते पराङ्गवत्स्वरे २।१।२, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ८।२।४, स्वरितो वाऽनुदात्ते पदादौ ८।२।६, उदात्तादनुदात्तस्य स्वरितः ८।४।६६, एकश्रुति दूरात् सम्बुद्धौ १।२।३३, यज्ञकर्मण्यजपन्यूङ्खसामसु १।२।३४, उच्चैस्तरां वा वषट्कारः १।२।३५, देवब्रह्मणोरनुदात्तः १।२।३८, स्वरितात् संहितायामनुदात्तानाम् १।२।३९, उदात्तस्वरितपरस्य सन्नतरः १।२।४०, धातोः ६।१।१६२, अभ्यस्तानामादिः ६।१।१८९, अनुदात्ते च ६।१।१९०, लिति ६।१।१९३, चङ्यन्यतरस्याम् ६।१।२१८, चतुरः शसि ६।१।१६७, झल्युपोत्तमम् ६।१।१८०, विभाषा भाषायाम् ६।१।१८१, सर्वस्य सुपि ६।१।१९१, ञ्नित्यादिर्नित्यम् ६।१।१९७, पथिमथोः सर्वनामस्थाने ६।१।१९९, युष्मदस्मदोर्ङसि ६।१।२११, ङयि च ६।१।२१२, अन्तोऽवत्याः ६।१।२२०, ईवत्याः ६।१।२२१, फिषोऽन्त उदात्तः ङ्कफिट्सूत्रम् १), पाटलापालङ्काम्बासागरार्थानाम् (फि.सू. २), ध्यपूर्वस्य स्त्रीविषयस्य (फि.सू. ५), खान्तस्याश्मादेः (फि.सू. ६), दक्षिणस्य साधौ ङ्कफि.सू. ८), स्वाङ्गाख्यायामादिर्वा (फि.सू. ९), घृतादीनाञ्च ङ्कफि.सू. २१), ज्येष्ठकनिष्ठयोर्वयसि ( फि.सू. २२), स्वाङ्गशिटामदन्तानाम् (फि.सू. २९), ग्रामादीनाञ्च (फि.सू. ३८), त्र्यचां प्राङ्मकारात् (फि.सू. ५१), स्वाङ्गानामकुर्वादीनाम् (फि.सू. ५२), पान्तानां गुर्वादीनाम् ङ्कफि.सू. ५५), युतान्यण्यन्तानाम् (फि.सू. ५६), त्वत्त्वसमसीमेत्यनुच्चानि (फि.सू. ७८), निपाता आद्युदात्ताः (फि.सू. ८०), प्रकारादि द्विरुक्तौ परस्यान्त उदात्तः (फि.सू. ८६), शेषं सर्वमनुदात्तम् ङ्कफि.सू. ८७), आद्युदात्तश्च ३।१।३, अनुदात्तौ सुप्पितौ ३।१।४, चितः ६।१।१६३, तद्धितस्य ६।१।१६४, कितः ६।१।१६५, उदात्तयणो हल्पूर्वात् ६।१।१७४, ङ्याश्छन्दसि बहुलम् ६।१।१७८, तित्स्वरितम् ६।१।१८५, उपोत्तमं रिति ६।१।२१७, समासस्य ६।१।२२३, बहुव्रीहौ प्रकृत्या पूर्वपदम् ६।२।१, गाधलवणयोः प्रमाणे ६।२।४, द्विगौ प्रमाणे ६।२।१२, स्वं स्वामिनि ६।२।१७, पूर्वे भूतपूर्वे ६।२।२२, सङ्ख्या ६।२।३५, गौः सादसादिसारथिषु ६।२।४१, अहीने द्वितीया ६।२।४७, तृतीया कर्मणि ६।२।४८, कतरकतमौ कर्मधारये ६।२।५७, आर्यो ब्राह्मणकुमारयोः ६।२।५८, राजा च प्रशंसायाम् ६।२।६३, आदिरुदात्तः ६।२।६४, गोबिडालसिंहसैन्धवेषूपमाने ६।२।७२, अके जीविकार्थे ६।२।७३, प्राचाङ् क्रीडायाम् ६।२।७४, गोतन्तियवं पाले ६।२।७८, छात्र्यादयः शालायाम् ६।२।८६, कुमार्यां वयसि ६।२।९५, सभायां नपुंसके ६।२।९८, शृङ्गमवस्थायाञ्च ६।२।११५, तत्पुरुषे शालायां नपुंसके ६।२।१२३, अकर्मधारये राज्यम् ६।२।१३०, देवताद्वन्द्वे च ६।२।१४१, कृत्योकेष्णुच्चार्वादयश्च ६।२।१६०, सङ्ख्यायाः स्तनः ६।२।१६३, द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ६।२।१९७, तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ८।१।२७, तिङ्ङतिङः ८।१।२८, न लुट् ८।१।२९, निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिदयत्रयुक्तम् ८।१।३०, पूजायां नान्तरम् ८।१।३७, लोपे विभाषा ८।१।४५, एहि मन्ये प्रहासे लृट् ८।१।४६, शेषे

विभाषा ८।१।५०, चादिलोपे विभाषा ८।१।६३, यद्वृत्तान्नित्यम् ८।१।६६, तिङि चोदात्तवति ८।१।७१

**‘ग’प्रकरणे**

निरुक्तस्य प्रथमेऽध्याये— निघण्टुपदस्य निर्वचनम्, नामाख्यातोपसर्गनिपातानां लक्षणानि, शब्दस्य नित्यत्वम्, लोकव्यवहारार्थं शब्दानां प्रयोगस्यावश्यकता, कर्मसु वेदमन्त्राणां प्रयोगस्याऽऽवश्यकता, षड् भावविकाराः, उपसर्गाणां निरूपणम्, उपसर्गाणां विषये शाकटायनस्य गार्ग्यस्य यास्कस्य च मतम्, निपातस्य लक्षणम्, निपातानां त्रैविध्यम्, ‘त्व’शब्दविषये मतभेदः, नाम्नामाख्यातजत्वम्, नाम्नामाख्यातजत्वस्य खण्डनम्, नाम्नामाख्यातजत्वे यास्कस्य मतम्, निरुक्तस्य प्रयोजनानि, मन्त्रार्थविषये कौत्समतम्, मन्त्राणां सार्थकत्वम्, संहिताया लक्षणम्, ज्ञानप्रशंसा अज्ञाननिन्दा च, ऋषीणां वैशिष्ट्यम्, ब्राह्मणग्रन्थ(वेदाङ्गानां प्रयोजनम्, निरुक्तस्य काण्डत्रयेषु विभागः, निरुक्तस्य प्रथमाध्याये आगतानामृचामर्थाश्च अधोलिखितानां पदानां सोदाहरणं निर्वचनम्— आचार्यः, शाखाः, द्युः, वरः, दक्षिणा, हस्तः, वीरः, सीमा, गायत्रम्, अध्वर्युः, अध्वरः, कर्णः, नरकम्, पृथिवी च

निरुक्तस्य द्वितीयेऽध्याये— निर्वचनस्य सिद्धान्ताः, देशप्रसिद्ध्या शब्दरूढेर्निर्णयः, तद्धितसमासयोर्निर्वचनस्य प्रकारः, ग्राह्यवर्ज्यशिष्याणां लक्षणानि, देवापिशन्तन्वोः प्रसङ्गः, दिव आदित्यस्य च साधारणानां षण्णां नाम्नां निर्वचनम्, नदीशब्द(निर्वचनप्रसङ्गः, विश्वामित्रस्य नदीनां च संवादः, निरुक्तस्य द्वितीयाध्याये आगतानामृचामर्थाश्च अधोलिखितानां पदानां यथासम्भवं सोदाहरणं निर्वचनम्—गौः, पयः, पादः, हिरण्यम्, समुद्रः, पुत्रः, ऋषिः, आदित्यः, रश्मिः,वृत्रः,रात्रिः,उषाः,अहः,मेघः,वाक्,उदकम्,अश्वश्च

निरुक्तस्य परिचयः, यास्कस्य परिचयश्च

**‘घ’ प्रकरणे**

निरुक्तस्य तृतीयेऽध्याये-कर्मापत्यपदयोर्निर्वचनम्, दायविभागचर्चा, उपमाभेदसम्बद्धानि लक्षणोदाहरणानि, निरुक्तस्य तृतीयाध्याये आगतानामृचामर्थाश्च अधोनिर्दि ानां पदानां सोदाहरणं निर्वचनम्— दुहिता, गर्तः, जामिः, मनुष्यः, पञ्चजनः, अङ्गुल्यः, बाहुः, बलम्, धनम्, क्षिप्रम्, सङ्ग्रामः, एकद्व्यादिसङ्ख्याः, बहु, ह्रस्वः, महान्, गृहम्, सुखम्, रूपम्, सत्यम्, सिंहः, मेधावी, यज्ञः, ऋत्विक्, कूपः, दूरम्, पुराणम्, नवम् च

**'ङ' प्रकरणे**

निघण्टोरधोलिखितानां पदानां यथासम्भवं दशदश नामानि– पृथिवी, हिरण्यम्, अन्तरिक्षम्, रश्मिः, दिक्, रात्रिः, उषाः, अहः, मेघः, वाक्, उदकम्, नदी, अश्वः, कर्म, अपत्यम्, मनुष्यः, बाहुः, अङ्गुलिः, कान्तिः, अन्नम्, बलम्, धनम्, गौः, क्रोधः, क्षिप्रम्, सङ्ग्रामः, वज्रः, बहु, गृहम्, सुखम्, रूपम्, प्रज्ञा, अर्चति, स्तोता, मेधावी, यज्ञः, स्तेनः, द्यावापृथिवी चेति

**५.शिक्षणविधिः**

अस्य पाठ्यांशस्य शिक्षणे यथासम्भवं निगमना-ऽऽगमन-प्रवचन-विमर्श-व्याख्यान-प्रश्नोत्तराद्या विभिन्नाः पद्धतयोऽवलम्बनीयाः सति सम्भवे शिक्षणक्रमे छात्राः स्वयमेव यथा विशेषतो व्यापृता भवन्ति तथा प्रेरणीयाः छात्रा यथासम्भवमन्वेषणेऽपि प्रचोदनीयाः मन्त्राणां सूत्राणां च कण्ठस्थीकरणमपि तदर्थबोधप्रयोगाद्यर्थं लाभप्रदमिति छात्राः मन्त्रसूत्रकण्ठस्थीकरणाय उत्प्रेरणीयाः विषयानुसारेण प्रसङ्गानुसारेण च समुचितानां श्रव्यदृश्यसामग्रीणामपि प्रयोगः कर्तुं शक्यते आवश्यकतानुसारेण कदाचिद् दूरशिक्षणविधिरपि अवलम्बनीयः अतस्तदनुकूलतया पाठयोजनाऽपि निर्मेया, प्रविध्युपयोगश्च विधेयः एतदर्थं विश्वविद्यालयेन विद्यापीठेन च साहाय्यं कार्यम्

**६.मूल्याङ्कनविधिः**

मूल्याङ्कनविधिर्द्विविधोऽवलम्ब्यते– आन्तरिकः ङ्कनिर्माणात्मकः), बाह्यः ङ्कनिर्णयात्मकः) चेति आन्तरिकं मूल्याङ्कनं मुख्यरूपेण कक्षागतमेव भवति तत्रोपस्थितिः, छात्राणामाचरणम्, कक्षाकार्यम्, गृहकार्यम्, कक्षापरीक्षा, चेत्यादीनामाधारेण विभागस्याऽपि समन्वयेनाऽऽन्तरिकं मूल्याङ्कनं विधीयते पञ्चविंशतिः प्रतिशतमङ्का आन्तरिकमूल्याङ्कनस्य कृते निर्धारिताः सन्ति बाह्यमूल्याङ्कनस्य कृते शतस्य पूर्णाङ्कानां लिखितपरीक्षा भवति परीक्षाफलप्रकाशने आन्तरिकमूल्याङ्कनस्याङ्कानां समायोजनं भवति बाह्यपरीक्षार्थं प्रश्नपत्रनिर्माणमधोनिर्दिष्टप्रकारेण भवति–

**वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |

| | | | | |
|---|---|---|---|---|
| क, ख, ग, घ | विवेचनात्मकाः | ३ | २ | २४ |
| क, ख, ग, घ, ङ | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| क, ख, ग, घ | व्याख्यात्मकाः | ४ | ३ | २४ |
| क, ख, ग, घ ङ | वस्तुगताः | १० | १० | १० |
| | योगः | २६ | २१ | १०० |

**७. पाठ्यसामग्रीसूची**

**क) पाठ्यग्रन्थाः**

१.भट्टोजिदीक्षितप्रणीतायाः **वैयाकरणसिद्धान्तकौमुद्याः** वैदिकप्रकरणं स्वरप्रकरणं च

२. यास्कप्रणीतं **निरुक्तम्** ङ्क१-३ अध्यायाः)

**३. निघण्टुः** ङ्क१-३ अध्यायाः)

**ख) सहायकग्रन्थाः**

१.**वैयाकरणसिद्धान्तकौमुदी,**वैदिकप्रकरणं स्वरप्रकरणं च, जयकृष्णकृत(सुबोधिनीसमेतम्, नागोजीभट्टप्रणीत(
लघुशब्देन्दुशेखरसहितञ्च, मोतीलाल-बनारसीदासः, दिल्ली १९५१ कै.

२.**निरुक्तम्**, छज्जूराम(देवशर्मशास्त्रिभ्यां संक्षेपितया दुर्गकृतसंस्कृतटीकया विभूषितम्, मेहरचन्द-
लछमनदास-पब्लिकेशन्स, नूतनदिल्ली १९८५ कै.

३.**निरुक्तम्,** दुर्गकृतसंस्कृतटीकानुसारिण्या मुकुन्दशर्मकृतया निरुक्तविवृत्या समुपेतम्, मेहरचन्द-
लछमनदास-पब्लिकेशन्स, नूतनदिल्ली १९८२ कै.

**ग) सन्दर्भग्रन्थाः**

१. **वैयाकरणसिद्धान्तकौमुदी**, वैदिकी प्रक्रिया, हिन्दीव्याख्योपेता, उमाशङ्करशर्मा ऋषिः, चौखम्बा-विद्याभवनम्, वाराणसी, १९८८ कै.

२. **वैयाकरणसिद्धान्तकौमुदी**, स्वरवैदिकी प्रक्रिया, रञ्जना(नेपाली( व्याख्यासंवलिता, शालिग्राम(सुवेदी, स्याङ्जा साहित्य प्रतिष्ठान, स्याङ्जा, २०७१ वै.

३. **काशिका** ङ्कपाणिनीयव्याकरणसूत्रवृत्तिः) वामनजयादित्यौ, सम्पादकः बालशास्त्री, मेडिकल हल प्रेस, वाराणसी, १८९८ क्रै.

४. **निरुक्तम्,** दुर्गकृतयाऋज्वर्थाख्यटीकयासहितम्ङ्कप्रथमो भागः), मनसुखरायमोरः, कलकत्ता, १९५२ क्रै.

५. **निरुक्तभाष्यटीका** ङ्कप्रथमो भागः), स्कन्दस्वामि(महेश्वरान्यतरविरचिता, सम्पादकः लक्ष्मण(सरूपः, पाणिनिः, नूतन(दिल्ली, १९८२ क्रै.

६.**निरुक्तम्,** सप्तमाध्यायपर्यन्तम्, हिन्दीभाषानुवादटिप्पण्यादिसंवलितम्, उमाशङ्करशर्मा ऋषिः, चौखम्बा–विद्याभवनम्, वाराणसी, १९८९ क्रै.

# सामवेदः

**पाठ्यांशनाम**- सामस्वरसंज्ञापरिभाषाध्ययनम् — **पाठ्यांशसङ्केतः**- साम.वे ४०१

**स्तरः** -शास्त्री — **पूर्णाङ्काः -** १००

**वर्षः**-द्वितीयः — **वार्षिकःपाठ्यभारः** - १६० घण्टाः

**पत्रम्-**तृतीयम् — **साप्ताहिकः पाठ्यभारः** - ६

## १. पाठ्यांशपरिचयः

वेदस्य गद्यपद्यगीतिस्वरूपेषु कर्मज्ञानोपासनाप्रतिपाद्यविषयेषु गानमुपासनाञ्च प्रस्तौति सामवेदः ।ग्रामेगेयारण्येगेयगाने प्रकृतिगानत्वेन व्यवह्रियेते, ऊहोह्यगाने विकृतित्वेन ।सामगानाध्ययनार्थमाचार्यैः सामगैः प्रस्तुतां सरणिमत्र समुपस्थाप्य गानगतवैयाकरणप्रक्रियाध्ययनाय पाठ्यांशोऽयमुपकारको भवेदिति धिया सरलतया सामवैदिकस्वरसंज्ञापरिभाषाणामुपस्थापनं विहितमस्ति ।

**सा चामश्च तत्साम्नः सामत्वम्** इति ऋगक्षराणि तत्र गानाक्षराणि च कृत्वा सामवेदसंहिता गानसंहिता चेति व्यवहारोदृश्यते, तत्र गानसंहितायामृगक्षरातिरिक्तपदानिस्तोभवाच्यानि च सन्ति। षट्सु प्रकरणेषु विभक्तोऽस्ति, सामवेदकौथुमशाखासम्बद्धपाठ्यांशोऽयम् । स्तोभसहितसामगानाध्ययनक्रमे प्रथमं

ग्रामेगेयस्वरसंज्ञापरिभाषादयो विषयाः समाहिताः सन्ति कप्रकरणे ।अरण्येगेयापरनाम्नोरहस्यगानस्याध्ययनं सामतन्त्रस्यान्तिमेत्रयोदशप्रपाठकेलभ्यते । तस्यप्रपाठकास्याध्ययनेन समग्रसामतन्त्रगतविषयावगाहनं सुकरञ्जायत इतित्रयोदशप्रपाठकस्थविषयाः खप्रकरणे शिक्ष्यन्ते । गप्रकरणेविकृत्यात्मकानामूहोह्यगानगतानां स्तोत्रस्थानां स्वरसंज्ञाध्ययनार्थं सूत्रार्थः समुपस्थापितः ।घप्रकरणेस्तोभानां स्वरसंज्ञापरिभाषाध्ययनं विहितमस्ति । ङप्रकरणेसामप्रातिशाख्यप्रतिपादितानांस्वरसंज्ञापरिभाषादीना स्रोतोभूताःसामवेदीय-संहितोपनिषद्ब्राह्मणगताः संहितास्वरसंज्ञादिविषयाः संनिबद्धाःसन्ति । आचार्यकृतभूमिकामाध्यमेन सामगानाध्ययनाय ब्राह्मणप्रातिशाख्यावलम्विता सरणिः प्रस्तुतास्तिचप्रकरणे।प्रकरणेऽस्मिन् यथाशक्यं पारिभाषिकशब्दानामपि समावेशनं विहितमस्ति । एवंतृतीयपत्रे सामवैदिकस्वरसंज्ञादिगानाध्ययनसरणिमवधार्य तत्प्रयोगप्रवचननिपुणताभिवृद्धये पाठ्यविषयाः निर्धारिताः सन्ति ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेन छात्रा अधोलिखितविषयेषु प्रावीण्यमेष्यन्ति-

- सामवेदीयप्रातिशाख्यसामतन्त्रसम्बद्धसूत्रार्थप्रकाशने
- सामतन्त्रप्रतिपाद्यविषयोपस्थापने
- ऊहोह्यगानसम्बद्धस्वरसंज्ञापरिभाषावबोधे प्रवचने च
- स्तोभस्वरसंज्ञापरिभाषाध्ययने
- स्वरसंज्ञापरिभाषादीनामुपजीव्यब्राह्मणाध्ययने
- सामप्रातिशाख्यस्थपारिभाषिकशब्दार्थप्रबोधने गानाध्ययनसरणिज्ञाने च

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठाः |
|---|---|---|---|---|
| क | १.ग्रामेगेयस्वरसंज्ञापरिभाषाव बोधनम् | १ निर्धारिता सामतन्त्र-प्रतिपाद्यस्वरसंज्ञापरिभाषा- | १५ | २२ |

| | | | | |
|---|---|---|---|---|
| | | विषयाः | | |
| ख | सोदाहरणं सामतन्त्रीयविषयसम्बद्ध-सूत्रार्थव्याख्यानम् | सामतन्त्रत्रयोदशप्रपाठकवर्णितविषयसम्बद्धसूत्रार्थाः | २० | २८ |
| ग | सोदाहरणम् होह्यगानसम्बद्धस्वरसंज्ञापरिभाषानिरूपणम् | पुष्पसूत्रप्रथमद्वितीयप्रपाठक-सम्बद्धा निर्धारितसूत्रार्थविषयाः: | १५ | २५ |
| घ | १) सोदाहरणं स्तोभनिर्धारणम् ।<br>२) स्तोभस्वरसंज्ञापरिभाषा-निरूपणम् | १) निर्धारिता अक्षरतन्त्रसूत्रार्थाः ।<br>२) स्तोभस्वरसंज्ञापरिभाषा-सम्बद्धसूत्रार्थविषयाः । | १५ | २२ |
| ङ | सामब्राह्मणाध्ययनम् | ब्राह्मणाध्ययनसम्बद्धा निर्धारिता विषयाः | २५ | ४१ |
| च | १. प्रकृतिगानाध्यनप्रणाली<br>२.विकृतिगानाध्ययनसरणिः । | १.सामतन्त्रभूमिकास्था निर्धारिता विषयाः ।<br>२.निर्धारिताःऊहोह्यगान-भूमिकागतविषयाःपारिभाषिक शब्दाश्च । | १५ | २२ |

**४. पाठ्यवस्तुविवरणम्**

**क' प्रकरणे**

ग्रामेगेयस्वरसंज्ञापरिभाषावबोधनम्

क) ग्रामेगेयगानसम्बद्धस्वरसंज्ञाप्रतिपादकस्यसामतन्त्रस्य प्रथमप्रपाठकस्य(१-६) दशकस्य निम्नसूत्राणि-

अतिस्वारभिन्नस्वराः गीता भवन्ति (१.१.१)

आदिमध्योपान्त्यान्त्यनीचस्वरपर्वाणि (१.१.२-१०, १.२.१-३)

अनुदात्तंपदमेकवर्जम्६/१/१५८, अनुदात्तस्यचयत्रोदात्तलोपः६/१/१६१, आमन्त्रितस्यच६/१/१९८, सुवामन्त्रितेपराङ्गवत्स्वरे२/१/२, उदात्तस्वरितयोर्यणःस्वरितोऽनुदात्तस्य८/२/४, स्वरितोवाऽनुदात्तेपदादौ८/२/६, उदात्तादनुदात्तस्यस्वरितः८/४/६६, एकश्रुतिदूरात्सम्बुद्धौ१/२/३३, यज्ञकर्मण्यजपन्यूङ्खसामसु१/२/३४, उच्चैस्तरांवावषट्कारः१/२/३५, देवब्रह्मणोरनुदात्तः१/२/३८, स्वरितात्संहितायामनुदात्तानाम्१/२/३९, उदात्तस्वरितपरस्यसन्नतरः१/२/४०, धातोः६/१/१६२, अभ्यस्तानामादिः६/१/१८९, अनुदात्तेच६/१/१९०, चङ्यन्यतरस्याम्६/१/२१८, चतुरःशसि६/१/१६७, झल्युपोत्तमम्६/१/१८०, सर्वस्यसुपि६/१/१९१, पथिमथोःसर्वनामस्थाने६/१/१९९, युष्मदस्मदोर्ङसि६/१/२११, ङयिच६/१/२१२, अन्तोऽवत्याः६/१/२२०, ईवत्याः६/१/२२१, फिषोऽन्तउदात्तः (फि.सू. १), पाटलापालङ्काम्बासागरार्थानाम् (फि.सू. २), ध्यपूर्वस्यस्त्रीविषयस्य (फि.सू. ५), खान्तस्याश्मादेः (फि.सू. ६), दक्षिणस्यसाधौ (फि.सू. ८), स्वाङ्गाख्यायामादिर्वा (फि.सू. ९), घृतादीनाञ्च (फि.सू. २१), ज्येष्ठकनिष्ठयोर्वयसि (फि.सू. २२), स्वाङ्गशिटामदन्तानाम् (फि.सू. २९), ग्रामादीनाञ्च (फि.सू. ३८), त्र्यचांप्राङ्मकारात् (फि.सू. ५१), स्वाङ्गानामकुर्वादीनाम् (फि.सू. ५२), पान्तानांगुर्वादीनाम् (फि.सू. ५५), युतान्यण्यन्तानाम् (फि.सू. ५६), त्वत्त्वसमसीमेत्यनुच्चानि (फि.सू. ७८), निपाताआद्युदात्ताः (फि.सू. ८०), प्रकारादिद्विरुक्तौपरस्यान्तउदात्तः (फि.सू. ८६),

शेषंसर्वमनुदात्तम् (फि.सू. ८७), आद्युदात्तश्च३/१/३, अनुदात्तौसुप्पितौ३/१/४, चितः६/१/१६३, तद्धितस्य६/१/१६४, कितः६/१/१६५, उदात्तयणोहल्पूर्वात्६/१/१७४, ङ्याश्छन्दसिबहुलम्६/१/१७८, तित्स्वरितम्६/१/१८५, समासस्य६/१/२२३, गधलवणयोःप्रमाणे६/२/४, द्विगौप्रमाणे६/२/१२, स्वंस्वामिनि६/२/१७, पूर्वेभूतपूर्वे६/२/२२, सङ्ख्या६/२/३५, गौःसादसादिसारथिषु६/२/४१, अहीनेद्वितीया६/२/४७, तृतीयाकर्मणि६/२/४८, कतरकतमौकर्मधारये६/२/५७, राजाचप्रशंसायाम्६/२/६३, आदिरुदात्तः६/२/६४, गोबिडालसिंहसैन्धवेषूपमाने६/२/७२, गोतन्तियवंपाले६/२/७८, कुमार्यांवयसि६/२/९५, सभायांनपुंसके६/२/९८, शृङ्गमवस्थायाञ्च६/२/११५, तत्पुरुषेशालायांनपुंसके६/२/१२३, अकर्मधारयेराज्यम्६/२/१३०, देवताद्वन्द्वेच६/२/१४१, कृत्योकेष्णुच्चार्वादयश्च६/२/१६०, सङ्ख्यायाःस्तनः६/२/१६३, द्वित्रिभ्यांपाद्दन्मूर्धसुबहुव्रीहौ६/२/१९७, तिङोगोत्रादीनिकुत्सनाभीक्ष्ण्ययोः८/१/२७, पूजायांनान्तरम्८/१/३७, लोपेविभाषा८/१/४५, शेषेविभाषा८/१/५०, चादिलोपेविभाषा८/१/६३, तिङ्चोदात्तवति८/१/७१इति।

६. शिक्षणविधयःशैक्षिकसामग्रीच

निगमनाऽऽगमन-प्रश्नोत्तर-प्रवचन-विमर्श-प्रदर्शनात्मक ाद्याःशिक्षणविधयएवात्रप्रयुज्यन्ते।सतिसम्भवेशिक्षकैस्तदितरा अन्वेषणपरियोजन ा-प्राक्कल्पनादयश्छात्रकेन्द्रिताअन्येविधयोऽपिप्रयोक्तुंशक्यन्ते।यथासम्भवं शिक्षकैःकेवलंमार्गंनिर्दिश्यस्वयमेवशिक्षणायछात्राःप्रेरणीयाः।विषयानुसारेणसमुचितानांविविधानांश्रव्यदृश्यशैक्षिक-

सामग्रीणांप्रयोगोविधेयः।तद्व्यवस्थासम्बद्धशिक्षकेणविभागेनविद्यापीठेनवा विधेया।साम्प्रतंदूरशिक्षणमपिप्रचलितंविद्यते ।तदर्थंसङ्गणकयन्त्राणिप्रयुज्यन्ते।शिक्षकप्रशिक्षणव्यवस्थाऽपितत्राऽपेक्षते।तदर्थंविश्वविद्यालयेनविद्यापीठेनवाव्यवस्था विधेया।

७. मूल्याङ्कनविधिः

मूल्याङ्कनंद्विधाविभक्तमस्ति– आन्तरिकं (निर्माणात्मकं) बाह्यं (निर्णयात्मकं) च।आन्तरिकमूल्याङ्कनंप्रायेणकक्षागतंभवति।कक्षायांपठनपाठनोपस्थित्यादिकंविलोक्यसम्बद्धशिक्षकेणविभागसमन्वितकार्ययोजनायाम्आन्तरिक-मूल्याङ्कनंविधीयते । गृहकार्यं, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानिसाधनान्यपितन्मूल्याङ्कनस्या धाराभवितुंशक्नुवन्ति। आन्तरिकमूल्याङ्कनस्य कृतेपञ्चविंशतिप्रतिशदङ्कानिर्धारिताः। बाह्यमूल्याङ्कनस्य तुवर्षान्तेबाह्यपरीक्षा भवति। प्रश्नपत्रेबाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तुनियमितच्छात्राणां कृतेपरीक्षाफल–प्रकाशनात्पूर्वंसम्बद्ध-विद्यापीठेनप्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां ने.सं.वि. परीक्षानियन्त्रणकार्यालयेनाऽनुपातपद्धत्या संयोजनं विधीयते।

बाह्यपरीक्षायांमूल्याङ्कनायाऽङ्कवितरणेनसहैवाऽधोनिर्दिष्टाः प्रश्नप्रकारा–निर्धारिताः सन्ति । साधारणतयाबाह्यपरीक्षा–लेखात्मिकैव भवति, परन्तुपरिस्थितिवशात्सापरीक्षाअन्तर्वार्तादिनापिसिद्ध्यति।

वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसारिणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क,ख,ग,घ,ङ,च | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २×१२ | २४ |

| | | | | |
|---|---|---|---|---|
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६×७ | ४२ |
| | व्याख्यात्मकाः | ४ | ३×८ | २४ |
| | वस्तुगताः | १० | १०×१ | १० |
| | | २६ | २१ | १०० |

८. पाठ्यसूची

क) पाठ्यग्रन्थौ

१. निरुक्तम् (यास्कप्रणीतम्, निघण्टुसहितम्, १-३ अध्यायान्तम्) ।

२. भट्टोजिदीक्षितप्रणीतायाःसिद्धान्तकौमुद्याःस्वरवैदिकप्रक्रिये।

ख) सहायकग्रन्थाः

१. निघण्टु-निर्वचनम् (देवराजयज्वविरचितम्), सम्पा. डा. सुद्युम्नाचार्य, संशोधक : विजयपाल विद्यावारिधि, रामलाल कपूर ट्रस्ट, हरियाणा, वि.सं. २०५५ ।

२. निरुक्तभाष्यटीका(स्कन्दस्वामी र महेश्वरविरचित, १-३ भाग), सम्पा. लक्ष्मणस्वरूप एम. ए., पञ्जाब विश्वविद्यालय, लाहोर, सन् १९२७, १९३१ र १९३४ ।

३. निरुक्तम्(छज्जूराम-देवशर्मशास्त्रिभ्यां संक्षेपितया दुर्गाचार्यसंस्कृतटीकया विभूषितम्), मेहरचन्द लछमनदास पब्लिकेशन्स्, नई दिल्ली, सन् १९९३ ।

४. निरुक्तम् (दुर्गाचार्यवृत्तियुतम्),क्षेमराज-श्रीकृष्णदास, वेङ्कटेश्वरयन्त्रालय, मुम्बयी, वि.सं. १९६८ ।

५. वैदिक व्याकरण(१-२ भाग), लेखक : डा. रामगोपाल, नेशनल पब्लिशिंग हाउस, दिल्ली, सन् १९६५ र १९६९ ।

६. वैदिक-स्वरमीमांसा,युधिष्ठिर मीमांसक, रामलाल कपूर ट्रष्ट, अमृतसर, प्रथम संस्क. वि.सं. २०१४ ।

७. सरस्वतीकण्ठाभरणम्,सम्पा. ति.रा. चिन्तामणि, मद्रास विश्वविद्यालय, मद्रास, सन् १९३७ ।
८. सिद्धान्तकौमुदी(तत्त्वबोधिनीटीकया सहिता), मेहरचन्द लछमनदास, नई दिल्ली, सन् १९८५ ।
९. सिद्धान्तकौमुदी(बालमनोरमाटीकयातत्त्वबोधिन्याचसमेता),मोती लालबनारसीदास, दिल्ली, सन् १९९७ ।
१०. सिद्धान्तकौमुदी (वैदिकी प्रक्रिया), सम्पा. डा. उमाशङ्कर शर्मा ऋषि,चौखम्बा विद्याभवन, वारा., सन् १९९४।
११. स्वरप्रक्रियाप्रकाश, वामदेव मिश्र, चौखम्बा विद्याभवन, वाराणसी, सन् १९९९ ।

# नव्यव्याकरणम्

**पाठ्यांशनाम** – पातञ्जलसिद्धान्तः नैयायिकाभिमतप्रमाणानि च।

**पाठ्यांशसङ्केतः** – न.व्या.४०१

**स्तरः** – शास्त्री

**पूर्णाङ्काः** – १००

**वर्षम्** – द्वितीयम्

**वार्षिकः पाठ्यभारः** – १६० घण्टाः

**पत्रम्** – तृतीयम्

**साप्ताहिकः पाठ्यभारः** – ६

**१. पाठ्यांशपरिचय ः-**

पञ्चप्रकरणयुतोऽयं पाठ्यांशः। अयं नव्यव्याकरणविषयमाधृत्य शास्त्रीप्रथमखण्डं समुत्तीर्णानां छात्राणां कृते शास्त्रिद्वितीयवर्षस्य तृतीयपत्रत्वेन निर्धारितो वर्तते।

अत्र **कख**प्रकरणयोः पातञ्जलमहाभाष्यान्तर्गतप्रथमद्वितीयाह्निकस्था विषयाः सन्ति निर्धारिताः। पदसाधुत्वबोधने सारल्येन यादृशं व्यवस्थितं स्वरूपं पाणिनीयव्याकरणस्य विद्यते न तादृशमन्यस्य। अत एव सर्वदर्शनेषु अस्य वैशिष्ट्यमप्रतिमम्। तत्र पाणिनीयसूत्राणां व्याख्यायकः पतञ्जलिः। सूत्रक्रमानुसारिव्याख्यानं महाभाष्यम्। यतः सर्पो मणिं विना स्वमहत्त्वाधायकं जीवनं धर्तुं न समर्थः, तद्वदेव-इदमपि सर्वोपकारकं व्याकरणशास्त्रं मणितुल्यं पातञ्जलमहाभाष्यव्याख्यानं विना नैवाऽसदिग्धार्थस्वरूपं बोधयितुमर्हति। अत एव पतञ्जलिप्रणीतस्य महाभाष्यस्य पस्पशाह्निकतः प्रत्याहाराह्निकपर्यन्तं निरूपितानां विषयाणां समावेशोऽत्र विद्यते।

तथैव **गघङ**प्रकरणेषु न्यायसम्बद्धानामनुमानोपमानशब्दप्रमाणानां सलक्षणोदाहरणव्याख्यानेन प्रमाणनिरूपणमत्र विधीयते। अनुमानप्रमाणे पूर्वपक्षसिद्धान्तव्याप्ति-हेत्वाभासस्य विशेषतो विवेचनीयविषयात्र सङ्ग्रहो विद्यते।

**२. पाठ्यांशसामान्योद्देश्यानि-**

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोऽङ्कितेषु विषयेषु प्रावीण्यं समर्जयिष्यन्ति-

- व्याकरणाध्ययनस्य मुख्यानुषङ्गिकप्रयोजनप्रतिपादने,
- अक्षरसमाम्नायस्थवर्णानामुपदेशप्रयोजनप्रतिपादने।

- व्याकरणदर्शनस्यमूलभूतत्त्वानां शब्दनित्वानित्यत्वशब्दप्रयोगधर्माधर्मशब्दस्वरूपस्फोटध्वन्यादि-परिचयसम्बद्धविषयाणामुपस्थापने।
- महाभाष्यकारस्य पतञ्जलेर्विषयविवेचनशैल्या वैशिष्ट्यख्यापने।
- विपक्षमतनिरसनपूर्वकं न्यायसिद्धान्तानुसारेणानुमानोपमानशब्दप्रमाणानां विवेचने।
- लक्षणपरिष्करणे, तत्राव्याप्त्यतिव्याप्त्यसम्भवदोषाणां निराकरणे च।

| **प्रकरणानि** | **प्रकरणगतविशेष्टोद्देश्यानि** | **पाठ्यांशविषयाः** | **अङ्काः** | **घण्टाः** |
|---|---|---|---|---|
| **क** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति— व्याकरणाध्ययनस्य मुख्यानुषङ्गिकप्रयोजनप्रतिपादने, शब्दस्य नित्यानित्यत्वविवेचने, सिद्धे शब्दार्थसम्बन्धे इति वार्तिकव्याख्याने, व्याकरणपदार्थविवेचने, वर्णसमाम्नायस्य प्रयोजनप्रतिपादने, स्फोटध्वन्यादिपरिचयविषये पातञ्जलशैल्याः स्वरूपनिरूपणे च। | व्याकरणमहाभाष्यस्य पस्पशाह्निकस्था विषयाः | २० | ३२ |
| **ख** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति— वर्णसमाम्नायस्थस्याकारस्य विवृतोपदेशस्य प्रयोजनप्रतिपादने, वर्णसमाम्नाये जातिपक्षसिद्धान्तस्योपस्थापने, हकारस्य द्विरुपदेशप्रयोजननिरूपणे, | व्याकरणमहाभाष्यस्य प्रत्याहाराह्निकस्था विषयाः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | सन्ध्यक्षरेषु अतपरत्वनिर्णये, वर्णानामर्थवत्वाऽनर्थकत्वविवेचने, अणिण्सूत्रयोर्णकारानुबन्धप्रयोजन-निरूपणे अक्षरसमाम्नायोपदेशप्रयोजनप्रतिपादने च। | | | |
| **ग** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति— अनुमितिनिरूपणे, परामर्शस्वरूपरिचायने, परमतनिराकरण-पूर्वकमनुमितिपरामर्शयोः कार्यकारणभावस्थापने, पूर्वपक्षव्याप्तेः स्वरूपप्रदर्शने, सिद्धान्तपक्षव्याप्तेः स्वरूपनिरूपणे, सिद्धान्तव्याप्तिलक्षणघटकपदानां प्रयोजनप्रदर्शने च। | न्यायसिद्धान्तमुक्तावल्या-अनुमानखण्डस्य आरम्भतः सिद्धान्त-व्याप्तिनिरूपणान्तर्गता विषयाः | २० | ३२ |
| **घ** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति—पक्षतायाः स्वरूपनिरूपणे, सभेदं हेत्वाभासस्वरूपविश्लेषणे, हेत्वाभाषभेदप्रतिपादने, उपमानप्रमाणस्य सोदाहरणं विवेचने च | न्यायसिद्धान्तमुक्तावल्यापक्षता-हेत्वाभासोपमान-निरूपणान्तर्गता विषयाः | २० | ३२ |
| **ङ** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति— शब्दशक्तिविषयकमतविश्लेषणे, सोदाहरणानां शक्तिग्राहकाणां परिचयोपस्थापने, | न्यायसिद्धान्तमुक्ता-वल्याशब्दखण्डस्था विषयाः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | जातिव्यक्तिवादीनां मतसमीक्षणे, समतभेदं सोदाहरणञ्च लक्षणाभेदनिरूपणे, शाब्दबोधप्रकारविवेचने, शाब्दबोधकाराणानां परिचयप्रदाने च । | | | |

## ४. पाठ्यवस्तुविवरणम्

### क प्रकरणे–

पस्पशाह्निके– व्याकरणाध्ययनस्य साक्षात्प्रयोजनप्रतिपादनम्, शब्दस्य द्वैविध्यं प्रतिपाद्य गौरिति विज्ञाने प्रतिभासमानेषु वस्तुप्रक्रियादीन् निरस्य व्याकरणसिद्धान्ते **शब्दः क** इति विश्लेषणम्, ध्वनिस्वरूपम्, व्याकरणाध्ययनस्य रक्षोहागमलघ्वसन्देहाः प्रयोजनमित्यस्य व्याख्यानम्, तस्य आनुसङ्गिकानि प्रयोजनानि तेऽसुरा इत्यादीनि, अपशब्दोपदेश निराकरणेन साधुशब्दोपदेशनिर्धारणम्, शब्दप्रतिपत्तौ उत्सर्गापवादभावे एव लाघवप्रतिपादनम्, शब्दनित्यत्वानित्यत्वविचारः, सिद्धे शब्दार्थसम्बन्धे इति वार्तिकव्याख्यानम्, शास्त्रस्य नैरर्थक्यनिराकरणम्, शास्त्राध्ययनेन धर्मोत्पत्तिनिरूपणम्, शब्दार्थज्ञाने धर्मः ? उत प्रयोगे वा ? इति, शब्दस्य महान् प्रयोगविषय इति प्रदर्शनम् । कः व्याकरणपदार्थः ? इति विवेचनम्, वर्णानामुपदेशप्रयोजनम्, वर्णेषु जात्युपदेशनिरूपणञ्च ।

### ख प्रकरणे–

प्रत्याहाराह्निके– अकारस्य विवृतोपदेशनिरूपणम्, वर्णसमाम्नाये जातिपक्षनिरूपणम्, लृकारोपदेशस्य प्रयोजनम्, सन्ध्यक्षरेषु अतपरत्वस्थापनम्, वर्णदेशग्रहणाग्रहणनिर्णयः, हकारस्य द्विरुपदेशप्रयोजनम्, रेफस्योपदेशस्य निर्णयः, अयोगवाहानां स्वरूपं तदुपदेशनिर्धारणञ्च, वर्णानामर्थवत्वानर्थकत्वविवेचनम्, प्रत्याहारेषु अनुबन्धानां ग्रहणाभावविचारः, अणिणप्रत्याहारेषुणग्रहणस्य प्रमाणप्रदर्शनम्, अक्षरशब्दस्वरूपविवेचनम्, वर्णसमाम्नायोपदेशप्रयोजनम्, माहेश्वरसूत्राणां व्याख्यानञ्च ।

### ग प्रकरणे–

प्रत्यक्षनिरूपणानन्तरमनुमितिनिरूपणे सङ्गतिप्रदर्शनम्, अनुमितिलक्षणविवेचनम्, व्याप्तिपरामर्शानुमितिषु क्रमव्युत्पादनम्, अनुमितिपरामर्शयोः कार्यकारणभावव्यवस्थापनम्,

परार्थानुमाने पञ्चावयववाक्यस्य कारणत्वप्रदर्शनम्, अनुमितौ ज्ञायमानलिङ्गस्य करणत्वस्वीकर्तुर्मतखण्डनम्, परामर्शविषये मीमांसकमतमुद्भाव्य तत्खण्डनम्, स्वमतस्थापनम्, पूर्वपक्षव्याप्तिलक्षणनिर्वचनम्, तत्रत्यानां पदानां प्रयोजननिरूपणम्, तत्र दोषोद्भावनेन सिद्धान्तव्याप्तेरवतरणम्, सिद्धान्तव्याप्तेः स्वरूपेण समन्वयात् घटः सत्तावान् जातेरित्यादौ पूर्वपक्षव्याप्तिलक्षणसङ्गमनदोषनिराकरणम्, चालनीयन्यायेनाऽभावमादाय सद्हेतावव्याप्तिप्रदर्शनम्, तद्वारणायावच्छेदकत्वानुसरणबीजोद्घाटनम्, एवमेव सिद्धान्तव्याप्तिलक्षणपरिष्कारः, सिद्धान्तव्याप्तिलक्षणघटकपदानां प्रयोजनप्रदर्शनञ्च।

**घ प्रकरणे–**

सिद्धान्तव्याप्तेः निरूपणनन्तरं पक्षतानिरूपणे सङ्गतिप्रदर्शनपुरस्सरं पक्षतास्वरूपविवेचनम्, पक्षतालक्षणस्य सपदकृत्यं परिष्कारः, पक्षताया अनन्तरं हेत्वाभासस्य निरूपणे सङ्गतिं प्रदर्श्य हेत्वाभासशब्दव्युत्पत्तिविचारः, सभेदं तस्य वर्णनम्, हेत्वाभासलक्षणघटकान्यपदप्रयोजनप्रदर्शनम्, तल्लक्षणघटकपदानामर्थनिरूपणम्, सोदाहरणं पञ्चविधानां हेत्वाभासानां स्वरूपविवेचनम्, हेत्वाभासविशेषेषु हेत्वाभासलक्षणसमन्वयप्रकारः, साधारणाऽसाधारणानुपसंहारिभेदेन सव्यभिचारस्य भेदत्रयनिरूपणम् । विरुद्धाश्रयसिद्धिस्वरूपसिद्धिव्याप्यत्वासिद्धिसत्प्रतिपक्षबाधादिहेत्वाभासानां कारिकानुसारेण लक्षणोदाहरणप्रदर्शनञ्च।

अनुमाननिरूपणोत्तरम्– उपमाननिरूपणे सङ्गतिप्रदर्शनम्, उपमानस्यातिरिक्तप्रमाणत्वव्यवस्थापनम्, उपमितेः स्वरूपनिर्वचनेन द्वैविध्यत्वप्रतिपादनम्, तस्य सोदाहरणं विवेचनञ्च।

**ङ प्रकरणे–**

उपमानान्तरं शब्दनिरूपणे सङ्गतिनिरूपणेन सह शाब्दबोधस्य करणव्यापारादीनां प्रतिपादनम्, शक्तेः स्वरूपविचारः, शक्तिग्रहोपायवर्णनम्, वैयाकरणादीनां मतेन शक्त्याश्रयत्वं प्रतिपाद्य नैयायिकमतेन प्रत्याख्यानम्, जातिशक्तिवादिमतनिरसनपूर्वकं व्यक्तिशक्तिवादिमतविवेचनम्, सिद्धान्तमतनिरूपणम्, पदस्य लक्षणम्, तस्य प्रकाराश्च, लक्षणाया भेदाः, तदुदाहरणञ्च, वाक्यलक्षणाखण्डनम्, आसत्ति–योग्यता– आकाङ्क्षा– तात्पर्यज्ञानानां शाब्दबोधे कारणत्वनिरूपणम्, तात्पर्यज्ञानार्थमीश्वरसिद्धिविचाराश्च।

**५. शिक्षणविधिक्रियाकलापश्च**

अस्य पाठ्यांशस्य शिक्षणे संस्कृते बहुप्रचलिता निगमागमव्याख्यानप्रवचनप्रश्नोत्तरात्मकाः विधय एव आवश्यकतानुसारेण यथायथं प्रयोक्तव्याः। कक्षायां शिक्षकेण सह छात्रानपि सक्रियान् विधाय विषयवस्तुबोधाय विषयविश्लेषणाय च छात्राः समुत्प्रेरणीयाः । यथायथं शिक्षणोपकरणानां प्रयोगं विधाय शिक्षणप्रक्रियायां सारल्यमानेतव्यम्। आवश्यकतामाकलय्य यथासमयं विश्वविद्यालयो दूरशिक्षणपद्धतेः प्रयोगाय योजनामग्रेसारयितुं शक्नोति। तस्य कृते वैद्युतोपकरणानां प्रयोगोऽपि समपेक्ष्यते।

## ६. मूल्याङ्कनम्–

पाठ्यक्रमममुमधीयानानां छात्राणां मूल्याङ्कनं द्विविधया पद्धत्या विधीयते । विंशत्यङ्कानां मूल्याङ्कनमान्तरं निर्माणात्मकं वा भविष्यति चेत्तर्हि असीत्यङ्कानां मूल्याङ्कनं वार्षिकलेखपरीक्षामाध्यमेन विधास्यते । निर्माणात्मकमूल्याङ्कनस्य वार्षिकमूल्याङ्कनस्य च निर्देशिका परीक्षानियन्त्रणकार्यालयस्य समन्वयेन यथासमयं प्रकाशयिष्यते।

### (क) आन्तरिकमूल्याङ्कनयोजना–

| शीर्षकम् | अङ्काः |
|---|---|
| उपस्थितिः | ३ |
| कक्षाकार्यकलापः | ३ |
| प्रतिवेदनलेखनम्, परियोजनाकार्यञ्च | ६ |
| आन्तरिकी परीक्षा | ८ |
| योगः | २० |

### (ख) बाह्यमूल्याङ्कनयोजना–

| क्र.सं. | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नाः | समाधेयाः प्रश्नाः | अङ्कभारः | अङ्काः |
|---|---|---|---|---|---|
| १. | विवेचनात्मकाः | ३ | २ | १२ × २ | २४ |
| २. | व्याख्यानात्मकाः | ५ | ३ | ८ × ३ | २४ |

| | | | | | |
|---|---|---|---|---|---|
| ३. | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ × ६ | ४२ |
| ४. | वस्तुगताः | १० | १० | १ × १० | १० |
| | **योगः** | **२७** | **२१** | | **१००** |

## पाठ्यग्रन्थसूची

### (क) पाठ्यग्रन्थौ

१. पतञ्जलिः, **व्याकरणमहाभाष्यम्** (पस्पशाह्निकप्रत्याहाराह्निके) दिल्ली : मोतीलाल वनारसीदासः, ई. १९६७ ।

२. विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली,** (अनुमानखण्डतः शब्दखण्डपर्यन्तम्) पञ्चमं संस्करणम्, वाराणसी : चौखम्भा संस्कृत संस्थानम्, संवत् २०४५ ।

### (ख) सन्दर्भग्रन्थाः

१. विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली**, अनुमानखण्डतः शब्दखण्डपर्यन्तम्, पञ्चमं संस्करणम्, वाराणसी : चौखम्भा संस्कृतसंस्थानम्, संवत् २०५२ ।

२. अन्नम्भट्टः, **तर्कसङ्ग्रहः** दीपिकाकिरणावलीन्यायबोधिनीपदकृत्यटिप्पण्यादिसहितः, वाराणसी : व्यासप्रकाशनम् ।

३. भट्टोजिदीक्षितः, **वैयाकरणसिद्धान्तकौमुदी**, बालमनोरमात!वबोधिनीसहिता, वाराणसी : मोतीलाल, वनारसीदासः, ई १९६५ ।

# नव्यव्याकरणम्

**पाठ्यांशनाम** –नागेशाभिमतवृत्त्यर्थादिकम्। **पाठ्यांशसङ्केतः** – न.व्या.४०२

**स्तरः** – शास्त्री **पूर्णाङ्काः** – १००

**वर्षम्** – द्वितीयम् **वार्षिकः पाठ्यभारः** – १६० घण्टाः

**पत्रम्** – चतुर्थम् **साप्ताहिकः पाठ्यभारः** – ६

## १. पाठ्यांशपरिचय :-

लोकव्यवहारस्य शब्दाधीनत्वमेव विदितं प्रेक्षावताम् । अत एवोच्यते- इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते। इति। तत्रापि शब्दे इयं प्रकृतिरयं प्रत्यय इति विविच्य प्रकृतिप्रत्ययविभागपूर्वकं तत्तदर्थस्य व्युत्पत्तिर्विना व्याकरणेन न सम्भवति। अतोऽर्थावबोधनं पदपदार्थज्ञानेनैव परिस्फुरति। यथा च प्रत्यक्षप्रमाणेन लोकव्यवहारे अर्थमधिगत्य तत्र हेयोपादेयविषयेषु ज्ञातेषु प्रवर्तते निवर्तते च व्यवहारिकपुरुषः परीक्षकश्च। तत्र यद्यपि प्रवृत्तिनिवृ!योर्मुख्यं कारणं हेयोपादेयपदार्थस्याधिगतिरेव, तथापि सा शब्दशास्त्राधीनैव । शब्दशास्त्रमपि शक्तिव्यञ्जनादिना नियमबद्ध एव स्वार्थप्रत्यायने समर्थः । अत एव व्याकरणेऽर्थगतसिद्धान्तविवेचने प्रसिद्धाप्रसिद्धाशक्तिव्यञ्जनादिभिः सह शाब्दबोधसहकारिकारणबोधको नागेशभट्टविरचितः परमलघुमञ्जूषानामकः सम्पूर्णो ग्रन्थोऽत्र पाठ्यांशरूपेण स्थापितो वर्तते।

## २. पाठ्यांशस्य सामान्योद्देश्यम्

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधो निर्दिष्टविषयेषु प्रावीण्यमेष्यन्ति।

- शक्तिलक्षणाव्यञ्जनाविवेचने,
- स्फोटनिरूपणे,
- आकाङ्क्षादिशाब्दबोधकारणपरिचायने,
- धात्वर्थनिरूपणे,
- आकाङ्क्षादिशाब्दबोधकारणविवेचने,
- निपाताद्यर्थनिरूपणे,
- दशलकारार्थव्याख्याने,
- नामार्थसमासवृ! यर्थनिरूपणे च।

### ३. पाठ्यांशस्य विशिष्टोद्देश्यानि, पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | विशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | परमलघुमञ्जूषाकारस्य नागेशभट्टस्य परिचयप्रदानम्, स्फोटभेदनिरूपणम्, वाक्यस्फोटस्य मुख्यत्वप्रतिपादनम्, शाब्दबोधे कार्यकारणभावप्रदर्शनम्, तार्किकमतेन शक्तिस्वरूपनिरूपणम्, ईश्वरसङ्केतस्य शक्तित्वनिरसनम्, वैयाकरणमतेन शक्तिस्वरूपस्थापनम्, तादात्म्यस्वरूपप्रतिपादनम्, शब्दानां बौद्धार्थत्वप्रतिपादनम्, अपभ्रंशेषु शक्तिनिरूपणम्, तार्किकमतखण्डनप्रक्रियानिदर्शनम्, शक्तेस्त्रैविध्यप्रतिपादनम्, संयोगादीनां शक्तिनियामकत्वनिरूपणञ्च । | परमलघुमञ्जूषायाः शक्तिनिरूपणप्रकरणस्था विषयाः । | २० | ३२ |
| ख | तार्किकमतेन लक्षणास्वरूपप्रदर्शनम्, तस्या द्वैविध्यप्रतिपादनम्, लक्षणायास्तात्स्थ्यादिनिमित्तकत्व-निरूपणम्, लक्षणायां तात्पर्यानुपपत्तेर्बीजत्वप्रदर्शनम्, जहदजहल्लक्षणास्वरूपप्रतिपादनम्, | परमलघुमञ्जूषायाः लक्षणा–व्यञ्जना–स्फोट–आकाङ्क्षा–योग्यता–आसत्ति–तात्पर्य–प्रकरणस्था विषयाः । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | मीमांसकमतेन लक्षणायाः स्वरूपभेदप्रतिपादनम्, स्वमतेन लक्षणाप्रत्याख्यानविधिविवेचनम्, व्यञ्जनास्वरूपनिरूपणम्, वर्णस्फोटवादिमीमांसकमतप्रत्याख्यानप्रकार-निरूपणम्, वाचश्चतुर्विधत्वप्रतिपादनम्, ध्वनेर्द्विविधत्वप्रदर्शनम्, स्फोटस्य वाचकत्वप्रदर्शनम्, शाब्दबोधकारणानां स्वरूपनिरूपणञ्च । | | | |
| ग | धात्वर्थविचारे फललक्षणनिदर्शनम्, व्यापारलक्षणनिरूपणम्, व्यापारमुख्यविशेष्यकशाब्दबोधप्रदर्शनम्, धात्वर्थविषये वैयाकरणमतप्रतिपादनम्, मीमांसकमतखण्डनप्रकारनिरूपणम्, सत्तायाः क्रियात्वनिरूपणम्, अस्त्यादिधात्वर्थविवेचनम्, सकर्मकत्वाऽकर्मकत्वव्यवस्थापनम्, लकाराणां कृतौ शक्तिः, इति तार्किकमतखण्डनप्रकार-प्रदर्शनम्, आख्यातार्थे धात्वर्थस्य विशेषणत्वनिराकरणम्,तार्किकाभिमतप्रथमान्तार्थमुख्य-विशेष्यकशाब्दबोध- | परमलघुमञ्जूषायाः धात्वर्थनिरूपण-प्रकरणस्था विषयाः । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | निराकरणप्रकारविवेचनम्, धात्वर्थव्यापारस्य प्राधान्यनिरूपणञ्च। | | | |
| **घ** | उपसर्गाणां द्योतकत्वसमर्थनम्, निपातोपसर्गार्थविषयकनैयायिकमत समीक्षणम्, उपसर्गाणां द्योतकत्वविषये तार्किकमतविवेचनम्, इवार्थनिर्धारणम्, मतान्तरप्रत्याख्यानपूर्वकं चन्द्रइव मुखमित्यादौ स्वसदृशे लक्षणेति विषयप्रतिपादनम्, इवशब्दस्योपमानद्योकत्वप्रदर्शनम्, नञो द्वैविध्यनिरूपणम्, एवशब्दार्थप्रदर्शनम्, नियमस्यान्यनिवृत्तिफलकत्वनिरूणम्, लादेशार्थस्य परिगणनम्, वर्तमानकालत्वविवेचनम्, लिङर्थस्य विवेचनम्, परोक्षत्वविवेचनम्, लुट्लृट्तिङर्थव्याख्यानम्, लेटलोट्लङामर्थनिर्धारणम्, मतभेदप्रदर्शनपूर्वकं लिङर्थनिरूपणम्, लुङ्लृङोरर्थनिरूपणम्, लकारार्थनिरूपणे नैयायिकमतसमीक्षणञ्च। | परमलघुमञ्जूषाया निपातार्थ-दशलकारादेशार्थ-प्रकरणस्था विषयाः। | २० | ३२ |
| **ङ** | कारकाणां | परमलघुमञ्जूषाया | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | षड्विधत्वपरिगणनप्रकारनिरूपणम्, तार्किकमतनिराकरणपूर्वकं कर्तृत्वकर्मत्वलक्षणपरिष्करणम्, सकर्मकत्वाऽकर्मकत्वनिर्वचनम्, साधकतमत्व-सम्प्रदानत्वनिरूपणम्, सभेदाधिकरणत्वनिर्वचनम्, षष्ठ्यर्थनिरूपणम्, जातिशक्तिवादिमीमांसकमतोपन्यसनम्, मीमांसकमतप्रत्याख्यानम्, व्यक्तावपि शक्तिसमर्थनम्, लिङ्गस्य नामार्थत्वप्रतिपादनम्, संख्याया नामार्थत्वप्रतिपादनम्, अनुकार्यत्वानुकरणत्वयोः स्वरूपनिर्वचनम्, समासवृत्त्यर्थनिरूपणम्, वृत्तेर्द्विविधत्वप्रदर्शनम्, व्यपेक्षावादिनां नैयायिकमीमांसकानां मतसमीक्षणम्, व्यपेक्षापक्षे गौरवप्रदर्शनम्, एकार्थीभावपक्षस्यौचित्यसमर्थनञ्च । | कारकसमासादिवृत्त्यर्थ-निरूपणप्रकरणस्था विषयाः । | | |

## ४. पाठ्यवस्तुविवरणम्

**क प्रकरणे-**

परमलघुमञ्जूषाकारस्य नागेशस्य परिचयः, अनुबन्धचतुष्टयनिरूपणपूर्वकं परमलघुमञ्जूषाया मङ्गलपद्यम्, स्फोटभेदाः, वाक्यस्फोटस्य मुख्यत्वम्, वर्णादीनां काल्पनिकत्वम् आप्तलक्षणम्,

वाक्यस्फोटस्य मुख्यत्वे प्रमाणत्वेन न्यायभाष्यकारस्य वचनोपन्यासः, शाब्दबोधे कार्यकारणभावप्रदर्शनम्, वृत्तेस्त्रिविधत्वम्, तार्किकमतेन शक्तेः स्वरूपम्, तार्किकमतव्याख्यानम्, नैयायिकमतखण्डनम् वैयाकरणमतेन शक्तिस्वरूपप्रतिपादनम्, शब्दार्थयोस्तादात्म्यम्, तादात्म्यस्वरूपम्, तादात्म्यस्य सम्बन्धत्वविषये हारिकारिकाप्रदर्शनम्, सम्बन्धस्याश्रत्वप्रतिपादनम्, तत्र प्रमाणत्वेन न्यायभाष्यकारवचनोपन्यासः, तादात्म्यस्याध्यासमूलकत्वे पातञ्जलभाष्योपन्यासः, ईश्वरसङ्केतस्य शक्तित्वनिरासः, तत्रैव श्रुत्यादिप्रामाण्यप्रदर्शनम्, तादात्म्यस्वरूपप्रतिपादनम्, तत्रैव नैयायिकाक्षेपनिराकरणम्, शब्दानां बौद्धार्थत्वप्रतिपादनम्, अपभ्रंशेषु शक्तिप्रतिपादनम्, शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वप्रदर्शनम्, अपभ्रंशेषु शक्तिभ्रमाद्बोध इति मतनिरसनम्, आर्यम्लेच्छाधिकरणम्, तार्किकमतखण्डनम्, शक्तेस्त्रैविध्यप्रतिपादनम्, संयोगादीनां शक्तिनियामकत्वनिरूपणञ्च।

**ख प्रकरणे–**

तार्किकमतेन लक्षणास्वरूपम्, लक्षणाया द्विविधत्वम्, प्रकारान्तेरणापि तस्या द्वैविध्यप्रतिपादनम्, लक्षणायास्तात्स्थ्यादिनिमित्तकत्वम्, लक्षणायां तात्पर्यानुपपत्तेर्बीजत्वप्रदर्शनम्, विभिन्नमतेन जहदजहल्लक्षणास्वरूपप्रतिपादनम्, मीमांसकमतेन लक्षणायाः स्वरूपभेदप्रतिपादनम्, स्वमतेन लक्षणाप्रत्याख्यानम्, व्यञ्जनायाः स्वरूपम्, तत्र तार्किकमतखण्डनम्, वर्णस्फोट-वादिमीमांसकमतप्रत्याख्यानम्, तत्रैव तार्किकमतप्रत्याख्यानम्, वाचश्चतुर्विधत्वम्, ध्वनेर्द्वैविध्यम्, स्फोटस्य वाचकत्वरीतिप्रदर्शनम्, आकाङ्क्षायाः स्वरूपप्रतिपादनम्, तस्याः पुरुषनिष्ठत्वप्रतिपादनम्, तस्याः स्वविषये अर्थारोपः, प्रकारान्तेरणाकाङ्क्षानिरूपणम्, नैयायिकमतेन योग्यतायाः स्वरूपप्रदर्शनम्, वैयाकरणमतेन तत्प्रत्याख्यानम्, आसत्तिस्वरूपनिरूपणम्, तात्पर्यस्वरूपप्रतिपादनञ्च।

**ग प्रकरणे–**

धात्वर्थविचारे फललक्षणम्, तत्र व्यापारलक्षणम्, व्यापारमुख्यविशेष्यकबोधप्रदर्शनम्, धात्वर्थविषये स्वमतप्रतिपादनम्, तत्र मीमांसकमतखण्डनम्, क्रियालक्षणम्, भूषणकाराऽभिमतसिद्धत्वसाध्यत्वयोः स्वरूपप्रदर्शनम्, तत्रैव नागेशमतप्रदर्शनम्, सत्तायाः क्रियात्वबोधनम्, अस्त्यादिधात्वर्थविचारः सकर्मकत्वाऽकर्मकत्वप्रतिपादनम्, ज्ञाधात्वर्थनिरूपणम्, तत्रैव भूषणकारमतखण्डनम्, इषधात्वर्थप्रतिपादनम्, पतधातोः सकर्मकत्वसमर्थनम्, अर्थान्तरेऽकर्मकत्वसमर्थनम्, कृधात्वर्थत्वप्रतिपादनम्, लकाराणां कृतौ शक्तिरिति तार्किकमतखण्डनम्, आख्यातार्थे धात्वर्थस्य विशेषणत्वनिराकरणम्, तार्किकाभिमत-प्रथमान्तार्थमुख्यविशेष्यकबोधनिराकरणम्, धात्वर्थे व्यापारस्य प्राधान्यनिरूपणञ्च।

**घ प्रकरणे–**

उपसर्गाणां द्योतकत्वसमर्थनम्, निपातोपसर्गार्थविषयकं नैयायिकमतम्, उपसर्गाणां द्योतकत्वविषये तार्किकमतखण्डनम्, निपातार्थप्रकरणे इवार्थविचारः, निपातार्थविषये भूषणकारमतम्, निपातानां द्योतकत्वे समापतितदोषोद्धारः, चन्द्रइव मुखमित्यादौ चन्द्रपदस्य स्वसदृशे लक्षणेति प्रतिपादनम्, मतान्तरे लक्षणायाः प्रत्याख्यानम्, स्वमतेन इवशब्दस्योपमानताद्योकत्वप्रदर्शनम्, नञो द्वैविध्यम्, तदर्थनिरूपणम्, एवशब्दार्थप्रदर्शनम्, एव शब्दं विनापि नियमप्रतीतिः, तत्रैवालङ्कारिकमतप्रदर्शनं भागवतोद्धरणञ्च, नियमस्यान्यनिवृत्तिफलकत्वनिरूणम्, लादेशतिङामर्थनिरूपणे हेतुप्रदर्शनम्, लादेशार्थस्य परिगणनं तदन्वयप्रदर्शनञ्च, वर्तमानकालत्वविवेचनम्, लिङर्थस्य तदन्वयस्य च प्रदर्शनम्, परोक्षत्वविवेचनम्, लुट्लृट्तिङर्थविचारः, लेट्लोट्लङामर्थविचारः, लिङर्थविचारे मतभेदप्रदर्शनम्, प्रवर्तनात्वपरिष्करणम्, लुङ्लृङोरर्थनिर्णयः, मतान्तरप्रदर्शनपुरःसरं नैयायिकमतेन लकारार्थप्रदर्शनञ्च।

**ङ प्रकरणे–**

षट्कारकपरिगणनम्, क्रियानिमित्तत्वरूपकारकत्वस्य निराकरणम्, तार्किकाभिमतकर्तृत्वदूषणम्, कर्मत्वलक्षणपरिष्कारः, तार्किकाभिमतकर्मत्वलक्षणप्रत्याख्यानम्, सकर्मकत्वाऽकर्मकत्वयोर्निर्वचनम् साधकतमत्वनिरूपणम्, सम्प्रदानत्वविचारः, सम्प्रदानचतुर्थ्यर्थविवेकः, अधिकरणत्वनिर्वचनम्, अधिकरणस्य त्रिविधत्वम्, सप्तम्या अर्थनिर्वचनम्, षष्ठ्या अर्थनिरूपणम्।

नामार्थप्रकरणे जातिशक्तिवादिमीमांसकमतोपन्यासः, मीमांसकमतप्रत्याख्यानम्, व्यक्तावपि शक्तिसमर्थनम्, लिङ्गस्य नामार्थत्वम्, संख्याया नामार्थत्वम्, कारकस्य प्रातिपादिकार्थत्वम्, शाब्दबोधे शब्दभानस्य समर्थनम्, अनुकार्यत्वानुकरणत्वयोः स्वरूपनिर्वचनम्, वृत्तेर्द्वैविध्यम्, समयलक्षणमतभेदनिरसनम्, समासादिवृत्यर्थनिरूपणम्, वृत्तेर्द्विविधत्वम्, व्यपेक्षावादिनां नैयायिकमीमांसकमतखण्डनम्, व्यपेक्षापक्षे गौरवप्रदर्शनम्, एकार्थीभावपक्षस्य लाघवप्रदर्शनमूलकं समर्थनञ्च।

**५. शिक्षणविधिक्रियाकलापश्च**

अस्य पाठ्यांशस्य शिक्षणे संस्कृते बहुप्रचलिता निगमागमव्याख्यानप्रवचनप्रश्नोत्तरात्मकाः विधय एव आवश्यकतानुसारेण यथायथं प्रयोक्तव्याः। कक्षायां शिक्षकेण सह छात्रानपि सक्रियान् विधाय विषयवस्तुबोधाय विषयविश्लेषणाय च

छात्राः समुत्प्रेरणीयाः । यथायथं शिक्षणोपकरणानां प्रयोगं विधाय शिक्षणप्रक्रियायां सारल्यमानेतव्यम् । आवश्यकतामाकलय्य यथासमयं विश्वविद्यालयो दूरशिक्षणपद्धतेः प्रयोगाय योजनामग्रेसारयितुं शक्नोति । तस्य कृते वैद्युतोपकरणानां प्रयोगोऽपि समपेक्ष्यते ।

## ६. मूल्याङ्कनम्–

पाठ्यक्रममममुमधीयानानां छात्राणां मूल्याङ्कनं द्विविधया पद्धत्या विधीयते । विंशत्यङ्कानां मूल्याङ्कनमान्तरं निर्माणात्मकं वा भविष्यति चेत्तर्हि असीत्यङ्कानां मूल्याङ्कनं वार्षिकलेखपरीक्षामाध्यमेन विधास्यते । निर्माणात्मकमूल्याङ्कनस्य वार्षिकमूल्याङ्कनस्य च निर्देशिका परीक्षानियन्त्रणकार्यालयस्य समन्वयेन यथासमयं प्रकाशयिष्यते ।

**आन्तरिकमूल्याङ्कयोजना–**

| शीर्षकम् | अङ्काः |
|---|---|
| उपस्थितिः | ३ |
| कक्षाकार्यकलापः | ३ |
| प्रतिवेदनलेखनम्, परियोजनाकार्यञ्च | ६ |
| आन्तरिकी परीक्षा | ८ |
| योगः | २० |

**बाह्यमूल्याङ्कनयोजना–**

| क्र.सं. | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नाः | समाधेयाः प्रश्नाः | अङ्कभारः | अङ्काः |
|---|---|---|---|---|---|
| १. | विवेचनात्मकाः | ३ | २ | १२ × २ | २४ |
| २. | व्याख्यानात्मकाः | ५ | ३ | ८ × ३ | २४ |
| ३. | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ × ६ | ४२ |
| ४. | वस्तुगताः | १० | १० | १ × १० | १० |
| | योगः | २७ | २१ | | १०० |

## ७. पाठ्यग्रन्थसूची

### (क) पाठ्यग्रन्थः

१. नागेशभट्टः, **परमलघुमञ्जूषा**, वाराणसी : कृष्णदास आकादमी, संवत् २०४१ ।

### (ख) सन्दर्भग्रन्थः

१. नागेशभट्टः, **वैयाकरणसिद्धान्त-परमलघुमञ्जूषा,** (व्याख्या.) लोकमणिदाहालः, किरणावलीसंस्कृत-हिन्दी-व्याख्योपेता, वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्, सन् २०११ ।

२. नागेशभट्टः, **वैयाकरणसिद्धान्तलघुमञ्जूषा**, वाराणसी : सं.सं.वि.वि., वि.सं. २०४७ ।

३ भट्टोजिदीक्षितः, **वैयाकरणसिद्धान्तकौमुदी,** बालामनोरमात!वबोधिनीसहिता, वाराणसी : वासुदेव मोतीलाल वनारसीदासः, ई. १९६५ ।

४. भर्तृहरिः, **वाक्यपदीयम्,** तृतीयं संस्करणम्, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, संवत् २०४५।

५. विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली** किरणावलीव्याख्यासहिता, पञ्चमं संस्करणम्, वाराणसी : चौखम्भा संस्कृत संस्थानम्, संवत् २०५२ ।

६. कौण्डम्भट्टः, **वैयाकरणभूषणसारः,** वाराणसी : चौखम्भा संस्कृत संस्थानम्, ई. २०६४ ।

# सिद्धान्तज्योतिषम्

**पाठचांशनाम** - चापीयत्रिकोणमितिसहितं सूर्यसिद्धान्त गणितम्

**पाठचांशसङ्केतः** - सि.ज्यो.४०१

**स्तरः** - शास्त्री

**पूर्णाङ्काः** - १००

**खण्डः** - द्वितीयः

**वार्षिकपाठचभारः** - १६०

**पत्रम्** - तृतीयम्

**साप्ताहिक पाठचभारः** - ६

## १. पाठचांशपरिचयः

आधुनिकानां ज्योतिर्विदमतानुसारेण सर्वेऽपिग्रहा सूर्यं केन्द्रीकृत्य स्वगत्यानुसारं स्वकक्षासु परिभ्रमन्ति । ग्रहाणां परिभ्रमणमार्गास्तु कक्षाः कत्थन्ते । सामान्यतया ग्रहकक्षाणां स्वरूपास्तु दीर्घवृत्ताऽऽकाराः सन्ति । स्वस्वकक्षासु ग्रहाणां परिभ्रमणेन तेषांभुक्तिवशात् स्पष्टीकरणार्थमुदयास्तादि साधनार्थञ्च चापीयक्षेत्राणां निर्माणं तेषां विश्लेषणंमावश्यकतानुसारं चापक्षेत्रीयगणितञ्च परमोपयोगिकं भवति । एवमेव प्रचलित प्राचीनमान्यतानुसारेण ग्रहाणां स्पष्टकरणार्थं पञ्चाङ्ग निर्माणार्थं ग्रहणानां विश्लेषणार्थं छेद्यकानुसारं तेषां यथार्थस्थिति संदर्शनार्थञ्च सूर्यसिद्धान्तप्रतिपादित ग्रहस्पष्टीकरण त्रिप्रश्नग्रहणादीनां सोपपत्तिकं ज्ञानमपि सिद्धान्तज्योतिषंपिपठिस्यमाणानांमन्तेवासिनां कृते परमोपयोगिकं भवति । एवमेव संहिताशास्त्रानुमोदितफलवर्णने चन्द्रशृङ्गोन्नतिज्ञानं यज्ञयागादिश्रौतस्मार्तानुष्टानार्थं तथा चूडोपनयनविवाहादिसंस्कारार्थञ्च गुरुशुक्रोदयास्तसाधनञ्च परमावश्यकं भवति । एतान् सर्वानपि व्यावहारिकविषयान् सम्यगनुसृत्य शृङ्गोन्नत्युदयास्तपातादिसाधन सहितश्छेद्यकाधिकारश्च अत्र पाठचक्रमे समावेशितः । सिद्धान्तज्योतिषविषयमादाय शास्त्रिद्वितीयवर्षे पिपडिषतां छात्राणां कृते एषपाठचक्रमः सुतरामुपयोगी भविष्यतीति भशमाशास्यते।

## २. पाठचांशसामान्योद्देश्यम्

- चापीयत्रिभुजनिर्माणे तद्वैशिष्टच प्रतिपादने
- चापीयत्रिकोणमितिप्रतिपादितनिष्पत्तिसिद्धान्तानां वर्णने साध्यस्वरुपप्रतिपादने ।
- सौरोक्त ग्रहस्पष्टकरणप्रक्रियाणावासनानुशीलने ।
- दिग्देशकालानां यथार्थस्थितिनिरुपणे ।
- चन्द्रसूर्यग्रहणोपपत्तिप्रकाशने ।

- भग्रहयुतिसाधनप्रक्रियाणामौचित्यदर्शने ।
- चन्द्रशृङ्गोन्नतिसाधने पाताऽऽनयने च ।

**पाठ्यांशविशिष्टोद्देश्यम्**

अस्य पाठ्यांशस्य पठनेनच्छात्राः

- चापीयत्रिकोणसम्बद्धसिद्धान्तानां प्रतिपादने,
- सौरीयग्रहगणितस्यावबोधने, परिचयप्रदान,
- सौरोत्त-या दिग्देशकालसाधने, ग्रहहणविषयकगणितकरणे,
- नक्षत्रस्तबकानां परिचयप्रदाने, तषां दूरत्वादूरत्वनिर्धारणे च सामर्थ्यशालिनो भविष्यन्ति

## ३. पाठ्यांशस्य विशिष्टोद्देश्यं पाठ्यविषयसंयोजनञ्च

| प्रकरणगतविशिष्टोद्देश्यम | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|
| कप्रकरणे<br>चापीयत्रिकोणमिति साध्यानामुपपत्तिज्ञानम् | १. चापजात्ये एकभुजज्यया त्रिज्याया या निष्पत्तिः सैव द्वितीयभुजच्छायया द्वितीयभुजसम्मुखकोणछायाया निष्पत्तिर्भवतीति प्रतिपादनम्<br>२.चापजात्ये कर्णज्यात्रिज्ययोर्निष्पत्तिर्भुजज्याभुज सम्मुखकोणज्ययोरपि भवतीति प्रतिपादनम्<br>३. कोणकोटिज्यायास्त्रिज्याया या निष्पत्तिः सैव कोणलग्नभुजच्छायायाः कर्णच्छायाया निष्पत्तिरिति प्रतिपादनम्<br>३. चापजात्ये कर्णकोटिज्यात्रिज्ययोर्निष्पत्तिरेककोण ाकोटिच्छायाद्वितीयकोणच्छाययोर्निष | ३० | ५० |

| | | | |
|---|---|---|---|
| | पत्या समा भवतीति प्रतिपादनम्<br>४. चापजात्ये एकभुजकोटिज्यात्रिज्ययोर्निष्पत्तिः कर्णकोटिज्याद्वितीयभुजकोटिज्ययोर्निष्पत्या तुल्येति प्रतिपादनम्<br>५. चापजात्ये एकभुजकोटिज्यात्रिज्ययोर्निष्पत्तिरेकभुजसम्मुख कोणकोटिज्याद्वितीयभुजसम्मुखकोणज्ययोनिष्पत्तिः समा जायत इति प्रतिपादनम्<br>६.चापजात्यान्तर्गतद्विसक्तावयवत्रिसक्तावयवसिद्धान्तपरिज्ञानम्<br>७. चापाजात्ये लम्बलग्नकोणज्ययोर्निष्पत्याऽऽबाधालग्नकोणकोटिज्ययोर्निष्पत्तिस्तुल्यतवप्रतिपादनम्<br>८. चापाजात्ये भुजसम्बन्धिकोटिज्ययोर्या निष्पत्तिः सैवाबाधाकोटिज्ययोरपि भवतीत्युपपादनम्<br>९. आबाधाज्ययोर्या निष्पत्तिः सैवाऽऽधारलग्नकोणयोश्छायावैपरीतयेऽपि भवतीति प्रतिपादनम्<br>१०. चापाजात्ये लम्बलग्नकोणकोटिज्ययोर्निष्पत्तिर्भुजयोश्छायावैपरीत्यनिष्पत्या तुल्यत्वे युक्तिः<br>११.भुजयोर्योगार्द्धच्छायया आबाधर्योगार्द्धच्छायाया या निष्पत्तिः सैवाऽऽबाधयोरन्तरार्द्धच्छायाया भुजयोरन्तरार्द्धच्छायाया | | |

| | | | |
|---|---|---|---|
| | निष्पत्तेस्तुल्यतवप्रतिपादनम्<br>१२.चापाजात्ये आधारलग्नकोणयोर्योगज्यया तदन्तरज्याया या निष्पत्तिः सैवाधारार्द्धच्छाययाऽऽबाधयोरन्तन्तरार्धच्छायाया निष्पत्तिरिति अन्तर्लम्बे बहिर्लम्बे तु आधारार्द्धकोटिच्छायया आबाधयोर्योगार्धकोटिच्छायाया निष्पत्तिरिति प्रतिपादनम्<br>१३.चापाजात्ये भुजयोर्योगज्यया तदन्तरज्याया या निष्पत्तिः सैव तन्मध्यगतकोणार्द्धकोटिच्छायया आबाधासम्मुखयोः कोणयोरन्तरार्द्धच्छायया निष्पत्ति अन्तर्लम्बे, बहिर्लम्बे तु आबाधासम्मुखयोः कोणयोर्योगार्धच्छाया चतुर्थस्थाने समागच्छतीति प्रतिपादनम्<br>१४. चापाजात्ये भुजयोर्निष्पत्तिस्तत्सम्मुखकोणयोर्निष्पत्तितुल्याभवतीत्युपपादनम्<br>१५.चापाजात्ये भुजद्वयस्य तदन्तरकोणस्य च ज्ञानात् तृतीयभुजज्ञानोपायः<br>१६. चापाजात्ये भुजत्रयज्ञानादभीष्टकोणज्ञाने युक्तिः<br>१७. चापाजात्ये भुजत्रयज्ञानाभ्दुजसंलग्नकोणार्धज्ञानोपायः<br>१८. चापाजात्ये भुजत्रयज्ञानाभ्दुजसम्मुखकोणार्धकोटिज्ञाने युक्तिः | | |

| | | | |
|---|---|---|---|
| | १९. कोणत्रयज्ञानेन भुजत्रयज्ञानप्रकारपरिज्ञानम्<br>२०.चापीयत्रिभुजपृष्ठफलानयनवासनापरिज्ञानञ्च । | | |
| खप्रकरणे<br>सौरोक्त ग्रहगणितम् | १. परब्रह्मणः स्तुतिः २. मयसंवादवर्णनम्, सूर्यांशपुरुषस्य मयं प्रति सूर्यस्याशयप्रकथनम् ३. कालपरिभाषा ४. चान्द्रसौरमासयोर्बर्षस्य दिव्यवर्षस्य च परिचयः ५.महायुगादिमानम्, मनुकल्पब्राह्ममानादिकम् ६.ब्रह्मायुस्तद्गतकालञ्च, कल्पकालप्रमाणम्<br>७. सृष्टिकालः ८. ग्रहाणां प्राग्गतित्वम् ९. ग्रहगतेर्न्यूनाधिकत्वम् १०. भगणवमर्शः<br>११. युगीयचान्द्रमासादिकप्रमाणम्<br>१२. कल्पदिनसंख्या १३. कल्पे निरगभगणाः १४. ग्रन्थारम्भे गतकालप्रमाणम् १५. कल्पदिनसंख्या १६. कल्पे निरग्रभगणाः १७. ग्रन्थारम्भे गतकालप्रमाणम्<br>१८. अहर्गणानयनम् १९. मासेशवर्षेशानयनप्रकारः २०. गुरुवर्षम् २१. ग्रहसाधनवासना २२. सत्ययुगान्ते ग्रहाणां ध्रुवाः २३. भूव्यासपरिध्योः प्रमाणम् २४.स्पष्टपरिधिदेशान्तरश्च २५. रेखादेशाः २६. रेखास्थदेशयोरन्तरांशज्ञानम्<br>२७. वारप्रवृत्तिः २८. | ५० | ८० |

| | | | |
|---|---|---|---|
| | इष्टग्रहसाधनम्<br>२९. ग्रहाणां परमशरांशाः<br>३०. मध्यस्पष्टग्रहयोर्भिन्नत्वे कारणम्<br>३१. ग्रहाणां गतिभिन्नत्वम्<br>३२. उच्चकृतग्रहाणामाकर्षणम्<br>३३. ग्रहफलस्य धनर्णतावचारः<br>३४.पातकर्तृकदक्षिणोत्तरापकर्षणम्<br>३५. बुधशुक्रयोराकर्षण्जनितवैशिष्टचम्<br>३६. ग्रहबिम्बपरिमाणवशादाकर्षणे न्यूनाधिकता<br>३७. ग्रहाणामष्टविधगतिविमर्शः३८.ज्यापिण्डसाधनप्रकारः<br>३९.उत्क्रमज्यासाधनप्रकारः<br>४०.सिद्धज्योत्क्रमज्ययोः संख्यात्मकमानप्रकथनम्<br>४१. परमक्रात्यंशाः<br>४२. भुजकोटिज्यानयनप्रकारः<br>४३. ज्यासाधनमुत्क्रमज्यासाधनं चापसाधनञ्च४४. सुर्यादिनां मन्दपरिध्यंशाः४५. कुजादीनां शीघ्रपरिध्यंशाः ४६. परिधेः स्पष्टीकरणम् ४७. मन्दफसाधनम्<br>४८. शीघ्रकर्णशीघ्रफलयोः साधनम्<br>४९. मन्दशीघ्रफलयोः संस्करक्रमः<br>५०. फलधनर्णताविचारः ५१. | | |

| | | | |
|---|---|---|---|
| | भुजान्तरकर्म<br>५२. ग्रहमन्दस्पष्टगतिसाधनप्रकारावगति : ५३. शीघ्रगतिफलानयनम् ५४. ग्रहाणां वक्रगतित्वे कारणम् ५५. वक्रारम्भे वक्रत्यागे च केन्द्रांशकथनम् ५६. मार्गारम्भे केन्द्रांशाः ५७. शरसाधनवासना ५८. ग्रहाणां स्फुटसावनदिनम् ५९. द्युज्याचरज्ययोः साधनम् ६०. चरसंस्कारप्रकारः ६१. दिनरात्रिप्रमाणं तिथिनक्षत्रयोगकरणानां साधनञ्च ६२. दिक्साधनप्रकारः<br>६३. इष्टच्छायास्थाननिरुपणम्<br>६४.पूर्वापररेखास्थितधरातलवर्णनम्<br>६५. कर्णवृत्तीयाग्रास्वरुपम् ६६. छायातः कर्णसाधनम् ६७. कर्णतश्छायासाधनम्<br>६८. अयनांशविषयकविचारः<br>६९. पलभाक्षांशलम्बांशानां चर्चा, मध्यान्हच्छायाज्ञानादक्षांशादीनां परिज्ञानम् ७०. मध्यान्हच्छायाधारे रविसाधनम् ७१. स्पष्टरवेर्ज्ञानान्मध्यमरविज्ञानम्<br>७२. अक्षांशक्रान्तिभ्यां मध्यनतांशछायाछायाकर्णानां ज्ञानम् ७३. अग्राकर्णवृत्ताग्रयोः साधनम्, दिनार्धकालिकभुजस्वरुपम्<br>७४. समवृत्तीयार्कस्याधारे प्रकारत्रयेण छायादिसाधनम् ७५. | | |

| | | | |
|---|---|---|---|
| | इष्टकालिकच्छायाकर्णतः कणृवृत्तीयाग्रासाधनम् ७६. कोणशङ्कोः साधनरीतिः ७७.कालनियमेन नतकालतश्छायासानमधम् ७८. छायातो नतकालज्ञानम्<br>७९. कर्णगोलीयाग्राज्ञानाद्रविसाधनम्<br>८०. छायाभ्रमणमार्गनिरुपणम्<br>८१. लग्नसाधनोपयोगिविषयाणां लग्नसाधनप्रकाराणां विमर्शश्च ।<br>८२. सूर्यचन्द्रयोर्योजनात्मकबिम्बव्यासौ<br>८३. चन्द्रकक्षायां रविबिम्बव्यासप्रमाणसाधनम्<br>८४. चन्द्रकक्षायां भूभाबिम्बसाधनम्<br>८५. ग्रहणसम्भवासम्भवविचारः<br>८६. ग्रहणकालिकचन्द्रसूर्ययोः स्थितिविषयकविचारः ८७. ग्राह्यग्राहकयोर्निर्णयः ८८.ग्रासानयनम्<br>८९. स्थित्यर्धविमदार्धयोः साधनम्,<br>९०. स्थितिविमदार्धयोः स्थूलत्वनिराकरणोपायः<br>९१. मध्यग्रहणसमयात् स्पर्शसम्मीलनोन्मीलनमोक्षकालसाधनम्९२.इष्टकालिकग्राससाधनम्<br>९३. मोक्षिकृष्टकालेग्रासानयने | | |

| | | | |
|---|---|---|---|
| | विशेषः<br>९४. ग्रासादिष्टकालानयनम्<br>९५. आयनाक्षवलनयोः साधनम्<br>९६. शरादीनामङ्गुलीकरणम्<br>९७.<br>नतिलम्बनयोरभावस्थलनिरुपणम्<br>९८. देशकालविशेषेण लम्बननत्योः सम्भवज्ञानम् ९९. लग्नाग्राया दशमलग्ननतांशज्यायाश्च साधनम्<br>१००. दृक्क्षेपदृग्गत्योरानयनम्<br>१०१. लम्बननत्योः साधनम्<br>१०२. स्फुटशरसाधनम् १०३. स्पष्टनत्याः प्रयोजनम् १०४. सूर्यग्रहणे स्थितिविमर्दार्धयोर्वैशिष्ट्यप्रदर्शनञ्च । | | |
| गप्रकरणे<br>सूर्यसिद्धान्तवर्णित<br>छेद्यकादिविमर्शनम् | १. परिलेखमाहत्म्यम् २. परिलेखविमर्शः<br>३. ग्रहणे चन्द्रवर्णनिरुपणम् ४. ग्रहयोर्युतो युद्धसमागमास्तमनलक्षणम् ५. ग्रहयोर्योगो गतो वा गम्य इति ज्ञानोपायः<br>६.गतैष्यदिनप्रमाणसाधनरीतिः<br>७. दृक्कर्मपरिशीलनम् ८. ग्रहयुतिसाधने विशेषः ९. ताराग्रहाणां चन्द्रकक्षायां बिम्बप्रमाणम् १०. ग्रहयुतिविलोकनरीतिः | २० | ३० |

| | | | |
|---|---|---|---|
| | ११. उल्लेखादियोगलक्षणम्<br>१२. पराजितजयिनोर्लक्षणम्,<br>१३. युतिसाधनप्रयोजनम्<br>१४. ग्रहयुतिविषयकचर्चा १५. नक्षत्राणां भोगा ध्रुवकाश्च १६. नक्षत्राणां सौम्ययाम्यशरप्रमाणम्<br>१७. अगस्त्यलुब्धकादिप्रसिद्धतारकाणां ध्रुवा विक्षेपाश्च रोहिणीशकटभेदलक्षणम्<br>१८. ग्रहनक्षत्रयोर्युतिसाधनप्रकारः<br>१९. योगतारानिरुपणम्<br>२०. प्राजापात्यापांवत्सादीनां भगोले स्थितिनिर्देशः<br>२१. ग्रहनक्षत्रयोरुदयास्तादिविमर्शः<br>२२. कालांशनिरुपणम्<br>२३. चन्द्रशृङ्गोन्नतिसाधनपरिशीलनम्<br>२४. चन्द्रशृङ्गोन्नतिपरिलेखनविधिः<br>२५. पातलक्षणम् २६. पातसाधनप्रकारः<br>२७. पातस्याशुभत्ववर्णनम् २८. पातस्य स्थित्यर्धादिकसाधनम्<br>२९. भसन्धिर्गण्डान्तश्च । | | |

**४. शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां

श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियताऽवश्यमवलम्बनीया ।

## ५. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – आन्तरिकं (निर्माणात्मकम्) बाह्यम् ( निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षा परीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि ग्रहीतुं शक्यते ।

वार्षिक-प्रश्नपत्रनिर्माण-सारणी

| प्रकरणानि क,ख,ग,घ | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| | व्याख्यात्मकाः | ४ | ३ | २४ |
| | वस्तुगताः | १० | १० | १० |
| | | २६ | २१ | १०० |

पाठ्यग्रन्थाः

१. चापीयत्रिकोणमितिगणितम् (नीलाम्बरझाविरचितम् )

२. सूर्यसिद्धान्तः

# सिद्धान्तज्योतिषम्

**पाठ्यांशनामः** - सचलनकलनं ग्रहस्पष्टीकरणम् **पाठ्यांशसङ्केतः** -सि.ज्यो.४०२

**स्तर**ः -शास्त्री **पूर्णाङ्कः**- १००

**खण्डः -** द्वितीयः **वार्षिकपाठ्यभार**ः- १६०

**पत्रम्** - चतुर्थम् **साप्ताहिकपाठ्यभार**ः-६

## १. पाठ्यांशपरिचयः

साक्षाद् भगवता श्रीसूर्यनारायणेन प्रतिपादितः संवर्णितश्च सूर्यसिद्धान्तः ज्योतिषसिद्धान्तग्रन्थेषु मूर्धन्य आर्षग्रन्थो मन्यते । प्राक्तनकालादद्यावधिः एषग्रन्थ पञ्चाङ्गनिर्माणे सर्वस्वीकार्य ज्योतिष सिद्धान्तग्रन्थत्वेन प्रसिद्धो विद्यते । सोपपत्तिकोऽपि एष ग्रन्थः प्राक्तनकालिक ग्रहस्थितिमाधारीकृत्य निर्मितोऽस्ति । तेन तत्र वर्णिता ग्रहगणितक्रिया आधारभूतसिद्धान्ताश्च बहुकालात् शैथिल्यमुपगताः सन्ति । एतादृशं शैथिल्यं देष्ट्वा भास्कराचार्यो विविधविचारबहुलं सुस्पष्टं खगोलीययथार्थस्थितिजनकं समसामयिकं माधुर्यपूर्णं सोपपत्तिकं सिद्धान्तशिरोमणिनामानं ज्योतिषस्य यथार्थज्ञानं न भवतीति विदुषां मतमस्ति । सिद्धान्तज्योतिषपरिज्ञाने एतादृशं ज्योतिर्विन्मान्यतां स्वीकृत्य सिद्धान्तज्योतिषमादाय पिपठिषतां छात्रवराणां पाठ्यक्रमे सिद्धान्तशिरोमणेः स्पष्टाधिकार समायोजितः । एवमेव प्राचीनभूगोलपरिज्ञानं विना श्रुतिस्मृतिपुराणवर्णितानां सृष्टिक्रमाणां किन्नरवर्ष हरिषादिवर्षाणां नेपालभारतचीनलङ्कादिदेशस्थितानां समुद्राणां पर्वतानां नदीनांञ्च यथार्थस्थितिज्ञानञ्च न सम्भवति परं सूर्यसिद्धान्तस्य भूगोलाध्याये ज्योतिषोपनिषदि च एतत् सर्वं स्फुटं प्रतिपादितमस्ति । एवमेव आधुनिकदृष्ट्या ग्रहनक्षत्रादीनां तात्कलिक चलनकलनञ्चपरमावश्यकमिति चलनकलन सम्बद्धाः कतिपयसिद्धान्तश्चपाठ्यक्रमे समायोजिता । शास्त्रिद्वितीयवर्षे सिद्धान्तज्योतिषमादाय पिपठिषतां छात्रवराणां कृते एष पाठ्यक्रमो महोपयोगी भविष्यतीति भृशमाशास्यते इति ।

## २. पाठ्यांशसामान्योद्देश्यम्

भास्करोक्त विधिना ग्रहस्पष्टीकरणप्रक्रीयाया उउपत्तिवर्णने

- सिद्धान्तग्रन्थानुसारेण पञ्चाङ्गसाधनप्रकारस्य औचित्य प्रतिपादने
- सौरोक्त सृष्टिक्रमवर्णने

- प्राचीनभूगोलाऽऽधारे विद्यमानानां देवनगरीणां नदीनां पर्वतानां केतुमालादिबर्षाणां यथार्थ स्थिति प्रतिपादने
- ध्रुवयोर्निरक्षदेशानां च वास्तविकस्थिति प्रतिपादने
- ज्योतिषोपनिषदाधारे ज्योतिषस्य तात्विकस्वरुपवर्णने
- राशीनां तात्कालिकसम्बन्ध परिज्ञाने

**पाठचांशविशिष्टोद्देश्यम्**

अस्य पाठचांशस्य पठनेनच्छात्राः

- ग्रहाणामुदयास्तसाधने, ग्रहभग्रहयुतिसाधने च,
- भास्करीयग्रहस्पष्टीकरणप्रकारज्ञाने, नक्षत्राणां गतिस्थित्यादिपरिशीलने च,
- नतोन्नतविषयकविचारज्ञाने, ग्रहाणां गतेर्न्यूनाधिकत्वकारणज्ञाने च,
- चलनकलनगणितस्य प्रयोगे च समर्था भविष्यन्ति ।

## ३. पाठचांशस्य विशिष्टोद्देश्यं पाठचबिषयसंयोजनञ्च

| प्रकरणगत-विशिष्टोद्देश्यम् | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|
| कप्रकरणे<br>सिद्धान्तशिरोमणिः( आदितः स्पष्टाधिकारान्तो भागः) | १) भास्करीय स्तुतिः २) पूर्वाचार्याणां प्रशंसनम्३) ग्रन्थसंरचनौचित्यादिकम्<br>४) सिद्धान्तज्योतिषप्रशंसा<br>५) ज्योतिःशास्त्रस्य वेदाङ्गत्वम्<br>६) तस्य महत्वम्<br>७)तत्पठनौचित्यप्रतिपादनञ्चः<br>८) भतक्रचलननियमः ९) कालस्य प्रवृत्तेः | ६० | ८० |

| | | | |
|---|---|---|---|
| | क्रमवर्णनम् १०) कालावयवानां परिभाषा<br>११) ब्राह्ममानम् १२) युगादि प्रमाणम्<br>१३) ब्रह्मणो गतायुषो निरुपणम्<br>१४) ग्रन्थारम्भे कल्पगतवर्षाणि १५) मनूनां नामानि १६) बार्हस्पत्यमानम्<br>१७) मानुषमानम् १८) नवविधमानानां परिचयः १९) ग्रहोच्चपातादीनां भगणप्रमाणम् तेषामुपपत्तिश्च २०) ब्रह्मदिने भभ्रमकुदिनादिप्रमाणकथनम् २१)अहर्गणानयनप्रकारः २२) ग्रहसाधनप्रकारः<br>२३) ज्ञातेऽर्केऽवमशेषाच्च चन्द्रसाधनरीतिः<br>२४)अधिमासावमशेषाभ्यां चन्द्रार्कानयनम्<br>२५) ग्रहानयने विविधाप्रकाराः<br>२६) अहर्गणात्कल्पगतवर्षसाधनम्<br>२७) कलिगतवर्षादपि ग्रहसाधनम्<br>२८) कल्पादौ ग्रहाणां क्षेपाः२९) खकक्षास्वरुपं तत्साधनोपपत्तिश्च ३०) ग्रहाणां कक्षास्वरुपवर्णनम् ३१) ग्रहाणां दैनिकी योजनात्मिका गतिः ३२) ग्रहसाधनम् ३३) तुङ्गपातादीनां कक्षानिरुपणञ्च ३४) एकवर्षान्तः पातिसावनदिनादिसाधनोपायाः ३५) ग्रहसाधनोपायाः<br>३६) ग्रहादिनगतिसाधनम्<br>३७) कक्षाऽतुल्यत्वेकारणम्३८) | | |

| | | | |
|---|---|---|---|
| | अहर्गणसाधने सैकतानिरेकतादिकम्<br>३९) अधिमासक्षयमासपरिचयः<br>४०)<br>भूपरिधिस्पष्टभूपरिधिदेशान्तरसंस्काबीजसंस्काराणामनुशीलनम्<br>४१) ग्रहस्पष्टीकरणौचित्यप्रदर्शनम्<br>४२) ज्यापिण्डकथनम् ४३) ज्यासाधनंधनुःसाधनञ्च ४४)लघुज्यासाधनं स्फुटभोग्यखण्डसाधनञ्च ४५) भोग्यखण्डस्य धनुः साधनम् ४६) भुजकोटयादिपरिभाषा ४७) ग्रहाणां मन्दोच्चनीचपरिधेः प्रमाणानि<br>४८) शीघ्रपरिचयः ४९) फलानयनवासना ५०) ग्रहकर्णानयने प्रकारचतुष्टयम्<br>५१) लघुज्याप्रकारेण फलसाधनम्<br>५२) ग्रहगतिस्पष्टीकरणम्<br>५३) शीघ्रफलसाधनवासना<br>५४) ग्रहस्पष्टीकरणञ्च ५५) गतेः शीघ्रफलानयनम्<br>५६)<br>लल्लोक्तगतिफलसाधनरीतेर्दूषणप्रदर्शनम् ५७) वक्रकेन्द्रांशाः<br>५८) ग्रहाणामुदयास्तसम्भवज्ञानम्<br>५९) स्फुटग्रहान्मध्यग्रहानयनम्<br>६०) पलभापरिभाषा ६१) पञ्चज्यासाधनम् ६२) चरानयनम् | | |

| | | | |
|---|---|---|---|
| | ६३) दिनरात्रिप्रमाणसाधनञ्चः ६४) चरकर्म<br>६५) लङ्कोदयसाधनम्<br>६६) भुजान्तरोदयान्तरसाधनवाससना<br>६७) तिथियोगकरणानां साधनवासना<br>६८) नतकर्मसाधनम्<br>६९) स्फुटग्रहस्य तात्कालिकीकरणम्<br>७०) सूक्ष्मनक्षत्रभोगाः ७१) ग्रहाणां राशिसङ्क्रान्तिमानम्<br>७२) भतिथिकरणयोगानां सन्धेः मानञ्च । | | |
| खप्रकरणे<br>सौरोक्तविधिना प्राचीनभूगोलवर्णनं ज्योतिषोपनिषद्विश्लेषणं च । | १) मयकृतभूगोलखगोलविषयकनानाविधप्रश्नज्ञानम् २) सौरोक्तसृष्टिविषयकविभर्शः<br>३) ब्रह्माण्डस्वरुपम् ४) ब्रह्माण्डे भूगोलस्य स्थितिः ५) भूगोले पातालादिसंस्थानम्<br>६) मेरुसंस्थानवर्णनम् ७) पृथिव्यां समुद्राणां स्थितिः ८)यमकोटयादिनगरीणां भूगोले संस्थानज्ञानम् ९) ध्रुवताराया: स्थितेर्वर्णनम्<br>१०) देवासुराणां रविदर्शननियमः<br>११) सूर्यकिरणानां तीव्रत्वे मृदुत्वे च कारणम् १२) देवासुराणामहोरात्रव्यवस्था<br>१३) राशीतिशतांशान्तरे स्थितानामूर्ध्वाधरत्वविचारः १४) गोलाकाराया भुवः समत्वदर्शने कारणम्<br>१५) भचक्रभ्रमणव्यवस्थावर्णनम् | २० | ४० |

| | | | |
|---|---|---|---|
| | १६) दिनमानव्यवस्थाविषयकविचारः<br>१७) देवासुरभागयोरविभ्रमणपरामर्शः<br>१८) भारतवर्षादिषु रविभ्रमणजनितस्थितेर्वर्णनम्<br>१९) ध्रुवाभिमुखगमनेन तद्वैपरीत्यदिशि गमनेन जनितध्रुवादिनक्षत्राणां नतोन्नतविषयकविचारः २०) भचक्रभ्रमणम्<br>२१) सुरासुरपितृनराणां रविदर्शनकालवैभिन्यकारणम् २२) ग्रहाणां गतेर्न्यूनाधिकत्वकारणम्<br>२३) दिनाब्दमासहोराणांपतयः<br>२४) भकक्षादिवर्णनम् २५) ग्रहाणां कक्षाप्रमाणानि<br>२६) भूगोलादिगोलरचनाप्रकारवर्णनम्<br>२७) गोले अहोरात्रक्रान्तिविभण्डलादिवृत्तानां स्थितेर्वर्णनम्<br>२८) अन्त्याचरज्यादीनां सूत्राणां संस्थानम्२९) विविधानां यन्त्राणां परिचयः<br>३०) विविधानां ब्रह्मदिव्यादिमानानां व्यावहारिकमानानाम् ३१) सङ्क्रान्तेः अयनयोः ३२) मासस्य, नाक्षत्रसावनमानयोश्च परिचयः । | | |
| गप्रकरणे | १) तात्कालिकसम्बन्धपरिचयः | २० | ४० |

| | | | |
|---|---|---|---|
| चलराशिसम्बन्धज्ञानं लघुरिक्थञ्च | २) स्थिरराशेस्तात्कालिकसम्बन्धविचारः<br>३) स्थिरराशिगुणितचलराशेस्तात्कालिकसम्बन्ध:<br>४) स्थिरराशिनायुक्तस्य वियुक्तस्य हतस्य च चलराशेः सम्बन्धसाधनविचारः<br>५) द्वयोश्चलयोर्योगवियोगादौ सम्बन्धसाधनरीतिः ६) ज्याकोटिज्यादीनां तात्कालिकसम्बन्धानयनविचारः<br>७) ऋणात्मकघाताङ्कवतां ज्याकोटिज्यादीनां तात्कालिकसम्बन्धप्रतिपादनम् ८) लघुरिक्थ परिचयः ९) लघुरिक्थगणितश्च । | | |

## ४. शिक्षणविधयः शैक्षिकसामग्री च

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियताऽवश्यमवलम्बनीया ।

## ५. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – आन्तरिकं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षा परीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते

पञ्चविंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि ग्रहीतुं शक्यते ।

**(क) वार्षिक-प्रश्नपत्रनिर्माण-सारणी**

| **प्रकरणानि क,ख,ग** | **प्रश्नप्रकाराः** | **प्रश्नसंख्याः** | | **अङ्काः** |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| | व्याख्यात्मकाः | ४ | ३ | २४ |
| | वस्तुगताः | १० | १० | १० |
| | | २६ | २१ | १०० |

**पाठ्यग्रन्थाः**

१. **सूर्यसिद्धान्तः**

२. **सिद्धान्तशिरोमणिः** **(भास्कराचार्यविरचितः)**

३. **चलनकलनम्** **(सुधाकरद्विवेदिकृतम् )**

# फलितज्योतिषम्

**पाठ्यांशनाम – ससामुद्रिकं प्रश्नशास्त्रम्** **पाठ्यांशसंङ्केतः** -फ.ज्यो.४०१

**स्तरः** – शास्त्री **पूर्णाङ्कः** - १००

**खण्डः** – द्वितीयः **वार्षिकः पाठ्यभारः**- १६० घण्टाः

**पत्रम्** – तृतीयम् **साप्ताहिकः पाठ्यभारः** -६

## १. पाठ्यांशपरिचयः

शास्त्रिद्वितीये वर्षे फलितज्यौतिषविषयस्याध्यापनार्थं पाठ्यक्रमोऽयं निर्धारितोऽस्ति । तृतीयपत्रस्य कृते निर्धारितोऽयं पाठ्यांशः पञ्चसु प्रकरणेषु विभक्तोऽस्ति । पत्रेऽस्मिन् ससामुद्रिकं प्रश्नशास्त्रं पाठ्यविषयत्वेन निर्धारितमस्ति ।

फलितज्योतिषस्य होरातन्त्रमहार्णवप्रतरणे ससामुद्रिकं प्रश्नशास्त्रसमीक्षणे च समुत्सुकानां छात्राणां कृते निर्धारितग्रन्था उपयुक्ता भवन्तीति प्रश्नशास्त्रेण सामुद्रिकशस्त्रेण च समलङ्कृत एष पाठ्यांशः ।

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोनिर्दिष्टविषयेषु समर्था भविष्यन्ति -

क– पृथुयशोमतेन नानाविधप्रश्नोत्तरविधिपरिज्ञाने ।

ख– केरलमतेन विधिप्रश्नानामभ्यासे समाधाने च ।

ग – ताजिकोक्तप्रश्नफलादेशे ।

घ– जातकस्य शरीराङ्गलक्षणाधारे शुभाशुभफलविवेचने ।

ङ– जातकस्य हस्तपादाङ्कितरेखाचिह्नाधारे शुभाशुभफलकथने ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

- पृथुयशोमतेन विविधप्रश्नोत्तरे ।
- केरलमतेन नानाविधप्रश्नोत्तरणे ।
- ताजिकमतेन नानाविधप्रश्नोत्तरणे ।
- सामुद्रिकशास्त्रसम्बद्धविषयाणां परिज्ञाने ।
- जातकस्य शरीराङ्गाधारे शुभाशुभफलकथने ।

- जातकस्य शीर्षहस्तपादादिस्थानस्थितविविधचिह्नपरिज्ञाने तेषां फलवर्णने च छात्राः सामर्थ्यमधिगच्छन्ति ।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयाश्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | पृथुयशोमतेन विविधप्रश्नोत्तरणविधिपरिज्ञानम् । | केन्द्राद् विचारणीया विषयादारभ्य तस्करस्य वयोरुपज्ञानपर्यन्तं निर्धारिता विषयाः । | २० | ३२ |
| ख | केरलमतेन नानाविधप्रश्नोत्तरणपरिज्ञानम् । | प्रश्नलग्न– प्रश्नाक्षराङ्कानामाधारे नानाविधफलवर्णनम् । | २० | ३२ |
| ग | ताजिकमतेन नानाविधप्रश्नोत्तरणम् । | प्रश्नतन्त्रसम्बद्धांशः | २० | ३२ |
| घ | सामुद्रिकशास्त्रोक्तस्य जातकस्य शरीराङ्गलक्षणाधारे शुभाशुभफलविवेचनम् । | सामुद्रिकशास्त्रस्यादितः शरीराधिकारान्तो भागः | २० | ३२ |
| ङ | जातकस्य हस्तपादाङ्कितानां विविधानां चिह्नानामाधारे शुभाशुभफलकथनम् । | सामुद्रिकशास्त्रस्य आवर्ताधिकारादवशिष्टो भागः | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

### क प्रकरणे – प्रश्नशास्त्रविमर्शः

षट्पञ्चाशिकोक्तमङ्गलाचरणवर्णनम्, प्रश्नशास्त्रप्रयोजनञ्च, प्रश्नलग्नात् केन्द्रवशेन विचारणीयविषयाः, तन्वादिद्वादशभावानां शुभाशुभत्वज्ञानोपायः, प्रश्नलग्नाधारे कार्यस्य सिद्ध्यसिद्धिज्ञानम्, नष्टस्य वस्तुनो लाभज्ञानोपायवर्णनम्, अपहृतस्य वस्तुनो

धातुमूलजीवज्ञानोपायः, प्रश्नलग्नाद् गमागमजीवितमरणरोगशान्तिपराभिभवपरिज्ञानम्, शत्रोर्मार्गनिवृत्तिज्ञानम्, शत्रूणां पराजयपलायनविमर्शः, यायिनां शुभाशुभत्ववर्णनम्, शत्रोर्गमागमविचारः, सविशेषं शत्रुनिवृत्तिज्ञानोपायवर्णनम्, शत्रोरागमनप्रकारविवेचनम्, यातुर्निवृत्तिकालनिदर्शनम्, जयपराजयविषयकप्रश्नोत्तरणम्, पौरयायिनोर्मध्ये कस्य विजयो भवतीति वर्णनम्, सन्धिविरोधज्ञानार्थं योगान्तरसमीक्षणम्, सेनाऽऽगमनज्ञानम्, प्रश्नलग्नात् सर्वार्थसिद्धियोगान्तरवर्णनम्, रोगनिपीडितानां शुभाशुभत्वपरिज्ञानम्, सप्रकारान्तरं दूरगताऽऽगमननष्टप्राप्तियोगविवेचनम्, प्रवासिनामागमनकालिकनिदर्शनम्, प्रश्नलग्नाच्चौरज्ञानप्रकारः, अपहृतवस्तुनः स्थानदिगध्वपरिज्ञानम्, गर्भस्थपुत्रपुत्रीज्ञानं वरस्य कन्यालाभज्ञानञ्च, विवाहप्रश्ने विवाहज्ञानम्, वृष्टिवर्णनम्, गर्भिणीनां किञ्जायत इति ज्ञानम्, प्रष्टुः कीदृशी स्त्री–पुरुषो वा चेतसि वर्तते इति ज्ञानम्, पृच्छकस्य कीदृशी चिन्ता वर्तत इति ज्ञानम् । प्रवासचिन्तावर्णनम्, कीदृश्याः स्त्रिया सह मे संयोगो जात इति ज्ञानम्, रोगार्तस्य परदेशस्थितिवर्णनम्, पितुरन्यदेशगमनागमनविषयकप्रश्नोत्तरणम्, नष्टार्थस्य स्वरूपं तस्करकालदिग्देशज्ञानं तस्करस्य वयोरूपनिदर्शनञ्च ।

**ख) प्रकरणे – केरलपद्धत्या प्रश्नानुरूपोत्तरणप्रकारः**

केरलतत्त्वप्रश्नसङ्ग्रहमङ्गलाचरणवर्णनम्, प्रश्नप्रयोजनम्, प्रश्नकरणे योग्यायोग्यपुरुषाः, प्रच्छकनियमाः , प्रष्टुर्दिङ्नियमः, प्रश्नसमये शुभशकुनाः , अष्टविधप्रश्नानां नामलक्षणफलानि , इष्टाङ्क–दिक्–शरीराङ्गस्पर्शाङ्काक्षरोपन्यङ्गुलीनिधानादिविधिना प्रश्नानुरूपोत्तरणम्, पिण्डार्थं ध्रुवकाङ्कसाधनम्, लाभालाभ–जयपराजय–सुखदुःख–गमन–जीवन–मरण–तीर्थयात्रा–वर्षा–गर्भ–पुत्रपुत्री–विवाहादिप्रश्नानां केरलोक्तप्रकारेण समुचितोत्तरणम्, अस्यां गर्भोऽस्ति नवेति प्रश्नस्योत्तरणम्, धृतो गर्भो ममान्यस्येति प्रश्नोत्तरणम्, रुग्णस्यायुर्विषयकप्रश्नस्य समाधानम्, अश्वादिप्राप्ति–द्रव्यप्राप्ति–द्रव्यप्रमाणकथनादिप्रश्नानां समुत्तरणम्, चलिताचलितदूत–पथिक–मनुष्यमेलन–मित्रचौरादिमेलन–नष्टजातक–सिद्ध्य–सिद्धिविषयक-प्रश्नानां समाधानम्, ध्वजाद्यायनामानि तत्साधनप्रकारश्च, ध्वजाद्यायवशेन कार्याकार्य–मनोविचारितकार्य–लाभालाभ–नष्टवस्तुप्राप्ति–चौरजाति–नष्टवस्तुदिक्स्थान–प्रवासिकुशल–चरस्थिर–गमनागमन–धातुमूलजीवज्ञान–मुष्टिगतवस्तुज्ञान–कन्यापुत्रजन्मायुःप्रमाण–जयपराजय–विषयकप्रश्नानां समुचितोत्तरणम्, शत्रोरागमन–वृष्टिदिनज्ञान–स्त्रीलाभ–व्यवहार–राज्यप्राप्ति–नौकाधिकारप्राप्ति–ग्रामप्राप्ति–कार्यसिद्धि–वन्दिमोक्ष–देवपूजा–दान–कार्यसिद्धिकाल–ज्ञानविषयकप्रश्नानां केरलमतेन समुचितोत्तरणम्, नारदोक्ताङ्कविद्या–वर्णनम्, प्रश्नाक्षराऽऽधारे लग्नज्ञानम् ।

**ग) प्रकरणे – ताजिकोक्तप्रश्नविमर्शः**

इष्टस्थानीयपञ्चाङ्गाधारेण प्रश्नलग्नसाधनम्, प्रश्नलग्नविचारः, प्रश्नप्रयोजनं, अथोत्तमफलितज्ञज्योतिज्ञेलक्षणम्, योग्यायोज्ञप्रष्टुर्ज्ञानम्, ग्रहाणामस्थातत्फलञ्च, सूर्यादिग्रहाणां स्वरूपज्ञानम्, लग्नादिद्वादशभावाद् विचरणीया विषयाः, कार्यसिद्धियोगानां न्यूनाधिकत्वपरिज्ञानम्, अनिष्टयोगकथनम्, लग्नादिद्वादशभावफलनिरूपणम्, पथिकागमनकालः, दूरगतो जीवति न वेति इत्यस्य समाधानम्, रोगिणः शुभाशुभविचारः, देवदोषज्ञानम्, सन्तानप्रश्नः, बद्धमोक्षप्रश्नः, मनुष्याणां जन्मलग्नात् प्रतिवर्षं शुभाशुभज्ञानम्, इत्थशालादियोगविचारः ।

**घ) प्रकरणे - सामुद्रिकशास्त्रस्यादितः शरीराधिकारान्तो भागः**

सामुद्रिकशास्त्रस्य निर्विघ्नपरिसमाप्त्यर्थं ग्रन्थकारकृतमङ्गलाचरणवर्णनम्, शुभाशुभलक्षणानां फले वैशिष्ट्यम्, सामुद्रिकशास्त्रस्योत्पत्तिकारणवर्णनम्, सामुद्रिक शास्त्रस्य संक्षिप्तेतिहासकथनपूर्वकं स्वकीयग्रन्थरचनायाः प्रयोजनम्, देहलक्षणशास्त्रस्य सामुद्रिकशास्त्रकथने औचित्यदर्शनम्, नृदेहेऽष्टाङ्गोपाङ्गनामानि, पूर्वजन्मकर्मफलानुसारेण लक्षणानामुत्पतिः, बाह्याभ्यन्तरभेदेन लक्षणानां द्विभेदाः, पुरुषस्त्रिणामावर्ताद्यष्टलक्षणानि, शरीरलक्षणशास्त्रे पठितानामवश्यज्ञातव्यभूतानां पदादिकेशान्तानामङ्गोपाङ्गानां नामानि, पादतगतरेखाणामाधारे शुभाशुभत्ववर्णनम्, पादाङ्गुलीभिः पादनखैश्च फलादेशप्रकारः, चरणपृष्ठ–गुल्फ–पार्ष्णि–जङ्घा–देह–रोम–जानूरु–कटि–स्फिक्–मुष्क–वस्तिनाभि–कुक्षि–पार्श्व–जठर–बलि–वक्षः–स्तनस्कन्ध–कक्षा–बाहूनां लक्षणाधारे शुभाशुभफलवर्णनम्, करमूलस्थरेखात्रयफलम्, करमूलकरपृष्ठकरतललक्षणफलविवेचनम्, सामुद्रिकशास्त्रात् कररेखाभिर्नारीणां वामहस्तेन पुरुषाणां दक्षिणहस्तेन फलकथने औचित्यदर्शनम्, मीनद्वयाङ्कितपाणितलफलम्, रक्तपीतादिकरेखाफलानि, गोत्रद्रव्यायुर्दायरेखाणां लक्षणफलकथनम्, मणिबन्धात्प्रदेशिनीगतरेखाफलम्, कनिष्ठिकातो ज्येष्ठोल्लङ्घित–रेखाफलम्, जीवित–रेखाधारे आयुर्निर्धारणम्, मणिबन्धादङ्गुष्ठाद्यङ्गुलिगत-रेखाफलम्, धनरेखास्थकाकपदफलकथनम्, पाणिस्थयवमालापरिशीलनम्, आयुर्दायरेखात आयुःसाधनम्, कनिष्ठिकायुर्मध्यरेखाधारे पुरुषस्य स्त्रीसंख्यायास्त्रियाश्च पुरुषसंख्यायाः परिज्ञानम्, सन्ततिरेखातः सन्ततिज्ञानम्, भातृरेखातो भातृभगिन्यादिज्ञानम्, पाणिस्थमीनमकरादिफलम्, करतलस्थ–पर्वत–रथ–पोत–वापी–करवालस्वस्तिक–पताका–च्छत्र–चामर–यूप–यवादीनां फलसमीक्षणम्, हस्तरेखाणा–मङ्गुलीनाञ्च लक्षणाधारे फलकथनम्, पुण्यापुण्यवतां नखपृष्ठभाग–ग्रीवा–चिवुक–कूर्च–श्मश्रु–गण्डस्थल–कपोल–वदनोष्ठवर्णनम्, दन्त–रसना–तालु–हास्य–नासिका–छिक्का–नेत्रदृष्टि–पक्ष्मादिवशेन नराणां शुभाशुभफलकथनम्,

त्रिपञ्चनिमिषवतामायुर्दायादिकथनम्, रोदनाश्रु–भ्रू–कर्ण–भाल–भालरेखाणामाधारे पुरुषस्यायुःपरिमाणादिवर्णनम्, भ्रूयुग्मोपगतरेखावशेनायुःसाधनम्, धनिनां सुखिनां भाग्यवताञ्च मस्तककेशादिवर्णनम्, अङ्गलक्षणफलकथनात् पूर्वमायुर्दायज्ञाने औचित्यदर्शनम्, शरीरसंरचने परमकारणभूतानां संहत्यादीनां नामानि, संहतिसारानूक–स्नेहोन्मान–मान–क्षेत्र–प्रकृतिवशेन फलसमीक्षणम्, मिश्रकलक्षणाधारे फलविवेचनञ्च ।

**ङ) प्रकरणे– सामुद्रिकशास्त्रस्य आवर्ताधिकारादवशिष्टो भागः**

आवर्त–गतिच्छाया–स्वर–गन्ध–वर्ण–सत्वलक्षणाधारे पुरुषाणां सुखदुःखादिवर्णनम् , स्त्रीणामष्टलक्षणानि, पादतलाङ्गुष्ठाङ्गुलीनखपादपृष्ठगुल्फपार्ष्णिजङ्घाजानूरुकटिनितम्बस्फिक्–वस्तीनामाधारे स्त्रीणां सौभाग्यदौर्भाग्यवर्णनम्, नाभि–कुक्षि–पार्श्वोदर–बलि–रोमराजिहृदयोरःस्थल–स्तन–वंश–कक्षावशेन वनितानां शुभाशुभत्ववर्णनम्, कराङ्गुष्ठ–नखपृष्टि–कृकटिका–चिवुक–हनु–कपोलोष्टबिम्बदशन–जिह्वा–तालु–घण्टी–हास्य–नासा–क्षुताक्षियुगल–पक्ष्म–भ्रू–कर्ण–लक्षणैः स्त्रीणां फलसमीक्षणम्, ललाट–सीमन्त–शीर्ष–केश व्यञ्जन–मशक–तिलक–प्रकृति–मिश्रकलक्षणफलेन स्त्रीणां माङ्गल्यामाङ्गल्य निरूपणम्, गन्धावर्त–सत्व–स्वर–गतिच्छायाधारेण योषितां शुभाशुभत्वविश्लेषणम्, सामुद्रिकशास्त्रनिर्मातृकविवृतान्तवर्णनञ्च ।

**५. शिक्षणविधयः शैक्षिकसामग्री च**

फलितज्यौतिषशिक्षणविधौ शिक्षणक्रमेऽधिकाधिकरूपेण छात्राणां सहभागिता भवतीत्यत्र समायोजनीया । तदनु सामूहिकविचारविमर्श–संवाद–प्रश्नोत्तरादिमाध्यमेन छात्राः प्रेरणीयाः । अध्ययनस्य सहजीकरणं सामूहिके वैयक्तिके चाभ्यास आश्रितो भवति । पाठ्यक्रमस्योद्देश्यानां परिपूर्तयेऽधोलिखिता अध्ययन सहजीकरणप्रक्रिया उपयुक्ता भविष्यति

१) शिक्षकेण वार्षिकीमर्धवार्षिकीं मासिकीमर्धमासिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनामेवमेव पाठ्यांश- शिक्षण-योजनां दैनिकीं पाठयोजनां च निर्माय तदनुसारेण शिक्षणकार्यं करणीयम् ।

२) शिक्षणे विशेषरूपेण छात्रकेन्द्रितशिक्षणपद्धतिरवलम्बनीया ।

३) छात्राणां विषयवस्तुगतामभिरुचिमुत्प्रेरणाञ्च जागरयितुमुपयुक्तवातावरणं निर्माय विषयशिक्षणं कार्यम् ।

४) शिक्षार्थिनां स्तरं वयोभिरुचिं च ज्ञात्वाध्यापनीयम् ।

५) विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगप्रसङ्गे कक्षागतपाठानुसारेण पूर्वमेव सङ्गणकयन्त्रे श्रव्यात्मकं दृश्यात्मकं वा पाठ्यसामग्रीं निर्माय प्रोजेक्टरमाध्यमेन तत्तत्सामग्रीजातं प्रदर्श्य च स्वविषयाध्यापनं सम्यक् कर्तुं शक्यते । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । अत्र कतिपयसामग्रीणां व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

## ६) मूल्याङ्कनविधिः

मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते ।

(क) निर्माणात्मकमूल्याङ्कनम् कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिकपरीक्षामाध्यमेन शिक्षार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलशिक्षार्थिनां स्तरोन्नतये शिक्षणकार्यस्य सहजीकरणाय चोपयुक्तवातावरणनिर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिकविमर्शन- मौखिकपरीक्षा-लिखितपरीक्षा-विशेषयोग्यताप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृतिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन शिक्षार्थिनां योग्यतावृद्धिर्भवेत् । निर्माणात्मकमूल्याङ्कनमेवान्तरिकं मूल्याङ्कनमस्य कृते प्रतिशतं विंशत्यङ्का निर्धारिताः । आन्तरमूल्याङ्कनं विद्यापीठस्य विभागेन सम्बद्धशिक्षकस्य सम्मतौ विधेयम्। शिक्षणक्रम औपचारिकरूपेणानौपचारिकरूपेण च शिक्षणोपलब्धिः परिमापणीया । शिक्षणसहजीकरणस्य क्रमे शिक्षार्थिभिरधिगतानां प्रदर्शितानाञ्च यथायथाज्ञानशिल्पप्रयोगदक्षतादीनामाधारेणैवान्तरमूल्याङ्कनं कर्तव्यम

तस्य कृतेऽधोनिर्दिष्टतालिकानुसारेणाङ्कसंयोजनं कर्तुं शक्यते ।

| क.सं | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १ | उपस्थितिः | ३ |
| २ | शिक्षणसहभागिता | ३ |
| ३ | कक्षाकार्यं परियोजनाकार्यं वा | ९ |
| ४ | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| | योगः | २५ |

**द्रष्टव्यम्–** आन्तरमूल्याङ्कनस्याधाराणां विस्तृतं विवरण विभागनिर्मितान्तरमूल्याङ्कनकार्यविध्यनुसारेणावगन्तव्यम् ।

**(ख) निर्णयात्मकमूल्याङ्कनम्**

पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं शिक्षार्थिभिः प्राप्तं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । कक्षोन्नतये शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । निर्णयात्मकमूल्याङ्कनमेव बाह्यमूल्याङ्कनम् । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानाम् आन्तरिकमूल्याङ्कनस्याङ्कानां ने.सं.वि.परीक्षानियन्त्रणकार्यालयेनानुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनायाङ्कवितरणेन सहैवाधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । सामान्यतया बाह्यपरीक्षा लेखात्मिकैव भवति ।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माणसरणी**

| प्रश्नप्रकाराः | प्रकरणानि | प्रष्टव्यप्रश्नसंख्या | समाधेयप्रश्नसंख्या | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| विवेचनात्मकाः | क ख ग घ ङ | ३ | २ | २४ |
| संक्षिप्तोत्तरापेक्षिणः | क ख ग घ ङ | ९ | ६ | ४२ |
| व्याख्यात्मकाः | क ख ग घ ङ | ४ | ३ | २४ |
| वस्तुगताः | क ख ग घ ङ | १० | १० | १० |
| | | २६ | २१ | १०० |

## ६ पाठ्यसूची

### (क) पाठ्यग्रन्थाः

१) पृथुयशोरचिता षट्पञ्चाशिका, (व्याख्याकार) आचार्य गुरुप्रसाद गौड, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी, वि.सं २०५७ ।

२) केरलतत्त्वप्रश्नसंग्रह,: (व्याख्याकार) आचार्यः,
चन्द्रमापाण्डेयः वाराणसी, वाराणसेय-संस्कृत-संस्थानम् ।

३) श्रीनीलकण्ठदैवज्ञविरचिता ताजिकनीलकण्ठी, सम्पादक डा.रामचन्द्र पाठक,
चौखम्भा संस्कृत भवन वाराणसी , वि.सं. २०५५ । (प्रश्नतन्त्रसम्बद्धांशः)

४) समुद्रकृतम् सामुद्रिकशास्त्रम्, खेमराज श्रीकृष्णदास प्रकाशन बम्बई सम्वत् २०५९ ।

**(ख) सन्दर्भग्रन्थाः**

१) २) दैवज्ञश्रीजीवनाथविरचितम् प्रश्नभूषणम्, डा. रामचन्द्र पाठकः टीकोपेतम्,
चौखम्भा संस्कृत संस्थान वाराणसी, वि.सं. २०४५ ।

३) हस्तसञ्जीवनम् सम्पादकौ गणेशदत्त पाठकः डा.हरिशङ्कर पाठकः, भारतीय विद्या
संस्थान, वाराणसी ई.सं. १९९२ ।

# फलितज्योतिषम्

**पाठ्यांशनाम** - व्यवहारोपयोगिमुहूर्तविषयकज्ञानं वास्तुशास्त्रस्याध्ययनञ्च

**स्तरः**- शास्त्री

**पाठ्यांशसंकेतः** - फ.ज्यो.४०२

**वर्षः** - द्वितीयः

**पूर्णाङ्काः** - १००

**पत्रम्** - चतुर्थम्

**पाठ्यघण्टाः** - १६०

**साप्ताहिक पाठ्यभार** - ६

## १. पाठ्यांशपरिचयः

फलितज्योतिषशास्त्रं ग्रहाणां कालावस्थागत्यादिजनितशुभाशुभफलनिर्देशेन कर्मसम्पादननिमित्तक मुहूर्तकथनेन च व्यवहारकर्मणि जनान् प्रत्यक्षमेव लाभं जनयति । अतो हि शास्त्रस्यास्य महत्त्वमद्यतनेऽपि प्रतिक्षणं वर्धमानमस्ति । न केवलं मानवानामपि तु समेषां प्राणिनां कृते गृहं परमावश्यकं भवति परन्तु शुभस्थाने शुभमुहूर्ते वास्तुशास्त्रोदितविधिना विरचितमेव गृहं धनधान्यसुखशान्तिसमृद्धिदं भवति । एवमेव सुलग्ने शुभमुहूर्ते च विहितं संस्कारादिकं विविधव्यावहारिकक्रियाकलापश्च सफलो भवति । धनधान्यैश्वर्ययशोदगृहनिर्माणाय तथान्येषामपि व्यवहार्यमाणानां व्यापारकृषिसेवादिकार्याणां समुन्नत्यै फलवेदिनं ज्योतिर्विदं समुपगम्य जना एतद्विषयकं प्रश्नं पृच्छन्ति समुचितं समाधानञ्च वाञ्छन्ति तदा फलवेदिभिः शास्त्रदृशा प्रश्नानां समुचितमुत्तरं दातव्यमेव भवति । अतः फलवेदिभिरवश्यमेव ज्ञातव्यं मुहूर्तशास्त्रं वास्तुशास्त्रञ्च संगृह्य एष पाठ्यांशो विरचितः ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेन च्छात्रा अधोलिखितविषयेषु समर्था भविष्यन्ति ।

- शुभकर्मणि त्याज्यविषयनिरुपणे तथा नक्षत्रसंज्ञाविचारणे ।
- कर्तव्यसंस्काराणां गृहप्रवेशयात्रादिविषयाणाञ्च मुहूर्तनिर्धारणे ।
- गोचरफलवर्णने संक्रान्तिविषयकपुण्यकालनिर्धारणे ।
- प्रशस्तभूचयने तथा गृहनिर्माणविधिबोधे ।
- दकार्गल-वृक्षायुर्वेदविधिविषयविवेचने ।
- वापी– कूप–तडाग–देवप्रासादादिनिर्माणविधिविवेचने ।

### ३. पाठ्यांशस्य प्रकरणगतविशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

एतत्प्रकरणगतपाठ्यांशस्याध्ययनेन च्छात्रा अधोऽङ्कितेषु विषयेषु समर्था भविष्यन्ति ।

| प्रकरणानि | प्रकरणगतानि विशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठ घण्टाः |
|---|---|---|---|---|
| क. | १. शुभकर्मणि त्याज्यविषयावबोधने नक्षत्राणां स्वामि- स्थिरादिसंज्ञा- दिवारात्रिमुहूर्तविवेचने ।<br>२. सामान्यलग्नबलवर्णने गर्भाधानादिप्रमुखसंस्काराणां मुहूर्तप्रदाने ।<br>३. सप्रयोजनं गुरुशुक्रयोर्बाल्यवार्धक्यास्तोदयलक्षणवर्णने ।<br>४.विवाहे वर्णाद्यष्टकूटवशाद्वधूवरयोः<br>शुभाशुभत्वनिर्धारणे लग्नाधारेणेष्टघट्यादिसाधने च।<br>५. विवाहविषयेऽत्यावश्यकानां विविधधर्मशास्त्रीयविषयाणां<br>परिशीलने ।<br>६.विवाहविषयकविविधसिद्धान्तपरिवर्णने ।<br>७. वधूप्रवेश- द्विरागमनमुहूर्तविवेचने प्रथमाषाढादौ कन्यायाः पत्यादिगृहवासफलकथने च । | शुभकर्मणि त्याज्यविषयवर्णनादज्ञात जन्मनक्षत्रस्य नामाद्यक्षरात् नक्षत्रज्ञानविधिपर्यन्तं निर्दिष्टविषयाः । | २० | ३२ |
| ख | १. अग्न्याधान-गृहारम्भ-गृहप्रवेश- यात्रा-राजाभिषेक- सुरस्थापन- कृषि- | अग्न्याधानलग्नमुहूर्तादिनिर्धारणात् मुहूर्तमार्तण्डस्थविषयाणा | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | पशुकर्मविविधद्रव्यप्रयोगादीनां शुभमुहूर्तनिर्धारणे ।<br>२. काकिणीविचारणे, वर्ण-गन्ध-प्लवत्वाधारेण भूमेः शुभाशुभत्वविवेचने<br>३. गृहारम्भविधौ गृहप्रवेशे च वृषवास्तु- कलशचक्रवामरवि-लक्षणफलवर्णने स्थलसाधन-शङ्कु-शिला-सूत्रन्यासादीनामनुशीलने ।<br>४. यात्रायां शुभसमयनिर्धारणे, वारनक्षत्रतिथिदिक्शूलानामयनवार योरडल-विडल- लालाटिक-परिघदण्डानां लक्षणफलविचारणे ।<br>५. सापवादं सम्मुखशुक्रदोषपरिवर्णने,<br>शुभाशुभशकुनविषयनिर्देशने ।<br>६. गुरुशुक्रयोरस्तापवादस्थलनिर्देशने,<br>अध्येयानध्येयविषयनिर्णये, पल्लीसरटयोः पतनारोहणफलवर्णने ।<br>७. गोचरफलवर्णने, सङ्क्रान्तिपुण्यकालनिर्धारणे,<br>अधिमासक्षयमासलक्षणकथने । मुहूर्तमार्तण्डस्य वैशिष्ट्यप्रकाशने । | मङ्गीकरणे कारणसन्दर्शनं यावन्निर्दिष्टविषयाः । | | |
| ग | १ वास्तुशास्त्रस्यैतिह्यविवेचने गृहारम्भविधिबोधने च ।<br>२ सप्रयोजनं नामराशिवशेन गरुडादिवर्ग-काकिणी-वर्ण-प्लवत्वाकृतिवशेन च वासस्थानस्य | वास्तुशास्त्रस्यैतिह्यविवेच नादारभ्य<br>गृहनिर्माणे तिथि-वार-नक्षत्र -योग-लग्नानां साधनं | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | शुभाशुभत्वविवेचने । ३ जागृतादिभूमीनां लक्षणफलवर्णने, तडागादिखननमुहूर्तविचारणे । ४ विश्वकर्मप्रकाशवास्तुरत्नादिग्रन्थाधारेण भूमिसंशोधनप्रकारविवेचने । ५ गृहनिर्माणभूमौ शङ्कुशिलान्यासस्तम्भोच्छ्रायविधिबोधे सफलं शल्यनिष्कासनप्रकारवर्णने च । ६. दिक्साधने मेंगनाथह्यालुगि-सुधाकरमतेन गृहपिण्डानयने च । ७. गृहस्य आय-वारांश-द्रव्यादिसाधने, राशि-गृहनक्षत्र-योनि-ग्रहमैत्री- नाडीनां गृहारम्भे मेलापकादौ विचारणे । ८. गृह-देवप्रासाद-जलाशयनिर्माणविधौ राहुमुखविचारणे । | यावन्निर्दिष्टविषयाः। | | |
| घ | १. गृहारम्भकालिकग्रहस्थितिवशेन शुभाशुभत्वविचारणे । २. वृषवास्तुचक्र-वास्तुपुरुषास्थिति-कूर्मचक्र-मण्डलेश- अजिरानयनप्रकारविवेचने तत्फलविमर्शने च । ३. द्वारस्थापने प्रशस्ततिथि-वार-नक्षत्र-योग-लग्नानां विवेचने नृपादिब्राह्मणान्तानां पञ्चपञ्चगृहाणां प्रमाणनिर्देशने । | गृहारम्भविधौ ग्रहस्थितिवशेन जायमानशुभाशुभत्वफलवर्णनात् सप्रयोजनं वृक्षारोपणमुहूर्तपर्यन्तं निर्दिष्टविषयाः । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | ४. त्रिविधगृहप्रवेशने प्रशस्ततिथिवारनक्षत्रादीनां चयने<br>प्रवेशकालिकग्रहस्थितिवशेन गृहस्वामिनः शुभाशुभत्ववर्णने ।<br>५. सप्रयोजनं वामसूर्य-कलशचक्रलक्षणफलवर्णने ।<br>६. जीर्णगृहप्रवेशने यात्रानिवृत्तस्य गृहप्रवेशे च मुहूर्तनिर्धारणे ।<br>७. गजाश्वदिपशूनां गृहनिर्माणे चरणीसाधने ।<br>८. वापीकूपतडागजलाशयवाटिकानिमर्णिमाहात्म्यवर्णने वृक्षारोपणमुहूर्तप्रदाने च । | | | |
| ङ | १. दकार्गलवैशिष्ट्यप्रकाशने ।<br>२. मरुदेशे जाङ्गलदेशे च शिराज्ञानप्रकारबोधे ।<br>३. कूपादिदिग्विभागेन मुख्यगृहस्य शुभाशुभत्वविवेचने ।<br>४. वापीकूपतडागादीनां मुहूर्तप्रदाने ।<br>५. वृक्षारोपणविधिबोधे तन्महत्त्वप्रतिपादने च।<br>६. रोपितवृक्षाणां रोगज्ञानपूर्वकं तच्चिकित्साकरणे ।<br>७. सप्रयोजनं देवालयविधानविधिनिर्देशने ।<br>८. जलाशयारामदेवप्रतिष्ठामुहूर्तप्रदाने । | जलाशयमाहात्म्यवर्णनादारभ्य देवप्रतिष्ठायां देवमुखोपवेशने दिङ्नियमपरिज्ञानपर्यन्तं निर्दिष्टविषयाः । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | ९. देवप्रतिष्ठायां देवमुखोपवेशने दिङ्नियमविचारणे । | | | |

## ४.पाठ्यवस्तुविवरणम्

(क) प्रकरणे

१ .शुभकर्मणि त्याज्यविषयाः

२. नक्षत्रस्वामिनो देवा नक्षत्राणां स्थिरादिसंज्ञा च ।

३. दिनरात्रिमुहूर्ताः

४.प्रथमरजोदर्शने शुभमुहूर्तः

५. सामान्यलग्नबलवर्णनम्

६. गर्भाधानमुहूर्तः

७. पुंसवन-सीमन्तोन्नयनमुहूर्तौ

८. जातकर्म-नामकरणमुहूर्तौ

९. दोलारोहण-भूम्युपवेशन-दुग्धपान-निष्क्रमणमुहूर्ताः

१०. कर्णवेधमुहूर्तः

११. अन्नप्राशनमुहूर्तः

१२. अन्नप्राशने लग्नबलविचारः

१३. गुरुशुक्रयोरस्तादिकेषु वर्ज्यावर्ज्यकर्माणि

१४. गुरुशुक्रयोर्बाल्ये वार्धक्ये च त्याज्यदिनप्रमाणम्

१५. चूडाकर्मणि ग्राह्यलग्नबलं शुभमुहूर्तश्च

१६. चूडायां जनन्यार्तवे निषेधकथनम्

१७. वर्णक्रमाच्चौले ग्राह्यवारतिथिनक्षत्रलग्नानां चयनम्

१८. व्यक्तिविशेषाणां क्षौरनिर्णयः

१९. सीमन्तोर्ध्वं पत्युर्मुण्डननिषेधकथनम्

२०. क्षौरदिनविचारः

२१. क्षौराक्षरारम्भमुहूर्तौ

२२. ब्राह्मण-क्षत्रिय-वैश्य-जातीनामुपनयनकालवर्णनम्

२३. उपनयनादौ गुरुशुद्धिप्रकार:,गुरोर्वेधविचारश्च

२४. उपनयने ग्राह्यमासनक्षत्राणि वेदाधिपा ग्रहशुद्धिश्च

२५. उपनयने लग्नभङ्गयोग:

२६.केशान्त-मौञ्जीमोक्ष-च्छुरिकाबन्धनमुहूर्ता:

२७.वधूवरयोर्मेलापके गुणक्रमवर्णनम्

२८.वर्ण-वश्य-तारा-योनि-योनिवैर-राशीश-ग्रहमैत्री-गण-भकूट-ग्राह्यभकूट-नाड्याधारेण वधूवरयो:

शुभाशुभत्वम्

२९.वर्णादीनामाधारेण गुणसंख्याऽऽनयनम्

३०.वधूवरयोर्विवाहसमयवर्णनम्

३१.सवेधानि विवाहग्राह्यनक्षत्राणि

३२.विवाहेतरकर्मविशेषे वेधनिर्णयप्रकार:

३३.वेधभङ्गो लत्तादोषश्च

३४.विवाहे दोषान्तरकथनम्

३५.सन्धिदोषादिवर्णनं भद्राज्ञानञ्च

३६.त्रिविधगण्डान्त-चण्डायुधैकार्गल-यामार्ध-कुलिक-काल-कण्टक-यमघण्ट-दुर्मुहूर्त-क्रान्तिसाम्य-

मृत्युयोगानां लक्षणफलवर्णनम्

३७.नक्षत्राणां मध्यमविषघटीप्रमाणम्

३८.विषघटीस्पष्टीकरणं तत्परिहारश्च

३९.विवाहे लग्नशुद्धिस्तदपवादश्च

४०.ग्रहदोषपरिहारवर्णनम्

४१.ससन्धिद्वादशभावसाधनम्

४२.सापवादं कर्तरीलक्षणम्

४३.पञ्चकदोषस्तत्परिहारश्च

४४.विवाहे लग्ननवांशशुद्धिस्तदपवादश्च

४४.विवाहे लग्ननवमांशसाधने विशेषविचारणीयविषयाः

४५.उदयास्तशुद्धिर्होरासाधनञ्च

४६.जामित्रदोषस्य लक्षणफलवर्णनम्

४७.ग्रहदृष्टिविचारः

४८.षड्वर्गनामानि

४९.अभीष्टदिने सूर्येष्टकालयोरानयनम्

५०.लग्नादिष्टकालसाधनेविशेषविचारणीयविषयाः

५१.घटीयन्त्रस्थापनाप्रकारः

५२.गोधूलीलग्नपरिज्ञानम्

५३.विवाहवेदीनिर्माणविधिः

५४.विवाहाङ्गकर्मणि शुभमुहूर्ताः

५५.वधूप्रवेशमुहूर्तः

५६.प्रथमाषाढादौ कन्यायाःपत्यादिगृहे निवासफलानि

५७.पुनर्भूविवाहमुहूर्तो रूद्रपट्टशुद्धिश्च

५८.विवाहविषयेऽत्यावश्यकानां विविधधर्मशास्त्रीयसिद्धान्तानामनुशीलनम्

५९.धर्मपत्नीरहितर्जनैर्धर्मार्थं धारणीयाःस्त्रीयः

६०.विषकन्यायोगौ

६१.मूलाश्लेषाज्येष्ठानक्षत्रजातानां कन्यकानां फलानि

६२.विवाहविषयकविविधसिद्धान्तवर्णनम्

६३.निश्चितेऽपि विवाहे सूतकप्राप्तौ कर्तव्यकर्मनिरूपणम्

६४.भ्रात्रादिमरणे विवाहकर्मनिरूपणम्

६५.अनारब्धेऽपि विवाहकर्मणि जननाशौचे क्वचिद् विवाहकर्मकरणे विधिदर्शनम्

६६.सिंहस्थगुरौ विवाहव्यवस्थावर्णनम्

६७.नामराशिजन्मराश्योःप्रयोगस्थलवर्णनम्

६८.अज्ञातजन्मर्क्षस्य नामाद्यक्षरान्नक्षत्रज्ञानम्

(ख) प्रकरणे

१. अग्न्याधाने लग्नमुहूर्तादिनिर्धारणम्

२. नामराशितो ग्रामस्य शुभाशुभत्वविचारः

३. काकिणीविचारणे भूमेः शुभाशुभत्वम्

४.श्वेतादिवर्णवशाद् गन्धवशाच्च विप्रादीनां कृते भूमेः शुभाशुभत्वम्

५. वर्णपरत्वेन भूप्लवत्वं भूमौ शल्यज्ञानञ्च

६. भूमेः शुभाशुभत्वज्ञानोपायः

७. दिक्साधनप्रकारः

८. गृहारम्भे त्याज्यतिथिवारनक्षत्राणि

९. वृषवास्तुचक्रम्

१०. गृहद्वारकरणम्

११. गृहायज्ञानं तद्वशाद्द्वारविधानम्

१२. राशिवशेन गृहद्वारकरणम्

१३. गृहमुखवेधपरिज्ञानं तत्परिहारवर्णनञ्च

१३. गृहनक्षत्राधारेण तद्व्ययज्ञानम्

१४.गृहनक्षत्रतः तद्राशिज्ञानेन गृहस्य शुभाशुभत्वकथनं ध्रुवादिषोडशनामकरणरीतिश्च

१५. गृहनामाक्षरसंख्यापरिज्ञानम्

१६. गृहांशाधारेण तच्छुभाशुभवर्णनम्

१७. गृहनिर्माणाय स्थलसाधनप्रकारः

१८. गृहे सूत्रन्यासप्रकारो वास्तुस्थितिदर्शनश्च

१९. शङ्कुशिलान्यासप्रकारवर्णनम्

२०. पूर्वादिदिक्षु द्वारस्थापनपरिमाणवर्णनम्

२१. स्तम्भस्थापनपद्धतिः

२२. गृहौच्च्यपरिमाणम्

२३. मुख्यगृहादुपकरणगृहाणां दिग्व्यवस्था

२४. कुत्र गृहे आयादिकं नैव विचार्यमित्यस्य वर्णनम्

२५. गृहप्रवेशमुहूर्तो गृहप्रवेशस्य त्रैविध्यदर्शनम्

२६. कलशचक्रवर्णनम्

२७. गृहप्रवेशे लग्नशुद्धिदर्शनं वामरविविचारश्च

२८. यात्रायाः शुभसमयवर्णनम्

२९. पूर्वादिदिक्षु वारनक्षत्रतिथिशूलानां निदर्शनम्

३०. दिग्द्वारिनक्षत्राणि परिघदण्डश्च

३१. सर्वदिग्गमननक्षत्राणि

३२. यात्रायां लग्नवैशिष्ट्यम्

३३. यात्रायां कालभेदेन निन्द्यनक्षत्राणि अभिजिन्मानं तद्वैशिष्ट्यञ्च

३४. अयनपरत्वेन वारपरत्वेन च यात्रायां शुभत्वदर्शनम्

३५. अडलविडलयोगाधारे यात्रायां शुभत्ववर्णनम्

३६. दिग्वार-शूलानां दोहदज्ञानम्

३७. यात्रालग्ने त्याज्यविषया दिगीशज्ञानोपायश्च

३८. दिगीशे ललाटगे यात्रानिषेधपरिवर्णनं ललाटगतग्रहलक्षणञ्च

३९. यात्राहानिकरयोगवर्णनम्

४०. ग्रहाणां जन्मनक्षत्राणि तत्प्रयोजनञ्च

४१. यात्रालग्ने शुभयोगः

४२. यात्रालग्ने शुभाशुभग्रहाः

४३. सम्मुखबुधशुक्रापवादः

४४. सम्मुखशुक्रस्य परिहारान्तरवर्णनम्

४५. यात्रानियमाः

४६. यात्रायां त्याज्यविषयवर्णनम्

४७. यात्रायां शुभाशुभशकुनानि

४८. कार्यवशाद् विपरीतशकुनानां शुभत्वदर्शनम्

४९. अपशकुने दृष्टे इतिकर्तव्यतावर्णनम्

५०. राजाभिषेकसुरस्थापनमुहूर्तौ

५१. वस्त्रधारणवस्त्रप्रक्षालनमुहूर्तौ दग्धादिवस्त्रपरीक्षा च

५२. पुरुषाणामाभूषणधारणमुहूर्तः क्रयविक्रयमुहूर्तश्च
५३. धनिष्ठादिपञ्चकवर्ज्यविषयाः
५४. सेवासंन्यासमुहूर्तौ
५५. कृषिकर्मणि शुभमुहूर्तः
५६. कृषिकर्मणि लाङ्गलचक्रं बीजवपनं फणिचक्रञ्च
५७. मेधिस्थापन-नवान्नभक्षण-नृत्य-संगीतमुहूर्ताः
५८. पशुकर्मणि शुभमुहूर्तः
५९..आश्वीक्रियायाःशुभमुहूर्तः
६०. सापवादमभ्यङ्गे निषिद्धसमयवर्णनम्
६१. आमलकस्नाने निषिद्धसमयकथनम्
६२. प्रसूतिस्नानं शुभमुहूर्तश्च
६३. वैद्यकर्मणि शुभसमयवर्णनम्
६४. रोगोत्पन्ननक्षत्राधारेण रोगावधिज्ञानम्
६५. रोगमुक्तस्य स्नानमुहूर्तः
६६. द्रव्यप्रयोगमुहूर्तः
६७. नष्टद्रव्यप्राप्ति-द्रव्यनिक्षेप-मन्त्रग्रहण-तरुरोपणमुहूर्ताः
६८. जलाशयारम्भ-राजदर्शन-शान्तिक-पौष्टिककर्मणां शुभमुहूर्ताः
६९. दिव्यकर्मणि शुभसमयः
७०. गुरुशुक्रास्तापवादस्थलानि
७१. तीर्थयात्रानिषेधसमयः
७२. वर्षाधिकलम्बितप्रेतकर्मणि प्रशस्यकालाः
७३. अनध्यायदिनानि
७४. अनध्यायनिर्णयस्तत्राध्येयानध्येयविषयवर्णनम्
७५. नैमितिकानध्यायाः
७६. प्रदोषानध्यायाः
७७. पल्लीसरटयोःपतनारोहणफलानि

७८. जन्मराशेर्ग्रहाणां शुभाशुभत्ववर्णनं ताराबलज्ञानञ्च

७९. ग्रहवेधज्ञानप्रकारः

८०. सङ्क्रान्तेःशुभाशुभत्ववर्णनं तत्पुण्यकालनिर्धारणञ्च

८१. अधिमासक्षयमासयोर्लक्षणे

८२. क्षयमासे जातस्य मृतस्य च तिथिनिर्णयप्रकारः

८३. मुहूर्तमार्तण्डग्रन्थकर्तुर्नारायणदैवज्ञस्य परिचयः

८४. मुहूर्तमार्तण्डग्रन्थाध्ययनफलं तद्ग्रन्थसंख्या च

८५. मुहूर्तमार्तण्डग्रन्थरचनाकालस्तद्ग्रन्थाशीर्वादश्च

८६. मुहूर्तमार्तण्डग्रन्थस्थविषयाणामङ्गीकरणे कारणसंदर्शनञ्च

**(ग) प्रकरणे**

१. वास्तुपुरुषस्यैतिह्यस्वरूपकथनम्

२. गृहनिर्माणकारणदर्शनं तत्फलदर्शनञ्च

३. वापीकूपभवनादीनां जीर्णोद्धारफलम्

४. परगृहनिवासफलवर्णनम्

५. गृहारम्भविधिः

६. ग्रामनिवासाय नराकारचक्रेण फलवर्णनम्

७. ग्रामनिवासार्थं शुभाशुभज्ञानाय शिवावलिप्रकारः

८. सप्रयोजनं नामाक्षरवशेन गरुडादिवर्गज्ञानम्

९. काकिणीविचारः

१०. राशिवशेन ग्रामवासविचारः

११. अष्टोत्तरीयदिग्दशाज्ञानं तत्फलविवेचनञ्च

१२. वशिष्ठनारदादिमतेन वर्णपरत्वेन भूमिलक्षणानि

१३. मतान्तरसहितं भूमेरष्टदिक्प्लवत्वफलकथनम्

१४. वराहमतेन प्रशस्तभूमिलक्षणम्

१५. भूमिदोषवर्णनम्

१६. गजपृष्ठ-कूर्मपृष्ठ-दैत्यपृष्ठ-नागपृष्ठभूमीनां लक्षणफलानि

१७. आयतचतुरस्रवृत्ताद्याकारयुक्तभूमिनिवासफलम्
१८. वासयोग्या भूमिः
१९. जागृतादिभूमीनां लक्षणफलानि
२०. तडागादिखननमुहूर्तः
२१. जीवितादिभूमिलक्षणं तत्फलवर्णनम्
२२. प्रश्नाज्जीवितादिभूमिज्ञानम्
२३. भूखननाच्छल्यनिष्कासनप्रकारः
२४. रामदैवज्ञमतेन भूखननप्रकारः
२५. विश्वकर्मप्रकाशवास्तुरत्नमुहूर्तमार्तण्डग्रन्थाधारेण भूमिसंशोधनप्रकारः
२६. खातमध्ये पाषाणादिप्राप्तिफलम्
२७. भूमिपूजनविधिः
२८. भित्तिनिर्माणप्रकारः
२९. गृहनिर्माणार्थं विजयादीष्टिकानां लक्षणफलवर्णनम्
३०. इष्टकाचक्रवर्णनम्
३१. इष्टकोपरि वह्निदीपनचक्रज्ञानम्
३२. शिलान्यासविधिः
३३. शार्ङ्गधरानुसारेण स्तम्भस्थापनप्रकारः
३४. स्तम्भस्थापने कश्यपमतम्
३५. स्तम्भोच्छ्रायविधिः
३६. नूतनगृहे ग्राह्याग्राह्यकाष्ठानि
३७. काष्ठचयने नारद-वराहमतवर्णनम्
३८. गृहनिर्माणे वृक्षच्छेदनमुहूर्तः
३९. वृक्षच्छेदने भूतादीनां प्रार्थना
४०. खाते निक्षेपवस्तूनि
४१. वास्तुकृत्यवर्णनम्
४२. वराहमते स्तम्भनामानि

४३. वराहमतेन गृहोच्चतापरिमितिः

४४. पूर्वादिदिक्षु गृहस्योच्चनीचत्वफलम्

४५. मुख्यगृहात् कार्यवशेन निर्मेयगृहाणां दिग्व्यवस्था

४६. भूमिशोधनाय सूत्रव्यवस्थाकथनम्

४७. महाज्योतिर्निबन्धवास्तुराजवल्लभोक्तदिशा शल्यनिष्कासनप्रकारः

४८. अहिबलचक्रनिर्माणविधिस्तदाधारेण शुभाशुभफलकथनञ्च

४९. दिक्साधनप्रकारः

५०. गृहस्थलसाधनप्रकारः

५१. मेंगनाथ-ह्यालुगि-सुधाकरमतेन गृहस्य पिण्डानयनप्रकारः

५२. गृहस्य आय-वारांश-द्रव्यादिसाधनप्रकारः

५३. आयसाधनं तत्फलवर्णनञ्च

५४. आयानां स्वरूपाणि

५५. जातिराशिवशेन आयविचारः

५६. वारवशेन आयानां शुभाशुभत्वम्

५७. वशिष्ठच्यवनमताभ्यामायविचारः

५८. मेलापकादौ नामराशेःप्राधान्यदर्शनम्

५९. गृहमेलनादौ राशिनिर्धारणप्रकारः

६०. गृहनक्षत्रविचारः

६१. योनि-ग्रहमैत्री-नाडीविचार

६२. गृहारम्भे गृहमेलनादिविचारः

६३. गृहारम्भे एकनाडीप्राशस्त्यम्

६४. कीदृशेषु गृहेषु आयादिकं नैव विचार्यम् ?इत्यस्य वर्णनम्

६५. तृणादिगेहेषु शिलान्यासनिषेधवर्णनम्

६५. ग्रहाणामंशेशसाधनम्

६६. पिण्डाद् द्रव्यर्ण-नक्षत्र-तारा-तिथियोगायुःसाधनं तत्फलविवेचनञ्च

६७. गृहविनाशकारणविचारः

६८. गृहपिण्डानुसारेण मण्डलज्ञानम्

६९. शालाध्रुवाङ्कानयनप्रकारःगृहषोडशनामानि च

७०. वास्तुनिवेशनप्रकारः

७१. गृहनिर्माणे कालशुद्धिविचारः

७२. गृहनिर्माणे मासशुद्धिः

७३. गृहनिर्माणे ग्राह्यमासाः

७४. देवालयादिनिर्माणे राहुमुखविचारः

७५. जीर्णगृहनिर्माणे मासादिविचारः

७६. गृहारम्भे तिथिवारनक्षत्रयोगलग्नशुद्धिविचारः

**घ) प्रकरणे**

१. गृहारम्भकालिकग्रहस्थितिवशेन गृहेशस्य शुभाशुभत्ववर्णनम्

२. गृहप्रवेशे गृहनिर्माणे च सप्तसकारमहत्ववर्णनम्

३. गृहायुष्यविचारः

४.गृहारम्भकालिकग्रहस्थित्याधारेण चिरलक्ष्मीयुक्त-श्रीहीन-वर्षान्तरालपरहस्तगत-सुखपुत्रद-रक्षोभूतादियुक्त-धनधान्यदगृहाणां लक्षणानि

५. गृहपिण्डप्राप्तनक्षत्र-चन्द्रनक्षत्रयोराधारेण गृहस्य शुभाशुभत्ववर्णनम्

६. सप्तशलाकाचक्रतो गृहस्य शुभाशुभत्वकथनम्

७. गृहारम्भे वज्राद्या अष्टौ निषिद्धयोगाः

८. सप्रयोजनं वृषवास्तुचक्रवर्णनम्

९. वास्तुपुरुषस्य स्थितिज्ञानं तत्फलवर्णनञ्च

१०. लल्लमतेन शङ्कुन्यासप्रकारः

११. सफलं कूर्मचक्रवर्णनम्

१२. शङ्कुलक्षणनिर्देशः

१३. मण्डलेशानयनविचारस्तत्फलविमर्शश्च

१४. अजिरानयनप्रकारस्तत्फलविमर्शश्च

१५. द्वारनिर्णयः

१६. सापवादं द्वारवेधफलम्

१७. द्वारस्थापनप्रकारः

१८. चतुर्दिक्षु स्थितानां द्वात्रिंशद्द्वाराणां पृथक् पृथक् फलानि

१९. द्वारनिर्णयाय द्वारचक्रवर्णनम्

२०. द्वारस्थापने शुभफलप्रदायकानां तिथिवारनक्षत्रयोगलग्नानां वर्णनम्

२१. नृपादिब्राह्मणान्तानां पञ्चपञ्चगृहाणां प्रमाणानि

२२. गृहप्रवेशस्य त्रैविध्यप्रदर्शनम्

२३. गृहप्रवेशे सामान्यसमयनिर्देशः

२४. गृहप्रवेशे तिथिवारनक्षत्रलग्नानां शुद्धिविचारः

२५. गृहप्रवेशकालिकलग्नवशेन ग्रहस्थित्या च गृहस्वामिनःशुभाशुभत्ववर्णनम्

२६. वामरविलक्षणं गृहप्रवेशे तद्वैशिष्ट्यवर्णनम्

२७. सप्रयोजनं कलशचक्रवर्णनम्

२८. गृहप्रवेशे निषेधविषयाः

२९. गृहप्रवेशे गृहपतिकर्तव्यम्

३०. जीर्णगृहप्रवेशमुहूर्तः

३२. यात्रानिवृत्तस्य गृहप्रवेशमुहूर्तः

३३. वास्तुप्रदीपानुसारेण गृहप्रवेशविचारः

३४. पशुगृहनिर्माणे चरणिविचारः

३५. अश्वशालानिर्माणविधिः

३६. अश्वबन्धनस्थानविचारः

३७. उच्छ्रितिवशेन अश्वानां साधु-श्रीवत्सादिसंज्ञाकरणम्

३८. गजगृहनिर्माणप्रकारः

३९. उच्छ्रितिवशेन गजानां सङ्कीर्ण-मन्द-मृग-भद्रसंज्ञाकरणम्

४०. आलेख्यकर्मणि निषिद्धाःपशुपक्षिणः

४१. गृहसमीपे मन्दिरमीपे च शुभाशुभफलप्रदायकानां वृक्षाणां नामानि

४२. वराहोक्तशुभाशुभफलदवृक्षाणां नामानि

४३. वाटिका-कूप-तडागनिर्माणमाहात्म्यवर्णनम्
४४. दिग्भेदेन वृक्षाणां शुभाशुभत्ववर्णनम्
४५. वृक्षरोपणात् स्वर्गप्राप्तिकथनम्
४६. दिग्विभागेन वृक्षारोपणप्रकारनिदर्शनम्
४७. गृहारामनिर्माणप्रकारः
४८. वृक्षरोपणकूपनिर्माणयोःफलम्
४९. राजवाटिकानिर्माणविधिः
५०. राजोचितजलयन्त्रनिर्माणप्रकारः
५१. जलयन्त्रसमीपे रोपणीयाः पुष्पवृक्षाः
५२. ऋत्वनुरूपविहाराय मण्डपनिर्माणविधिः
५३. वृक्षरोपणमुहूर्तः
५४. वृक्षरोपणे बृहस्पतिमतवर्णनम्
५५. शक्तियामलोक्तवृक्षचक्रम्
५६. प्रकारान्तरेण वृक्षरोपणफलनिदर्शनम्

**ङ) प्रकरणे**

१. जलाशयमाहात्म्यवर्णनम्.
२. वराहवर्णितं दकार्गलवैशिष्ट्यम्
३. पूर्वादिदिशां स्वामिनःशिरानामानि च
४. स्थानविशेषेण शिराचिह्ननिर्देशनप्रकाराः
५. मरुदेशे शिराज्ञानोपायाः
६. जाङ्गलदेशे शिराज्ञानविधिः
७. अनूपदेशे शिराज्ञानोपायाः
८. दिग्विभागेन कूपस्य शुभाशुभत्वम्
९. मनूक्तप्रकारेण दकार्गलनिरूपणम्
१०. भूमीनां वर्णमृत्तिकादिवशेन जलस्थितिनिर्देशः
११. रामदैवज्ञमतेन कूपदिग्विभागेन मुख्यगृहस्य शुभाशुभत्वविवेचनम्

१२. कूपचक्रं तत्फलवर्णनञ्च

१३. कूपारम्भमुहूर्तः

१४. तडागचक्रं तत्फलविवेचनञ्च

१५. तडागारम्भमुहूर्तः

१६. वाप्यारामुहूर्तः

१७. निर्वारचक्रं तत्फलनिदर्शनञ्च

१८. सामान्यतो वापीकूपतडागारम्भे शुभमुहूर्तः

१९. वृक्षारोपणप्रयोजनम्

२०. वृक्षारोपणाय भूम्या मृदुत्वकरणं तत्प्राशस्त्यवर्णनञ्च

२१. प्रथमरोपणीयवृक्षाः

२२. वृक्षरोपणे काण्डरोप्यमूलरोप्यविधिः

२३. कालानुसारिवृक्षरोपणनियमाः

२४. वृक्षाणामुत्खातप्रतिरोपणविधिः

२५. वृक्षारोपणविधिः

२६. रोपितवृक्षाणां सेचनविधिः

२७. अनूपदेशजवृक्षसेचनप्रकाराः

२८. वृक्षरोपणे मध्यान्तरविचारः

२९. वृक्षाणां रोगविचारः

३०. रोपितवृक्षाणां रोगोत्पत्तौ चिकित्साविधिः

३१. फलनाशचिकित्सावर्णनम्

३२. बीजवपनविधानम्

३३. तिन्तिडी-कपित्थ-श्लेष्मान्तकबीजरोपणविधानम्

३४. सामान्यवृक्षरोपणप्रकारः

३५. वृक्षरोपणनक्षत्राणि

३६. देवमन्दिरनिर्माणप्रयोजनम्

३७. देवतानुरागस्थलानि

३८. मन्दिरोचितभूमिनिर्देशः

३९. देवालयोक्तवास्तुपुरुषलक्षणं द्वारविभागश्च

४०. देपालयनिर्माणविधिः

४१. मेरुमन्दरादिविंशतिप्रासादनामानि तेषां लक्षणानि च

४२. मयविश्वकर्मणोर्मतेन भूमिमानवर्णनम्

४३. प्लवत्वाधारेण भूमेःफलवर्णनम्

४४. जलाशयारामदेवप्रतिष्ठामुहूर्तः

४५. मासानुसारेण प्रतिष्ठाफलकथनम्

४६. उग्रप्रकृतिवतां देवानां स्थापनाप्रकारः

४७. देवविशेषस्थापने प्रशस्यमासाः

४८. देवस्थापनायां पक्षविचारः

४९. वसिष्ठबृहस्पतिमताभ्यां देवस्थापने वारनक्षत्रफलानि

५०. देवतानां स्थापने वर्णपरत्वेन शुभनक्षत्राणि शुभराशयश्च

५१. देवप्रतिष्ठायां शुभसमयविचारः

५२. वसिष्ठमतेन प्रतिष्ठामुहूर्तविचारः

५३. शुभकर्मणि त्याज्यानि वैनाशिकनक्षत्राणि

५४. देवप्रतिष्ठायां वसिष्ठनारदमतेन लग्नशुद्धिः

५५. वसिष्ठमतेन देवप्रतिष्ठायां दुष्टलग्नपरिहारः

५६. देवप्रतिष्ठाया दोषाः

५७. देवप्रतिष्ठायां देवमुखोपवेशने दिङ्नियमाश्च

## ५. शिक्षणविधिः शैक्षणिकसामग्री च

पाठ्यांशस्यास्य शिक्षणे यथावश्यकं व्याख्यानप्रश्नोत्तरविश्लेषणतुलनात्मकागमन-निगमनाद्याः शिक्षणविधयः प्रयोक्तुं शक्यन्ते । शिक्षकैस्तदितराः प्राक्कल्पनादयः छात्रकेन्द्रिता विधयोऽपि विषयक्षेत्रगताध्ययनसहजीकरणायाबलम्बनीयाः । समुचितानां प्रतिपाद्यविषयाणामवबोधने श्रव्यदृश्यसामग्रीणां प्रयोगो विधेयः ।

विशेषावस्थायामन्तर्जालादिमाध्यमेन दूरशिक्षणमपि सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा कर्तव्यम् । मूलतो मुहूर्तविषयकशिक्षणक्रमे नेपाले प्रकाशितानां पञ्चाङ्गपत्राणां प्रयोगस्तथा वास्तुविषयकशिक्षणक्रमे तद्विषयसम्बद्धानां चित्रपटादीनां प्रदर्शनं कर्तव्यम् । भूमेः शुभाशुभत्वपरिज्ञाने गृहनिर्माणे च दिशानिर्देशिकायन्त्रस्य (Compas) प्रयोगो विधेयः ।

## ६.मूल्याङ्कनविधिः

मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते ।

### (क) निर्माणात्मकमूल्याङ्कनम्

कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिकपरीक्षामाध्यमेन शिक्षार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलशिक्षार्थिनां स्तरोन्नत्यै शिक्षणकार्यस्य सहजीकरणाय चोपयुक्तवातावरणस्य निर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये वैयक्तिक-सामूहिकविमर्शन-मौखिकपरीक्षा-लिखितपरीक्षा-विशेषयोग्यताप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृतिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन शिक्षार्थिनां योग्यतावृद्धिर्भवेत् । निर्माणात्मकमूल्याङ्कनमेवान्तरिकं मूल्याङ्कनमस्य कृते प्रतिशतं पञ्चविंशत्यङ्का निर्धारिताःसन्ति । आन्तरिकमूल्याङ्कनं विद्यापीठस्य विभागेन सम्बद्धशिक्षकसम्मतौ विधेयम् । शिक्षणक्रमे औपचारिकरूपेणानौपचारिकरूपेण च शिक्षणोपलब्धिः परिमापणीया । शिक्षणसहजीकरणक्रमे शिक्षार्थिभिरधिगतानां ज्ञानानामाधारेणान्तरिकमूल्याङ्कनं कर्तव्यम् । तस्य कृतेऽधोनिर्दिष्टतालिकानुसारेणाङ्कसंयोजनं विधेयम् ।

| क्र.सं | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | उपस्थितिः | ३ |
| २. | शिक्षणसहभागिता | ३ |
| ३. | कक्षाकार्यं परियोजनाकार्यं वा | ९ |
| ४. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| योगः | | २५ |

### (ख) निर्णयात्मकं मूल्याङ्कनम्

पाठ्यक्रमानुरूपं ज्ञानं विद्यार्थिभिःप्राप्तं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं विधाय छात्राणां योग्यतानिर्धारणं क्रियते । कक्षोन्नतये शैक्षिकसत्रस्यान्ते

निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन कर्तव्यम् । निर्णयात्मकमूल्याङ्कनमेव वाह्यमूल्याङ्कनम् । प्रश्नपत्रे वाह्यपरीक्षाया:पूर्णाङ्का:शतमेव भवति । परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामङ्कानामाधारेण ने.सं.वि.परीक्षानियन्त्रणकार्यालयेनानुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनायाङ्कवितरणेन सहैवाधोनिर्दिष्टा:प्रश्नप्रकारा निर्धारिता:सन्ति । सामान्यतया बाह्यपरीक्षा लेखात्मिकैव भवति ।

वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसरणी

| प्रकरणानि | प्रश्नप्रकारा: | प्रश्नसंख्या: | | अङ्का: |
|---|---|---|---|---|
| | | प्रष्टव्या: | समाधेया: | |
| क | विवेचनात्मका: | ३ | २ | २X१२=२४ |
| ख | संक्षिप्तोत्तरापेक्षिण: | ९ | ६ | ६X७=४२ |
| ग | व्याख्यात्मका: | ४ | ३ | ३X८=२४ |
| घ | वस्तुगता: | १० | १० | १० X१=१० |
| ङ | योग: | २६ | २१ | १०० |

७. पाठ्यग्रन्थसूची

**क. स्रोतग्रन्थौ**

मुहूर्तमार्तण्ड: –नारायणदैवज्ञविरचित:

बृहद्वास्तुमाला –श्रीरामनिहोरद्विवेदिसंगृहिता

**(ख) सहायकग्रन्था:**

मुहूर्तचिन्तामणि: –रामदैवज्ञकृत:

मुहूर्तगणपति: –गणपतिकृत:

गृहरत्नविभूषणम्–मातृकाप्रसादपाण्डेयविरचितम्

बृहत्संहिता –वराहमिहिराचार्यप्रणीता

गृहवास्तुप्रदीप: –अज्ञातकर्तृक:

# पूर्वमीमांसा

**पाठ्यांशनाम-** मीमांसादर्शनसम्मतप्रमेयाणि  **पाठ्यांशसङ्केतः-**पू.मी. ४०१

**स्तरः-** शास्त्री  **पूर्णाङ्काः-** १००

**वर्षम्-** द्वितीयम्  **वार्षिकपाठ्यभारः-** १६०घण्टाः

**पत्रम्-** तृतीयम्  **साप्ताहिकःपाठ्यभारः-** ६

## १. पाठ्यांशपरिचयः

शास्त्रिकक्षायाः द्वितीयवर्षे पूर्वमीमांसाविषयमध्येतुं प्रविष्टानां छात्राणां कृतेऽयं पाठ्यक्रमो निर्धारितोऽस्ति । प्रथमवर्षे मीमांसादर्शनस्य परिचयस्य प्रदायाकाः पाठ्यांशा निर्धारिता आसन् । अधुना द्वितीयवर्षे तृतीयपत्रेऽस्मिन्मुख्यतया मीमांसासम्मतप्रमाणविषयकाः पाठ्यांशाःसन्निविष्टाःसन्ति।

पत्रेऽस्मिन् मीमांसाशास्त्राध्यनोत्सुकानां मीमांसाशास्त्रप्रविविक्षूणाञ्च कृते मन्त्रार्थवादाध्ययनविधि-मीमांसासम्मतप्रमाणादिविषयकं विश्लेषणात्मकं ज्ञानं प्रदातुमावश्यकाः पाठ्यांशाः सन्निविष्टाः सन्ति । अत्र सन्निविष्टेषु पाठ्यांशेषु कप्रकरणे मन्त्राणां लक्षणप्रयोजनादिविवेचनम्, नामधेयत्वे निमित्तचतुष्टयमित्यादयो विषयाः प्रतिपादिताः सन्ति । खप्रकरणे निषेध-भावना-ऽर्थवादानां निरूपणं विधाय तत्तद्विषयाणां विवेचनं विहितं विद्यते ।गप्रकरणे धर्मशास्त्रारम्भप्रतिज्ञाधिकरणेधर्मस्य प्रत्यक्षाद्यगम्यत्वमित्यधिकरणे चाऽऽगतानां विविधविषयाणां विस्तृतं विवेचनं विविधशास्त्राचार्यमतविलोडनं च विद्यते। घप्रकरणे धर्मे वेदस्य प्रामाण्यमित्यधिकरण आगतानां वेदापौरुषेयत्वम् मीमांमासम्मतप्रत्यक्षानुमानादिप्रमाणानीत्यादिविषयाणां विवेचनं वर्तते। ङप्रकरणे मानमेयोदयग्रन्थे प्रतिपादितानां प्रत्यक्षाऽनुमान-शब्दोपमाना-ऽर्थापत्त्यनुपलब्धिप्रमाणानां मीमांसासम्मतं विवेचनमस्ति ।

## २. पाठ्यांशसामान्योद्देश्यम्

अस्य पाठ्यांशस्याध्ययनेन छात्रा अधोलिखितविषये प्रावीण्यमेष्यन्ति--

- मन्त्राणां प्रयोजनलक्षणप्रतिपादने
- नियमविध्यपूर्वविधिपरिसङ्ख्याविधिविवेचने
- निषेधपर्युदासभेदनिरूपणे
- अर्थवादभावनादिनिरूपणे

- अध्ययनविधिविवेचने
- धर्मलक्षणप्रतिपादने
- धर्मस्य प्रत्याक्षाद्यगम्यत्वस्य प्रतिपादने
- वेदस्यापौरुषेयत्वस्य प्रतिपादने
- मीमांसाशास्त्रसम्मतप्रमाणनिरूपणे च ।

## ३. पाठ्यांशस्यविशिष्टोद्देश्यम्, पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | मन्त्रविध्यादिनिरूपणम् | मीमांसान्यायप्रकाशस्योत्तरार्धस्य निर्धारिता विषयाः । | २० | ३२ |
| ख | **निषेधपर्युदासादिनिरूपणम्** | **मीमांसान्यायप्रकाशस्योत्तरार्धस्य निर्धारिता विषयाः।** | २० | ३२ |
| ग | **अध्ययनविध्यादिविचारः** | **शास्त्रदीपिकायास्तर्कपादस्य निर्धारिता विषयाः ।** | २० | ३२ |
| घ | **हेत्वाभासादिविचारः** | **शास्त्रदीपिकायास्तर्कपादस्य निर्धारिता विषयाः ।** | २० | ३२ |
| ङ | **प्रत्यक्षादिप्रमाणनिरूपणम्** | **मानमेयोदयस्य प्रमाणपरिच्छेदे प्रतिपादितानि प्रमाणानि ।** | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

### 'क'प्रकरणे

मन्त्रलक्षणम्,मन्त्रप्रयोजननिरूपणम्, नियमविधिनिरूपणम्, अपूर्वविधिनिरूपणम्, परिसङ्ख्याविधिनिरूपणम्, मन्त्राणां विनियोगविचारः, नामधेयनिरूपणम्, नामधेयत्वस्य निमित्तचतुष्टयम्, मत्वर्थलक्षणाभयान्नामधेयत्वम्, आश्रयलक्षणम्, वाक्यभेदभयान्नामधेयत्वम्, वाक्यभेदः, तत्प्रख्यशास्त्रान्नामधेयत्वम्, देवतात्वलक्षणम्, समिदादिशब्दानां नामधेयत्वम्, तद्व्यपदेशान्नामधेयत्वम्, उत्पत्तिशिष्टगुणबलीयस्त्वान्नामधेयत्वम्, विकल्पस्याष्टौ दोषाश्च ।

**'ख' प्रकरणे**

निषेधनिरूपणम्, निषेधानां निवर्तनाप्रतिपादकत्वम्, नञर्थस्य प्रत्ययार्थेन सम्बन्धः. विधिनिषेधयोभिन्नार्थत्वम्, उपक्रमबलात् पर्युदासाङ्गीकारः, विकल्पभयात् पर्युदासः, पर्युदासप्रतिषेधयोर्वैलक्षण्यम्, पर्युदासोपसंहारयोर्वैलक्षण्यम्, प्रतिषेधोदाहरणम्, अर्थवादनिरूपणम्, अर्थवादस्य भेदचतुष्टयम्, शाब्दभावनानिरूपणम्, वैदिकलिङादिश्रवणे भावनास्वरूपम्,प्रवर्तनासामान्यं विधिशब्दवाच्यम्, इष्टसाधनतैव प्रवर्तना, आर्थभावनानिरूपणम्, अख्यातार्थस्य विचारः, धर्मस्य मोक्षहेतुत्वञ्च ।

**'ग' प्रकरणे**

मङ्गलाचरणम्, धर्मशास्त्रारम्भप्रतिज्ञा, अध्ययनविधिविचारः, अध्ययनाधिकारनियमः, अध्ययनविधौनियोज्यकल्पना, व्याकरणस्मृत्योपनयनस्याध्ययनाङ्गत्वम्, प्रभाकरमतखण्डनम्, अध्ययनविध्युपसंहारः, प्रभाकरमतसमीक्षणम्, प्रथमव्युत्पत्तिः, प्रथमपादप्रतिपाद्यार्थसङ्ग्रहः, धर्मस्य प्रत्यक्षादिप्रमाणागम्यत्वम्, प्रामाण्यविचारः, धर्मलक्षणविचारः, हिंसायां साङ्ख्यमतं तत्खण्डनञ्च, इन्द्रियलक्षणम्, प्रत्यक्षविचारः, अद्वैतमतेन निर्विकल्पकस्य सन्मात्रविषयत्वम्, अद्वैतमतसमीक्षणम्, तर्कमतेनावयवेष्ववयव्युत्पत्तिः, वेदस्यापौरुषेयत्वम्, सामान्यतः प्रमाणलक्षणम्, प्रभाकरमतेन प्रमाणलक्षणम्, कालप्रत्यक्षत्वनिरूपणम्, प्रमाणानां स्वतः प्रामाण्यम्, प्रत्यक्षलक्षणम्, बौद्धमतस्य सामान्यो विमर्शः, अनुमाननिरूपणम्, अनुमाने प्रभाकरमतम्, गृहीतग्राहित्वखण्डनम्, अनुमानावयवनिरूपणम् ।

**'घ' प्रकरणे**

हेत्वाभासनिरूपणम्, अनुमाने दृष्टान्तनिरूपणम्,अनुमाने प्रभाकरमतानुवादः, प्रभाकरणमतसमीक्षणम्, शब्दप्रमाणनिरूपणम्, औलूक्यमतानुवादः, उपमाननिरूपणम्, अर्थापत्तिनिरूपणम्, अर्थापत्तिसमाधानम्, सिद्धान्तेन तर्कमतनिराकरणम्, अर्थापत्तावनुमानस्यान्तर्भावशङ्का, शक्तेःपदार्थान्तरत्वोपपादनम्, श्रुतार्थापत्तिनिरूपणम्, अर्थाध्याहारपक्षखण्डनम्, अभाव(अनुपलब्धि)प्रमाणनिरूपणम्, अभावविषय-कप्रभाकरमतसमीक्षणम्, अभावस्यानुपलब्धिगम्यत्वम् ।

**'ङ' प्रकरणे**

प्रमाणसामान्यलक्षणम्, प्रमाणलक्षणम्, तत्र तार्किकमतनिरासः, तत्र प्रभाकरमतसमीक्षणम्, बौद्धसम्मतप्रमाणलक्षणखण्डनम्, प्रत्यक्षप्रमाणलक्षणम्,मनसो विभुत्त्वस्य स्थापनम्, सन्निकर्षनिरूपणम्, ज्ञानस्य द्विविधत्वम्, कल्पनापोढप्रत्यक्षतावादखण्डनम्,

योगजादिप्रत्यक्षखण्डनम्, अनुमाननिरूपणम्, व्याप्तिनिरूपणम्, तर्कनिरूपणम्, बौद्धसम्मतव्याप्तिखण्डनम्, अनुमानविषयकचार्वाकमतखण्डनम्, अनुमानस्य द्वैविध्यं त्रैविध्यं वेति निरूपणम्, अनुमानस्य त्र्यवयवत्वम्, प्रतिज्ञाभास-हेत्वाभास-दृष्टान्ताभासनिरूपणम्,शब्दप्रमाणनिरूपणम्, अन्विताभिधानवादखण्डनम्, अभिहितान्वयवादः, वाक्यार्थावगमकारणानि, शब्दप्रमाणस्य द्वैविध्यम्, लौकिकशब्दानामनुमानत्वस्य समीक्षणम्, उपमानप्रमाणम्, तार्किकोक्तोपमाननिरासः, अर्थापत्तिनिरूपणम्, अर्थापत्तेरनुमानत्वस्य खण्डनम्, अर्थापत्तेर्द्वैविध्यम्, श्रुतार्थापत्तिर्नास्तीति प्रभाकरमतस्य समीक्षणम्, अनुपलब्धिप्रमाणस्वरूपनिरूपणम्, तत्र परमतनिरासः, अभावस्वरूपनिरूपणम्, अभावप्रत्यक्षताखण्डनम्, अभावखण्डकप्रभाकरमतसमीक्षणम्, सम्भवादीनामितरप्रमाणेष्वन्तर्भावः।

## ५.शिक्षणविधयः शैक्षिकसामग्री च

निगमनाऽऽगमन-प्रश्नोत्तर-प्रवचन-विमर्श-प्रदर्शनात्मकाद्याः शिक्षणविधयोऽत्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदन्येऽन्वेषणपरियोजनादयः प्राक्कल्पनादयश्च छात्रकेन्द्रिता विधयोऽप्यत्र प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयप्रसङ्गानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण, विभागेन विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विधते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियतावलम्बनीया ।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति- आन्तरिकम् (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) चेति । आन्तरिकमूल्याङ्कनं प्रायेणकक्षागतंभवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वित-कार्ययोजनायामान्तरिक-मूल्याङ्कनं विधीयते। गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारत्वेन ग्रहीयन्ते। आन्तरिकमूल्याङ्कनस्य कृते प्रतिशतं विंशतिरङ्का निर्धारिताः। बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालय-परीक्षानियन्त्रण-कार्यालयेनानुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन

सहैव अधोनिर्दिष्टा प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिध्यति ।

वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसरणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क | विवेचनात्मकाः | ३ | २ | २×१२=२४ |
| ख | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६×७=४२ |
| ग | व्याख्यात्मकाः | ४ | ३ | ३×८=२४ |
| घ | वस्तुगताः | १० | १० | १० ×१=१० |
| ङ | योगः | २६ | २१ | १०० |

## ७. पाठ्यसामग्रीसूची

### क) पाठ्यग्रन्थाः

१. मीमांसान्यायप्रकाशः, प्रमाणखण्डः, आपदेवः, व्याख्याकारः- चिन्नस्वामी शास्त्री, वाराणसी : चौखम्बासंस्कृत संस्थानम्, २०५८ ।

२. शास्त्रदीपिका, पार्थसारथिमिश्रः, व्याख्याकारः- रामकृष्णः, वाराणसी : कृष्णदासअकादमी,सन् १९८८।

३.मानमेयोदयः,नारायणभट्टः, व्याख्याकारः- योगीन्द्रानन्दः, वाराणसी : चौखम्बाविद्याभवन,सन् २०१३ ।

### ख) सहायकग्रन्थाः

१. मीमांसान्यायप्रकाशः, व्याख्याकारः- अभ्यङ्करवासुदेवशास्त्री, पुणे : भण्डारकर ओरियन्टल रिसर्चइन्स्टिच्युट, सन् १९७२ ।

२. शास्त्रदीपिका, पार्थसारथिमिश्रः, टीकाकारः-किशोरदासः, वाराणसी : साधुवेलासंस्कृतमहाविद्यालयः, २०३४ ।

३. तन्त्रसिद्धान्तरत्नावली, चिन्नस्वामी शास्त्री, वाराणसी : काशी हिन्दू विश्वविद्यालय, २००१ ।

**ग) सन्दर्भग्रन्थाः**

१. दर्शनामृतम्, बुद्धिसागर पराजुली, काठमाडौं : लेखक स्वयम्, २०२५।

२. षड्दर्शनीसङ्ग्रहः, जाषराजः, सम्पादकः- दीर्घराजघिमिरे, दाङ : नेपाल(महेन्द्र)-संस्कृत-विश्वविद्यालयः, २०४९ ।

३. मीमांसान्यायप्रकाशः,आपदेवः, व्याख्याकारः- पट्टाभिरामशास्त्री,दिल्ली : लालबहादुरशास्त्रि-केन्द्रिय-संस्कृत-विद्यापीठम्,सन् १९८३ ।

## आदर्शप्रश्नपत्रम्

## विषयः– पूर्वमीमांसा

**कक्षाः– शास्त्री** **पूर्णाङ्काः– १००**

**खण्डः– द्वितीयः** **उत्तीर्णाङ्काः– ३५**

**पत्रम् :– तृतीयम्** **समयः– घण्टात्रयम्**

### खण्डः (क)

**१. निर्दिष्टेषु प्रश्नेषु प्रश्नद्वयं समाधेयम्।** **१२×२=२४**

(क) मत्वर्थलक्षणाभयात् कर्मनामधेयत्वमित्यस्य सम्यग्विवेचनङ्क्रियताम्।

(ख) निषेधानां निवर्तनाप्रतिपादकत्वं कथं ? सुष्ठु विविच्यताम्।

(ग) शास्त्रदीपिकाग्रन्थाधारेण हेत्वाभासाः सम्यग्विविच्यन्ताम्।

### खण्डः (ख)

**२. केचन षट् प्रश्नाः समाधेयाः।** **७×६=४२**

(क) मन्त्रलक्षणं विलिख्य लक्षणसमन्वयञ्च कुरुत।

(ख) पर्युदासप्रतिषेधयोर्वैलक्षण्यं स्फुटीक्रियताम्।

(ग) शाब्दीभावनास्वरूपं सम्यगुपस्थाप्यताम्।

(घ) प्रभाकरमतानुसारेण शक्तेः पदार्थान्तरत्वमुपपादनीयम्।

(ङ) 'स्वाध्यायोऽध्येतव्यः' इत्यस्य विधेस्तात्पर्यार्थो वर्णनीयः।

(च) शब्दप्रमाणं सङ्क्षेपेण निरूपणीयम्।

(छ) मतान्तरं निर्दिश्य अर्थापत्तिप्रमाणं सम्यक् प्रतिपाद्यताम्।

(ज) मनसो विभुत्वं साधनीयम्।

(ञ) अन्विताभिधानवादं पूर्वपक्षीकृत्य अभिहितान्वयवाद उपपादनीयः।

### खण्डः (ग)

**३. केचन त्रयः प्रश्नाः समाधेयाः।** **८×३=२४**

(क) प्रत्येकमपूर्वादिविधेर्लक्षणं विलिख्य तेषां विधीनां सविस्तरं व्याख्यां कुरुत।

(ख) युक्तिपुरस्सरं धर्मजिज्ञासाधिकरणगतविषय उपपादनीयः।

(ग) अभावस्यानुपलब्धिप्रमाणगम्यत्वमुपस्थापनीयम्।

(घ) प्रमाया लक्षणं विलिख्य लक्षणसमन्वयः कर्तव्यः।

## खण्डः (घ)

**४. सर्वे प्रश्नाः समाधेयाः।** **१×१०=१०**

(क) अनुमानवाक्यस्य कति अवयवाः ?

(ख) कतिनिमित्तात्मकं नामधेयं भवति ?

(ग) कतिविधोऽयमर्थवादः ?

(घ) कतिविधा भावना ?

(ङ) मीमांसाशास्त्रप्रतिपाद्यविषयः कः ?

(च) मीमांसाशास्त्रसम्मतं प्रामाण्यं कीदृशमस्ति ?

(छ) सन्निकर्षः कतिविधः ?

(ज) कति हेत्वाभासाः ?

(झ) अर्थापत्तिः कतिविधा ?

(ञ) धर्मप्रतिपादकं प्रमाणं किम् ?

–०–

# पूर्वमीमांसा

**पाठ्यांशनाम**- मीमांसादर्शनसम्मतप्रमेयाणि
**पाठ्यांशसङ्केतः**-पू.मी. ४०२

**स्तरः- शास्त्री**
**पूर्णाङ्काः**- १००

**वर्षम्- द्वितीयम्**
**वार्षिकपाठ्यभारः**- १६०घण्टाः

**पत्रम्** - चतुर्थम्
**साप्ताहिकःपाठ्यभारः**- ६

### १. पाठ्यांशपरिचयः-

शास्त्रिकक्षाया द्वितीयवर्षे पूर्वमीमांसाविषयमध्येतुं प्रविष्टानां छात्राणां कृतेऽयं पाठ्यक्रमो निर्धारितोऽस्ति । प्रथमवर्षे मीमांसासम्मतप्रमाणानां परिचयस्य प्रदायाकाः पाठ्यांशा निर्धारिता आसन् । अधुना द्वितीयवर्षे चतुर्थपत्रेऽस्मिन्मुख्यतया मीमांसासम्मतप्रमेयविषयकाः पाठ्यांशाःसन्निविष्टाःसन्ति ।

पत्रेऽस्मिन्मुख्यतया भाट्टमीमांसकसम्मतानां प्रमेयाणां परिचयस्य प्रदायकाः पाठ्यांशाःसन्निविष्टाःसन्ति । तत्र प्राभाकरमतस्य समीक्षणमपि विहितमस्ति । श्रौताग्निहोत्रप्रयोगसम्बद्धाः पाठ्यांशा गृह्यपदार्थसम्बाद्धाः पाठ्यांशाश्चात्र समाविष्टाः सन्ति । द्रव्यजातिगुणकर्मणामभावस्य, श्रौताग्निहोत्रप्रयोगस्य, गृह्यपदार्थानां च प्रतिपादका एते पाठ्यांशाः पञ्चसु प्रकरणेषु विभक्ता वर्तन्ते । एतस्य कृते गद्यपद्यशैल्या सरलया भाषया रचितो मानमेयोदयः पाठ्यग्रन्थत्वेन गृहीतो वर्तते । श्रौताग्निहोत्रशिक्षणाय कात्यायनश्रौतसूत्रं परिगृहीतं वर्तते । तथैव गृह्यसूत्रोक्तानां विविधानां विषयाणां परिचयस्य प्रदायकाः पाठ्यांशाश्चास्मिन् पत्रे पञ्चमप्रकरणे सन्निविष्टाः सन्ति । तदर्थं वेदभाषानिघण्टोर्ब्रह्मवर्गः परिगृहीतोऽस्ति । अत्रसन्निविष्टेषुपाठ्यांशेषुकप्रकरणे भाट्टसम्मतानां पदार्थानां परिचयः, द्रव्यस्वरूपम्, पृथिव्यादि-द्रव्यभेदाश्चेत्यादयो विषयानिर्धारिताःसन्ति ।खप्रकरणेजातेः गुणानां कर्मणोऽभावस्य च सरलरूपेणपरिचयप्रदायकाः पाठ्यांशा निर्धारिताः प्रभाकरसम्मतपदार्थविषये-ऽन्यदर्शनसम्मतपदार्थविषये च भाट्टमीमांसकानां दृष्टिः कीदृशीति विषयश्च निर्धारितः । गप्रकरणे श्रौताग्निहोत्रप्रयोगविषयकाः पाठ्यांशा निर्धारिताः । घप्रकरणे शास्त्रदीपिकायास्तर्कपादे प्रतिपादिताश्चित्रादिविधिविचार-शब्दनित्यत्वादयो विषयाः पाठ्यत्वेन निर्धारिताः सन्ति । ङप्रकरणे गृह्यसूत्रसम्बद्धपदपदार्थशिक्षणाय गोत्र-प्रवरादिसम्बद्धा गृह्यकर्म-सम्बद्धाश्च शब्दा निर्धारिताः सन्ति ।

अस्य पाठ्यांशस्याध्ययनेन छात्रा निर्धारितोद्देश्यानुरूपं मीमांसादर्शनसम्मतप्रमेयाणामवबोधे गृह्यसूत्रोक्तकर्मसम्बद्ध-शब्दार्थज्ञाने च क्षमा भविष्यन्ति ।

## २. पाठ्यांशसामान्योद्देश्यम्

**अस्यपाठ्यांशस्याध्ययनेनछात्राअधोलिखितविषयेप्रावीण्यमेष्यन्ति–**

- मीमांसासम्मतद्रव्याणां परिचयप्रदाने
- परमतनिराकरणपूर्वकं जातिस्थापने
- भाट्टसम्मतगुणानां परिचयप्रदाने प्राकट्यादिगुणानां साधने च
- कर्मणः परिभाषायाः प्रस्तवने कर्मणः प्रत्यक्षत्वसाधने च
- अभावस्य पदार्थान्तरत्वस्थापने
- गुरुसम्मतपदार्थसमीक्षणे
- दर्शनान्तरप्रतिपादितपदार्थनिराकरणे
- शब्दनित्यत्ववेदापौरुषेयत्वादिसाधने
- अग्निहोत्रस्य प्रयोगात्मकरूपेण निरूपणे
- गृह्यसूत्रोक्तानां निर्धारितपदार्थानां परिचयस्य प्रदाने च ।

## ३. पाठ्यांशस्यविशिष्टोद्देश्यम्, पाठ्यविषयसंयोजनञ्च

| **प्रकरणानि** | **प्रकरणगतविशिष्टोद्देश्यानि** | **पाठ्विषयाः** | **अङ्काः** | **पाठघण्टाः** |
|---|---|---|---|---|
| क | भाट्टसम्मतद्रव्यपरिचयः | मानमेयोदयस्य द्रव्यनिरूपणप्रकरणे प्रतिपादिता विषयाः । | २० | ३२ |
| ख | जाति-गुणकर्माभावनिरूपणं प्राभाकरादि-सम्मतपदार्थसमीक्षणं च | मानमेयोदयस्य जातिगुण-कर्माभावनिरूपणप्रकरण-प्रतिपादिता विषयाः । | ३० | ४८ |
| **ग** | चित्रादिविधिविचारः शब्दनित्यत्वादिकं च | शास्त्रदीपिकायास्तर्कपादस्य निर्धारिता विषयाः । | २० | ३२ |
| घ | श्रौताग्निहोत्रनिरूपणम् | कात्यायनश्रौतसूत्रस्य चतुर्थाध्याये निर्धारिता विषयाः । | १० | १६ |
| ङ | गृह्यकर्मादिसम्बद्धपदार्थज्ञानम | निर्धारितानां गृह्यपदार्थानामर्थाः । | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

### 'क'प्रकरणे

द्रव्यस्वरूपम्, तार्किकोक्तद्रव्यलक्षणनिरासः, द्रव्यभेदाः, पृथिवीस्वरूपम्, शरीरभेदाः, जलनिरूपणम्, तेजोनिरूपणम्, वायुनिरूपणम्, वायोरनुमेयत्वनिरासः, तमोनिरूपणम्, तार्किकोक्तस्य तमसोऽभावरूपत्वस्य निरासः, तमोविषयकप्राभाकरमतसमीक्षणम्, परमाणुस्वरूपनिरूपणम्, पृथिव्यादेरीश्वरकर्तृकत्वस्य निरासः, वैदिकेश्वरस्य भाट्टसम्मतत्वम्, वेदापौरुषेयत्वस्थापनम्, प्रामाण्याप्रामाण्ययोः स्वतस्त्वपरतस्त्वविचारः, आकाश-काल-दिङ्निरूपणम्, आकाशादीनां प्रत्यक्षत्वम्, आत्मलक्षणम्, आत्मनः प्रत्यक्षत्वम्, आत्मनोऽनुमेयत्वस्य खण्डनम्, आत्मविषयकशाङ्करमतसमीक्षणम्, स्वर्गापवर्गनिरूपणम्, मोक्षस्वरूपनिरूपणम्, मोक्षविषयक-सौगत-साङ्ख्यमतखण्डनम्, मोक्षविषयक-प्राभाकरमत-शाङ्करमतसमीक्षणम्, मनसो विभुत्वम्, शब्दनिरूपणम्, शब्दस्य विभुत्वम्, शब्दस्य नित्यत्वम्, जातेः पदाभिधेयत्वञ्च ।

### 'ख'प्रकरणे

जातिनिरूपणम्, बौद्धोक्तजातिखण्डनखण्डनम्, जातिजातिमतोर्भेदाभेदः, तार्किकोक्तस्य सामान्यवृत्तित्वस्य सामान्ये निरासः, गुणनिरूपणम्, रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्वनिरूपणम्, कार्यद्रव्येष्वपि पृथक्त्वस्य सद्भावः, संयोगनिरूपणम्, संयोगस्य त्रैविध्यम्, विभाग-परत्वापरत्व-गुरुत्व-द्रवत्व-स्नेहनिरूपणम्, बुद्धिनिरूपणम्, बुद्धेः स्वयंप्रकाशतायाः समीक्षणम्, मानसप्रत्यक्षं विज्ञानमिति मतस्य निराकरणम्, सुख-दुःखेच्छा-द्वेष-प्रयत्न-संस्कारनिरूपणम्, संस्कारभेदाः, ध्वनिः, प्राकट्यस्थापनम्, शक्तिः, शक्तिरेव नास्तीति तार्किकमतस्य खण्डनम्, शक्तेः पदार्थान्तरत्वमिति मतस्य समीक्षणम्, ध्वनिप्राकट्यशक्तिविषयकतार्किकमतस्य खण्डनम्, धर्मस्वरूपम्, कार्य एव शक्तिरिति प्रभाकरमतसमीक्षणम्, भावनास्वरूपविचारः, कर्मस्वरूपम्, कर्मभेदाः, कर्मविषयकभट्टविष्णुमतस्य निराकरणम्, कर्मणोऽप्रत्यक्षत्वमिति मतस्य खण्डनञ्च । गुरुसम्मता अष्टौ पदार्थाः, वैशेषिकसम्मताः पदार्थाः, नैयायिकसम्मताः पदार्थाः, गुरुसम्मतानां पदार्थानां विवेचनम्, वैशेषिकसम्मतानां पदार्थानां विवेचनम्, नैयायिकसम्मतानां पदार्थानां विवेचनम्, विशेषसमवाययोः खण्डनम्, अभावस्याधिकरणरूपत्वस्य खण्डनम्, भवनाथमतखण्डनम्, अभावभेदाः, अभावस्य भावान्तरत्वखण्डनम्, शून्यवादखण्डनम्, विज्ञानवादखण्डनम्, सौत्रान्तिकमतखण्डनम्, वैभाषिकमतखण्डनम्, अद्वैतिमतसमीक्षणम्, द्रव्यजातिगुणकर्माभावानां सत्यत्वस्य साधनम् ।

**'ग'प्रकरणे**

चित्राद्यैहिकफलचोदनास्वाक्षेपस्तत्परिहारश्च, वर्णानामर्थप्रत्यायकत्वम्, स्फोटवादसमीक्षणम्, जातिस्थापनम्, जातिव्यक्त्योर्भेदाभेदः, जातेः सर्वगतत्वम्, संयोगविचारः, अवयविविचारः, सृष्टिप्रलयविषयकवैशेषिकमतनिराकरणम्, आत्मवादारम्भः, देहभिन्नात्मसाधनम्, बौद्धसम्मत-विज्ञानात्मवादखण्डनम्, आत्मनो मानसाहंप्रत्ययगम्यत्वम्, इन्द्रियात्मनोर्भेदः, आत्मनो व्यापकत्वम्, मोक्षवादः, मुक्तिस्वरूपम्, आत्मज्ञानस्य क्रतुमोक्षोभयोपयोगित्वम्, आत्मनो नित्यत्वम्, शब्दस्य नित्यत्वम्, शब्दस्यानेकदेशोपलम्भकारणम्, शब्दस्य प्रत्यक्षत्वे बौद्धमतखण्डनम्, शब्दानित्यत्वपूर्वपक्षस्तन्निराकरणं च, वर्णानामनवयवत्वं नित्यत्वं च, क्षणभङ्गवादखण्डनम्, शब्दत्वस्य सामान्यत्वम्, वेदस्य प्रत्यायकत्वम्, वाक्यस्य वाक्यार्थबोधकत्वम्, अन्विताभिधानवादसमीक्षणम्, वाक्यार्थस्य लक्ष्यत्वम्, पदार्थानां वाक्यार्थबाधकत्वशङ्कानिरासः, अखण्डवाक्यार्थसमीक्षणम्, वेदापौरुषेयत्वसाधनञ्च ।

**'घ'प्रकरणे**

श्रौताग्निहोत्रकालनिरूपणम्, अग्निहोत्रपात्राणां सचित्रपरिचयः (अग्निहोत्रस्थाली, स्रुवः, अग्निहोत्रहवणी, कूर्चः), अग्निहोत्रहवींषि,सायङ्कालादग्निहोत्रारम्भः, सायमादिप्रातरपवर्गं कर्म, अग्न्युद्धरणम्, अग्निपरिस्तरणम्, पर्युक्षणम्, गोदोहनम्, पयःश्रपणम्, उद्वासनम्,स्रुक्स्रुवप्रतपनमार्जने, पयउन्नयनम्, आहवनीयाग्नौ समिदाधानम्, पयोहोमः, स्रुक्पयःप्राशनम्, निर्लेहनम्, उत्सेचनम्, निषेचनम्, स्रुक्स्रुवप्रतपनम्, समिदाधानम्, पर्युक्षणम्, सायङ्कालिकाग्निहोत्रमन्त्रः, प्रातःकालिकाग्निहोत्रमन्त्रः, प्रातःकालिकाग्निहोत्रस्य वैशिष्ट्यञ्च ।

**'ङ'प्रकरणे**

गोत्रम्, प्रवरः, ऋषिः, भृग्वादिगणाः, गणान्तर्गतानि गोत्राणि,सप्तर्षयः, ऋषयः, ब्राह्मणनामानि, त्रिशुक्लः, ऋग्वेदिनामानि, यजुर्वेदिनामानि, सामवेदिनामानि, अथर्ववेदिनामानि, शाखारण्डः, वेदान्तिनामानि, काल्पसूत्रः, मीमांसकः, वैयाकरणः, नैरुक्तः, ज्यौतिषिकः, धर्मसूत्री, ऐतिह्यम्, शिष्टाः, गुरुः, आचार्यः, कुलपतिः, दारकाचार्यः, उपनयनम्, कल्पः, प्रथमकल्पः, अनुकल्पः, यज्ञियमण्डपः, पञ्चभूसंस्काराः, परिसमूहनम्, उपलेपनम्, उल्लेखनम्, उद्धरणम्, अभ्युक्षणम्, अग्नेरुपसमाधानम्, ब्रह्मा, प्रणीताप्रणयनम्, परिस्तरणम्, पवित्रे, प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, सम्मार्गकुशाः, उपयमनकुशाः, समित्, स्रुवः, पूर्णपात्रः, प्रोक्षणम्, पर्युक्षणम्, निर्वपणम्, अधिश्रयणम्, पर्यग्निकरणम्, उत्तारणम्, उच्छालनम्, कुशतरुणम्, गोदानम्, समुन्दनम्, क्षौरम्, उदकाभ्यवायः, वाचनम्, वासोदानम्,

यज्ञोपवीतम्, उपवीतम्, प्राचीनावीतम्, निवीतम्, सव्यम्, अपसव्यम्, प्रदक्षिणम्, अजिनम्, कृष्णाजिनम्, मेखला, दण्डः, पालाशो दण्डः, वैणवो दण्डः, कमण्डलुः, अवक्षारणम्, परिदानम्, संशासनम्, अग्निकर्म, अभिवादनम्, प्रत्यभीवादः, उपसङ्गहणम्, साष्टाङ्गप्रणामः, पञ्चाङ्गप्रणामः, नमस्कारः, शौचाचारः, उपस्पर्शः, दैवार्षकायपित्र्यब्राह्मतीर्थानि, स्नानम्, अघमर्षणम्, प्राणायामः, पवित्रजपयज्ञः, वेदव्रतम्, भिक्षाचर्यम्, अभ्युत्थानम्, प्रत्यवरोहणम्, केशान्तः, समावर्तनम्, अनुलेपनम्, उष्णीषम्, कुण्डलम्, आदर्शः, छत्रम्, उपानत्, स्नातकः, अनूचानः, ब्रह्मचर्याश्रमः, विवाहः, विवाहयात्रा, विवाहाऽऽवाहौ, मङ्गलस्नानम्, मधुपर्कः, पद्यम्, अर्घः, निनयनम्, वधूसन्नहनम्, कन्यादानम्, पाणिग्रहः, सप्तपदी, जनित्रयात्रा, चतुर्थीकर्म, विवाहितः, परिवेत्ता, परिवेदिनी, परिदायी, गृहमेधः, शालाकर्म, मणिकावधानम्, स्मार्ताधानम्, गृह्याग्निनामानि, हविः, प्रातराह्णिकम्, माध्याह्निकम्, पञ्चमहायज्ञाः, ब्रह्मयज्ञः, तर्पणम्, देवपूजा, देवयज्ञः, भूतयज्ञः, पितृयज्ञः, मनुष्ययज्ञः, अतिथिः, आतिथेयः, आतिथ्यम्, अर्घ्यम्, पाद्यम्, वेदारम्भः, अध्ययनम्, ब्रह्मवर्चसम्, घोषणम्, ब्रह्माञ्जलिः, ब्रह्मबिन्दवः, सब्रह्मचारिणः, धर्मभ्राता, शिष्यः, ऐकान्यिकः, अनध्यायाः, उत्सर्जनम्, दण्डमाणवः, श्रावणी, पृषदाज्यम्, अष्टका, अन्वष्टका, ईशानबलिः, पाकयज्ञाः, पाकयज्ञभेदाः, लाङ्गलयोजनम्, इन्द्रयज्ञः, रजस्वलाव्रतम्, गर्भाधानम्, पुंसवनम्, कूर्मपित्तम्, सीमन्तकर्म, जातकर्म, नामकर्म, अन्नप्राशनम्, चूडाकरणम्, केशपाशी च ।

## ५. शिक्षणविधयःशैक्षिकसामग्रीच

अस्मिन् पत्रे निर्धारितानां पाठ्यांशानां शिक्षणे निगमनागमन-प्रश्नोत्तर-प्रवचन-विमर्श-प्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधयःप्रयोक्तव्याः । शिक्षकैस्तदन्येऽन्वेषणपरियोजनादयःप्राक्कल्पनादयश्चविद्यार्थिकेन्द्रिता विधयोऽप्यत्रप्रयोक्तुंशक्यन्ते । यथासम्भवंशिक्षकैःकेवलंमार्गनिर्दिश्यस्वप्रयत्नेनज्ञानार्जनं कर्तुंछात्राःप्रेरणीयाः। विषयप्रसङ्गानुसारेणसमुचितानांविविधानांश्रव्यदृश्यशैक्षिकसामग्रीणांप्रयोगोविधेयः । तद्व्यवस्थासम्बद्धशिक्षकेण, विभागेन, विद्यापीठेनवाविधेया । साम्प्रतंदूरशिक्षणमपिप्रचलितंविद्यते । तदर्थंसङ्गणक-यन्त्राणिप्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापितत्रापेक्ष्यते । तदर्थंविश्वविद्यालयेनविद्यापीठेनवाग्रेसरतावलम्बनीया।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति आन्तरिकम् (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) चेति । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठने सक्रियता, उपस्थितिः इत्यादिकं

विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरिक-मूल्याङ्कनं विधीयते । गृहकार्यम्, परियोजनाकार्यम्, कक्षापरीक्षा, इत्यादीनि अन्यानि साधनान्यपि विद्यार्थिनामान्तरिक-मूल्याङ्कनस्याधारत्वेन गृह्यन्ते । आन्तरिकमूल्याङ्कनस्य कृते प्रतिशतं विंशतिरङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्य-परीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः परीक्षाफल-प्रकाशनात्पूर्वं नियमितच्छात्राणां कृते सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपाल-संस्कृत-विश्वविद्यालय-परीक्षानियन्त्रणकार्यालयेनाऽनुपात-पद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा साक्षात्कारादिनापि सिद्ध्यति ।

वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसरणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क | विवेचनात्मकाः | ३ | २ | २×१२=२४ |
| ख | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६×७=४२ |
| ग | व्याख्यात्मकाः | ४ | ३ | ३×८=२४ |
| घ | वस्तुगताः | १० | १० | १० ×१=१० |
| ङ | योगः | २६ | २१ | १०० |

## ७.पाठ्यसामग्रीसूची

### क) पाठ्यग्रन्थाः

१. मानमेयोदयः, प्रमेयखण्डः, नारायणपण्डितकृतः, द्वितीयं संस्करणम्, वाराणसी : चौखम्बाविद्याभवनम्, सन् २०१३ ।

२. शास्त्रदीपिका, तर्कपादः, पार्थसारथिमिश्रः, व्याख्याकारः- रामकृष्णः, वाराणसी : कृष्णदास अकादमी, सन् १९८८ ।

३. कात्यायनश्रौतसूत्रम्,चतुर्थोऽध्यायः, १३-१५ कण्डिकाः, व्याख्याकारः- विद्याधरशर्मा,दिल्ली :चौखम्बा-संस्कृत-प्रतिष्ठानम्, सन् १९९० ।

४.वेदभाषानिघण्टुः,ब्रह्मवर्गः, १-२२० श्लोकाः, शिवराज आचार्यः कौण्डिन्न्यायनः, काठमाण्डु : स्वाद्ध्यायशाला, २०५० ।

**ख) सहायकग्रन्थाः**

१. दर्शनामृत, बुद्धिसागर पराजुली, काठमाडौं, २०२५ ।

२.वैदिक धर्म मूल रूपमा, शिवराज आचार्य कौण्डिन्न्यायन, काठमाण्डु : स्वाद्ध्यायशाला, द्वितीय संस्करण, २०६२ ।

३. मीमांसापदार्थविज्ञानम्, काशीनाथन्यौपाने, वाराणसी : दिलीपकुमार पब्लिसर्स, २०५० ।

४.कात्यायनश्रौतसूत्रम्,देवयाज्ञिकपद्धतिसहितम्, वाराणसी :चौखम्बा संस्कृत सीरीज आफिस, सन् १९३३ ।

५. वैजयन्तीकोषः,ब्राह्मणाध्यायः, यादवप्रकाशाचार्यः, वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, सन् १९७१ ।

**ग) सन्दर्भग्रन्थाः**

१. षड्दर्शनीसङ्ग्रहः, जाषराजः, सम्पादकः- दीर्घराजघिमिरे, दाङ : नेपाल-(महेन्द्र)संस्कृत-विश्वविद्यालयः,२०४९ ।

२.मीमांसादर्शनविमर्शः, माधव जनार्दन रराटे, वाराणसी : भारतीयविद्याप्रकाशनम्, सन् २००८ ।

३. पूर्वमीमांसादर्शन, जुननाथशर्मा, दर्शनप्रवेशिका, काठमाडौं : प्रकाशनविभाग, नेपाल दार्शनिक सङ्घ, २०१३ ।

४.मीमांसादर्शनमा कर्मको र मोक्षको विचार, प्रमोदवर्धनः कौण्डिन्न्यायनः, मिर्मिरे-३२३, वर्ष ४२ अङ्क ४,दर्शन विशेषाङ्क, काठमाडौं : नेपाल राष्ट्र बैंक, २०७० ।

५.कात्यायनश्रौतसूत्रम्,कर्कभाष्यसहितम्, नूतनदिल्ली : लालबहादुरशास्त्रिकेन्द्रियसंस्कृतविद्यापीठम्, सन् १९८२-१९८३ ।

६. गृह्यानुष्ठानों का सांस्कृतिक अन्वेषण, रीना आस्थाना, दिल्ली : नाग पब्लिसर्स, सन् २००४ ।

## विशिष्टीकरणतालिका

### विषयः — पूर्वमीमांसा

पाठ्यांशनाम— **मीमांसादर्शनसम्मतप्रमेयाणि** पाठ्यांशसङ्केतः— पू.मी. ४०२

स्तरः— शास्त्री पूर्णाङ्काः— १००

खण्डः— द्वितीयः उत्तीर्णाङ्काः— ३५

पत्रम्—चतुर्थम् समयः— घण्टात्रयम्

| **प्रकरणानि** | **परीक्षणीय-विषयक्षेत्रम्** | **प्रश्नप्रकृतिः** | **प्रष्टव्याःप्रश्नाः** | **समाधेयाःप्रश्नाः** | **अङ्काः** | **पूर्णाङ्काः** |
|---|---|---|---|---|---|---|
| क | भाट्टसम्मतद्रव्यपरिचयः | विवेचनात्मकः | १ | १ | **१२**×१=१२ | **२०** |
| | | सङ्क्षिप्तोत्तरापेक्षी | २ | १ | **७**×१=७ | |
| | | वस्तुगतः | १ | १ | **१**×१=१ | |
| ख | जाति-गुण-कर्मा-ऽभावनिरूपणं प्राभाकरादि-सम्मतपदार्थनिरूपणं च | सङ्क्षिप्तोत्तरापेक्षी | ४ | ३ | **७**×३=२१ | **३०** |
| | | व्याख्यात्मकः | २ | १ | **८**×१=८ | |
| | | वस्तुगतः | १ | १ | **१**×१=१ | |
| ग | चित्रादिविधिविचारः | विवेचनात्मकः | २ | १ | **१२**×१=१ | **२०** |

| | | | | | | |
|---|---|---|---|---|---|---|
| | शब्दनित्यत्वादिकञ्च | | | | २ | |
| | | सङ्क्षिप्तोत्तरापेक्षी | १ | १ | ७×१ =७ | |
| | | वस्तुगतः | १ | १ | १×१ =१ | |
| घ | श्रौताग्निहोत्रनिरूपणम् | व्याख्यात्मकः | १ | १ | ८×१ =८ | १० |
| | | वस्तुगतः | २ | २ | १×२ =२ | |
| ङ | गृह्यकर्मादिसम्बद्ध-पदार्थज्ञानम् | सङ्क्षिप्तोत्त-रापेक्षी | २ | १ | ७×१ =७ | २० |
| | | व्याख्यात्मकः | १ | १ | ८×१ =८ | |
| | | वस्तुगतः | ५ | ५ | १×५ =५ | |
| सङ्कलने | | | २६ | २१ | | १०० |

# शाङ्करवेदान्तः

पाठ्यांशनाम— **गीतातत्त्वबोधः, तत्त्वविवेकश्च**

पाठ्यांशसङ्केतः— शा.वे. ४०१

स्तरः— शास्त्री

पूर्णाङ्काः— १००

खण्डः— द्वितीयः

वार्षिकः पाठ्यभारः— १६० घण्टाः

पत्रम्— तृतीयम्

साप्ताहिकः पाठ्यभारः— ६

**१. पाठ्यांशपरिचयः**

शाङ्कर-वेदान्तविषयमवलम्ब्य शास्त्रिकक्षायां प्रविश्य प्रथमवर्षस्याध्ययनं समाप्य द्वितीयवर्षे पिपठिषूणां छात्राणां कृते निर्धारितोऽयं पाठ्यांशः । षट्सु प्रकरणेषु विभक्तेऽस्मिन् पाठ्यक्रमे श्रीमद्भगवद्गीतायाः, पञ्चदश्यास्तत्त्वविवेकप्रकरणस्य च विषयाः निर्धारिताः सन्ति ।

तत्र प्रतिप्रकरणं विषयसंयोजनं चानया रीत्या विहितं वर्तते— **क**-प्रकरणे कर्मणां ज्ञानोन्मुखतायाः प्रतिपादका विषया निर्धारिताः सन्ति । **ख**-प्रकरणे भगवत्तत्त्वनिरूपका विषया निर्धारिताः सन्ति, **ग**-प्रकरणे च भगवतो विभूतिनिरूपणपरका विषयाः सन्त्युपस्थापिताः । **घ**-प्रकरणे ज्ञाननिरूपणात्मका विषयाः पाठ्यत्वेनोप-स्थापिताः सन्ति । **ङ**-प्रकरणे क्षेत्रक्षेत्रज्ञयाथात्म्यस्य निःश्रेयसहेतोश्च निरूपणात्मका विषया अध्ययनीयतया निर्धारिता वर्तन्ते । **च**-प्रकरणे तु सृष्ट्यादिप्रतिपादनद्वारा स्थूल-सूक्ष्म-कारणशरीराणां प्रतिपादनम्, पञ्चकोष-प्रतिपादनमाध्यमेन जीवस्य ब्रह्मत्वनिर्धारणम्, तत्त्वमस्यादिवाक्यविवेचनम्, आत्मज्ञानोपायत्वेन श्रवण-मनन-निदिध्यासनानां प्रदर्शनमित्यादयो विषयाः पाठ्यविषयत्वेन निर्दिष्टाः सन्ति

एवमस्मिन् पाठ्यक्रमे सम्पूर्णा गीता, गीताया निष्कर्षादिप्रतिपादनपरकः शाङ्करभाष्यांशः, पञ्चदश्यास्तत्त्वविवेकप्रकरणं च पाठ्यत्वेन निर्धारितमस्तीत्ययं पाठ्यांशो गीताज्ञाने वेदान्ततत्त्वावबोधे चोपकारको भविष्यति पाठ्यक्रमेऽस्मिन् सामान्योद्देश्यनिर्धारणं विशिष्टोद्देश्यनिदर्शनं शिक्षणविधेर्मूल्याङ्कनप्रकाराणाञ्चोल्लेखो विहित इत्ययं पाठ्यक्रमः सर्वाङ्गपूर्ण इति कथयितुं शक्यते ।

## २. पाठ्यांशसामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितेषु विषयेषु प्रवीणा भविष्यन्ति—

- शोकमोहयोः संसारबीजत्वप्रदर्शने,
- कर्मणो ज्ञानोत्पादकत्वेन मोक्षसाधनत्वसाधने,
- कर्मयोग-साङ्ख्ययोगयोः स्वरूपफलनिर्धारणे,
- मोक्षसाधनं ज्ञानमेवेति सिद्धान्तस्थापने,
- वेदान्तसम्मत-तत्त्वविवेचने च

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | शोकमोहयोः संसारबीजत्वप्रतिपादनम्, साङ्ख्यबुद्धि-योगबुद्ध्योः परिचयप्रदानम्, आत्मनो नित्यत्वप्रदर्शनम्, साङ्ख्य-योगयोः फलैकत्वसाधनम्, ज्ञानाधिकारिनिरूपणञ्च | भगवद्गीतायाः प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठाध्यायाः | २० | ३२ |
| ख | परापरप्रकृत्यादिनिरूपणम् | भगवद्गीतायाः सप्तमा-ऽष्टम-नवमाध्यायाः | १५ | २४ |
| ग | भगवद्विभूतिनिरूपणम्, तत्क्रमे ब्रह्मणः सर्वत्रानुस्यूतत्वप्रतिपादनम्, भगवद्विभूतीनामानन्त्यादिप्रदर्शनञ्च | भगवद्गीतायाः दशमैकादश-द्वादशाध्यायाः | १० | १६ |
| घ | क्षेत्रक्षेत्रज्ञयोः परिचयप्रस्तुतिः, ज्ञानसाधनानां प्रतिपादनम्, त्यागसन्न्यासयोर्भेदविचारादि च | भगवद्गीतायाः त्रयोदश-चतुर्दश-पञ्चदश-षोडश-सप्तदशा-ऽष्टादशाध्यायाः | २० | ३२ |
| ङ | प्रवृत्ति-निवृत्तिभेदेन धर्मद्वैविध्यप्रतिपादनम्, भगवदवतरणप्रयोजनादिप्रदर्शनम्, सर्वक्षेत्रेष्वेकस्यैवेश्वरस्यास्तित्वे | भगवद्गीतायाः शाङ्करभाष्यस्य निर्धारितोऽंशः | १५ | २४ |

| | | | | |
|---|---|---|---|---|
| | दोषोद्भावनं तत्समाधानप्रस्तुतिश्च, ज्ञानकर्मसमुच्चय-शङ्कोत्थापनम्, तन्निराकरणञ्च | | | |
| च | संविद आत्मत्वसाधनम्, वेदान्तसम्मतसृष्टिप्रक्रियाप्रदर्शनम्, पञ्चकोशप्रतिपादनम्, पञ्चकोशविविक्तस्यात्मनो ब्रह्मत्वसाधनम्, तत्त्वमसीतिवाक्यस्यार्थविवेचनम्, श्रवणमननादिस्वरूपप्रतिपादनञ्च | पञ्चदश्यास्तत्त्वविवेक-प्रकरणम् | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

### 'क'प्रकरणे

गीतोपदेशस्य पृष्ठभूमिः, अर्जुनस्य युद्धक्षेत्रे शोकप्रदर्शनम्, अर्जुनस्योद्बोधनम्, शोकमोहयोः संसारबीजत्वम्, आत्मनो नित्यत्वम्, साङ्ख्यबुद्धिर्योगबुद्धिश्च, स्थितप्रज्ञलक्षणम्, अनासक्तभावेन कृतेन कर्मणा सत्त्वशुद्धिद्वारा निःश्रेयसप्राप्तिः, लोकसङ्ग्रहार्थं कर्मणोऽवश्यकर्तव्यत्वम्, विविधप्रकारका यज्ञास्तेषु मध्ये ज्ञानयज्ञस्य श्रेष्ठत्वं च, साङ्ख्य-योगयोः फलैकत्वम्, कर्मफलत्यागस्य माहात्म्यम्, कर्मयोग-कर्मसंन्यासयोः परस्परविरोधपरिहारः, योगसाधनानि, योगप्राप्त्युपायाः, योगयुक्तस्य लक्षणानि, योगभ्रष्टस्य गतिप्रदर्शनं च

### 'ख'प्रकरणे

परापरप्रकृती, सर्वस्य जगत आत्मविवर्तभूतत्वम्, मायातिक्रमणोपायः, गत्यागतिविवेकः, राजविद्याप्रतिपादनक्रमे भगवता सर्वं व्याप्तमिति भगवता सर्वं सृष्टमिति काम्यकर्मिणां पुनरावृत्तिरिति, भगवदुपासकानां मुक्तिरिति चोक्तिः

### 'ग'प्रकरणे

भगवन्महिमप्रतिपादनम्, भगवद्विभूतिवर्णनम्, भगवतः सगुणरूपस्य प्रदर्शनम्, निरुपाधिकस्येश्वरस्य सोपाधिकस्येश्वरस्य चोपासकेषु मध्ये कतरो विशिष्ट इति प्रश्नः, निरुपाधिकोपासकानामुत्कृष्टत्वेऽपि तेषां क्लेशाधिकत्वोक्तिः

**'घ'प्रकरणे**

क्षेत्र-क्षेत्रज्ञयोः परिचयः, ज्ञानाज्ञानयोः परिचयः, आत्मज्ञानिनो मुक्तिः, सत्त्व-रजस्तमोगुणाः तेषां कार्याणि च, त्रिगुणातीतस्यामृतत्वप्राप्तिः, गुणातीतलक्षणम्; संसारवृक्षवर्णनम्, क्षराक्षरोत्तमपुरुषाः, दैवाऽऽसुरभेदेन सम्पद्द्वयं तद्वतः फलं च, शास्त्रविध्यनुसरणस्याऽऽवश्यकता; शास्त्रविधिं विनाऽनुष्ठितस्य कर्मणस्त्रैविध्यम्, सत्त्व-रजस्तमोभेदेनाऽऽहार-यज्ञ-तपसां त्रैविध्यम्; त्याग-सन्न्यासयोर्भेदविचारः, कर्मभेद-कर्तृभेदादिविचारः, ब्राह्मणादिवर्णभेदेन कर्मभेदविचारः, स्वस्वकर्मानुष्ठानेन सिद्धिप्राप्तिः, ज्ञानमाहात्म्यं तत्फलञ्च

**'ङ'प्रकरणे**

सर्वक्षेत्रेष्वेक एव ईश्वरोऽस्ति चेत् तस्य संसारित्वमिति शङ्का तत्समाधानं च, बन्धमोक्षयोः पौर्वापर्यविचारः, क्षेत्रक्षेत्रज्ञयाथात्म्यविदो मुक्तिः; गीताशास्त्रे निःश्रेयससाधनं किं निश्चितमिति प्रश्नः तदुत्तरं च, ज्ञानकर्मसमुच्चयविचारः, केवलस्यैव ज्ञानस्य निःश्रेयसहेतुत्वप्रतिपादनञ्च

**'च'प्रकरणे**

संवित्स्वरूपम्, संविद आत्मत्वम्, आत्मनो निरतिशयसुखस्वरूपत्वम्, जीवेश्वरयोः स्वरूपम्,सृष्टिक्रमः, लिङ्गशरीरस्वरूपम्, पञ्चीकरणप्रकारः, पञ्चकोशविवेकः, तत्त्वमसिवाक्यविचारः, श्रवण-मनन-निदिध्यासन-स्वरूपम्, समाधिस्वरूपं तत्फलं च, परोक्षापरोक्षब्रह्मज्ञानफलञ्च

**५. शिक्षणविधिः**

निगमनागमनविमर्शव्याख्यानप्रश्नोत्तराद्याः पद्धतयो विषयानुसारेणावलम्बनीयाः । शिक्षणक्रमे छात्रा एव विशेषतो व्यापृताः करणीयाः । सति सम्भवे छात्रा अन्वेषणेऽपि प्रेरणीयाः । यथासम्भवं श्रव्यदृश्यसामग्रीणामपि प्रयोगो विधेयः । आवश्यकत्वे सति शिक्षकेण दूरशिक्षणानुकूलतया पाठयोजना विधेया, प्रविध्युपयोगश्च कर्तव्यः ।

**६. मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तमस्ति— आन्तरिकम् (निर्माणात्मकम्), बाह्यम् (निर्णयात्मकम्) चेति । आन्तरिकमूल्याङ्कनं मुख्यरूपेण कक्षागतमेव भवति । छात्रोपस्थितिम्, कक्षाकार्यम्, गृहकार्यम्, कक्षापरीक्षा चेत्याद्याधारेण विभागसमन्वयेनाऽऽन्तरिकं मूल्याङ्कनं विधीयते । । विंशतिप्रतिशदङ्का आन्तरिकमूल्याङ्कनस्य कृते निर्धारिताः । बाह्यपरीक्षा शतपूर्णाङ्कात्मिकैव

भवति । परीक्षाफलप्रकाशने आन्तरिकमूल्याङ्कनस्याङ्कानां समायोजनं भवति । बाह्यपरीक्षार्थं प्रश्नपत्रनिर्माणमधोनिर्दिष्टप्रकारेण भवति—

### वार्षिक–परीक्षा–प्रश्नपत्रनिर्माणयोजना

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, घ, ङ, च | विवेचनात्मकाः | ३ | २ | २४ |
| क, ख, ग, घ, ङ, च | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| क, ख, ग, घ, ङ, च | व्याख्यात्मकाः | ४ | ३ | २४ |
| क, ख, ग, घ, ङ, च | वस्तुगताः | १० | १० | १० |
| | योगः | २६ | २१ | १०० |

**७. पाठ्यसूची**

**क) पाठ्यग्रन्थाः**

१. **श्रीमद्भगवद्गीता,** शाङ्करभाष्यानुसार्यर्थसहिता सम्पूर्णा

२. **श्रीमद्भगवद्गीताशाङ्करभाष्यम्,** श्रीमद्भगवद्गीतायाः शाङ्करभाष्यस्य उपोद्घातभाष्यम्, त्रयोदशाध्यायस्य द्वितीयश्लोकस्य, अष्टादशाध्यायस्य षट्षष्टितमश्लोकस्य च शाङ्करभाष्यम्

३. **पञ्चदशी,** विद्यारण्यमुनिकृता, तत्त्वविवेकप्रकरणात्मिका

**ख) सहायकग्रन्थाः**

१.**श्रीमद्भगवद्गीता**, शाङ्करभाष्यसमेता, मोतीलाल बनारसीदास, वाराणसी ।

२.**श्रीमद्भगवद्गीता**, आनन्दगिरिकृतव्याख्ययासहित–शाङ्करभाष्योपेता, नीलकण्ठीव्याख्यया, भाष्योत्कर्षदीपिकया, श्रीधरीयसुबोधिनीव्याख्यया, अभिनवगुप्ताचार्यव्याख्यया, धर्मदत्तशर्मकृत–गूढार्थतत्त्वालोकसहित–धमुसूदनसरस्वतीस्वामिकृतगूढार्थदीपिकया च युता, निर्णयसागर–

मुद्रणालयप्रकाशितस्य पुनर्मुद्रणम्, इण्डोलोजिकल बुक हाउस, वाराणसी, १९८३ क्रै. ।

३.**श्रीमद्भगवद्गीता**, शाङ्करभाष्यसहिता, हिन्द्यनुवादयुता, गीताप्रेस, गोरखपुर ।

४. **पञ्चदशी [सम्पूर्णा],** विद्यारण्यः,व्या. कृष्णकान्त अधिकारी, लेखक स्वयम्, काठमाडौं, द्वि.सं. २०५४ वै. ।

५. **पञ्चदशी [तत्त्वविवेकप्रकरणात्मिका],** विद्यारण्यः,व्या. सुमोदवर्धन कौण्डिन्न्यायन, विद्यार्थी पुस्तक भण्डार, काठमाडौं, २०७० वै. ।

६. **पञ्चदशी [तत्त्वविवेकप्रकरणात्मिका],** विद्यारण्यः,व्या. उमेशप्रसादघिमिरे, प्रका. वैकुण्ठघिमिरे, काठमाडौं २०७१वै. ।

**ग) सन्दर्भग्रन्थाः**

१. **गीता–तात्पर्य,** स्वामी ईश्वरानन्द, गीता मन्दिर सरस्वती अखडा, काठमाण्डौँ, द्वि.सं. २०५० वै.

२. **श्रीमद्भगवद्गीता–लोकभाष्य**, भाष्य. अम्बिकाप्रसाद अधिकारी, प्रका. लोकलक्ष्मी अधिकारी, काठमाण्डौँ, द्वि.सं. २०५७ वै.

३. **श्रीमद्भगवद्गीता–तत्त्वप्रकाश** ङ्क५ भाग), तत्त्वप्रकाशनिरूपक प्रा.डा. दीर्घराज घिमिरे, काठमाण्डौँ २०५६–२०७३ वै.

४. **गीतातत्त्वविवेचनी** ङ्कहिन्दी टीका), जयदयाल गोयन्दका, गीताप्रेस, गोरखपुर

# शाङ्करवेदान्तः

**पाठ्यांशनाम— परमपुरुषार्थसाधननिरूपणम्** **पाठ्यांशसङ्केतः**— शा.वे. ४०२

स्तरः— शास्त्री **पूर्णाङ्काः**— १००

**खण्डः**— द्वितीयः **वार्षिकः पाठ्यभारः**— १६० घण्टाः

**पत्रम्—** चतुर्थम् **साप्ताहिकः पाठ्यभारः**— ६

## १. पाठ्यांशपरिचयः

शास्त्रिकक्षायां प्रविश्य शाङ्करवेदान्तविषयमवलम्ब्य प्रथमवर्षस्याध्ययनं समाप्य द्वितीयवर्षेऽध्येतुकामानां छात्राणां कृते पाठ्यांशोऽयं निर्धारितः । चतुःप्रकरणात्मकेऽस्मिन् पाठ्यक्रमेऽध्यनीयविषयत्वेन छान्दोग्योपनिषदः पञ्चम-षष्ठ-सप्तमाष्टमाध्यायानां विषयाः पाठ्यांशत्वेन निर्धारिताः सन्ति ।

तत्र प्रतिप्रकरणं विषयसंयोजनञ्चेत्थं विहितम्— **क**-प्रकरणे प्राणस्य ज्येष्ठत्व-श्रेष्ठत्वप्रतिपादकाः, पञ्चाग्निविद्याबोधकाः, देवयान-पितृयाणमार्गप्रदर्शकाः, वैश्वानरविद्याप्रबोधकाश्च विषयाः समाविष्टाः सन्ति; **ख**-प्रकरणे पितापुत्राख्यायिकाया माध्यमेन सृष्ट्यादिप्रतिपादनद्वारा आत्मनोऽद्वितीयत्वसाधका विषयाः, जीवब्रह्मणोरैक्य-प्रतिपादकाश्च विषयाः सन्ति निर्धारिताः । **घ**-प्रकरणे तु नारद-सनत्कुमारसंवादमाध्यमेन नामतो भूमपर्यन्तानामुत्तरोत्तरोत्कृष्टत्वप्रतिपादनद्वारा भूमरूपस्य ब्रह्मणः प्रतिपादका विषया निर्दिष्टाः । एवमेव **ङ**-प्रकरणे दहरब्रह्मनिरूपकाः, इन्द्रविरोचनाख्यायिकामाध्यमेन आत्मविदो जीवस्याऽऽत्म-रूपेणाऽऽविर्भावप्रदर्शकाः, आकाशरूपस्य ब्रह्मणः प्रतिपादकाश्च विषया निर्धारिताः सन्ति ।

एवमस्मिन् पाठ्यक्रमे छान्दोग्योपनिषदोऽत्यन्तमहत्त्वपूर्णानां विषयाणां निर्धारणं कृतमिति छान्दोग्योपनिषदो विषयज्ञानायायं पाठ्यांश उपकारको भविष्यति पाठ्यक्रमेऽस्मिन् सामान्योद्देश्यनिर्धारणं विशिष्टोद्देश्यनिदर्शनं शिक्षणविधेर्मूल्याङ्कन-प्रकाराणाञ्चोल्लेखो विहित इति सर्वाङ्गपूर्णत्वमस्येति कथयितुं शक्यते ।

## २. पाठ्यांशसामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितेषु विषयेषु प्रवीणा भविष्यन्ति—

- उपनिषदोऽर्थज्ञानस्य प्रक्रियायाः अवबोधने,
- उपनिषदि प्रदर्शितानामाख्यायिकानां प्रयोजनज्ञापने,
- महावाक्यस्यार्थप्रतिपादने,
- पञ्चाग्निविद्या-वैश्वानरविद्या-भूमविद्या-दहरविद्यादीनां रहस्यावबोधने च ।

### ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | प्राणस्य ज्येष्ठत्व-श्रेष्ठत्वप्रतिपादनम्, पञ्चाग्निविद्या-वैश्वानरविद्यानिरूपणञ्च | छान्दोग्योपनिषदः पञ्चमोऽध्यायः | २५ | ४० |
| ख | तत्त्वमसीति महावाक्यस्य विवेचनम् | छान्दोग्योपनिषदः षष्ठोऽध्यायः | २५ | ४० |
| ग | भूमविद्यायाः स्वरूपस्य प्रस्तुतिः | छान्दोग्योपनिषदः सप्तमोऽध्यायः | २५ | ४० |
| घ | दहरविद्याविवेचनम् | छान्दोग्योपनिषदः अष्टमोऽध्यायः | २५ | ४० |

### ४. पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

आख्यायिकामाध्यमेन प्राणस्य ज्येष्ठत्व-श्रेष्ठत्वप्रतिपादनम्, मन्थकर्मप्रदर्शनञ्च आख्यायिकामाध्यमेन पञ्चाग्निविद्याया निरूपणम्, तत्र राज्ञा प्रवाहणेन पञ्चप्रश्नानां प्रस्तुतिः, पञ्चप्रश्नानां प्रवाहणेनैवोत्तरप्रदानम्, तत्क्रमे पञ्चाग्निविद्यायाः, देवयान-पितृयाणमार्गयोः, पुनरावर्तनमार्गस्य च प्रदर्शनम्; पञ्चाग्निविद्यामाहात्म्योक्तिश्च

वैश्वानरविद्याया उपक्रमः, राज्ञा अश्वपतिना वैश्वानरविद्योपदेशात् पूर्वं तद्विद्येच्छुकानां प्राचीनशालादीनां प्रति कृता वैश्वानरोपासनविषयकाः प्रश्नाः, तैरुक्ते व्यस्तोपासने दोषप्रदर्शनम्, तदनन्तरं समस्तोपासनरूपायाः वैश्वानरविद्यायाः प्रतिपादनम्, वैश्वानरविदो भोजनेऽग्निहोत्रत्वप्रदर्शनम्, वैश्वानरविद्यामाहात्म्यप्रदर्शनं तत्फलोक्तिश्च

**'ख'प्रकरणे**

पञ्चमाध्यायेन सह षष्ठाध्यायस्य सम्बन्धकथनम्, पितापुत्रसंवादरूपाया आख्यायिकायास्तात्पर्योक्तिः, एकविज्ञानेन सर्वविज्ञानविषयकः प्रश्नः, असद्वादनिराकरणपूर्वकं सद्वादस्थापनम्, सतः सृष्टिप्रतिपादनम्, त्रिवृत्करणप्रकारप्रदर्शनम्, अन्नमयं मनः आपोमयः प्राणस्तेजोमयी वागिति साधनम्, 'स्वपिति'शब्द-निर्वचनम्, मूलान्वेषणप्रक्रियया सर्वासां प्रजानां सन्मूलत्वप्रदर्शनम्, अनेकदृष्टान्तप्रदर्शनपूर्वकं तत्त्वमसीतिवाक्यार्थ-निरूपणम्, वाक्यप्रमाणजन्यफलप्रतिपादनञ्च

**'ग'प्रकरणे**

सनत्कुमार-नारदसंवादरूपाऽऽख्यायिका तत्प्रयोजनञ्च, ऋग्वेदादिसर्वशास्त्रवित्त्वेऽपि नात्मवित्त्वमिति प्रदर्शनम्, 'तरति शोकमात्मविद्' इति प्रतिपादनम्, ऋग्वेदादीनां नामत्वम्, वागादि-प्राणान्तानामुत्तरोत्तरोत्कर्ष-प्रदर्शनम्, प्राणमाहात्म्यप्रतिपादनम्, सत्यवदनस्यातिवादित्वम्, तदर्थं सुखान्तानां जिज्ञासितव्यत्वोक्तिः, सुखं च भूम्नि एव वर्तत इति प्रतिपादनम्, भूमस्वरूपप्रदर्शनम्, भूम्न आत्मत्वसाधनम्, भूमविद्याफलप्रदर्शनञ्च

**'घ'प्रकरणे**

दहरब्रह्मणः स्वरूपं तज्ज्ञानस्य फलवत्त्वञ्च, हृदयशब्दनिर्वचनम्, सम्प्रसादशब्दवाच्यस्य जीवस्य स्वरूपेणावस्थितिरेव जीवस्य ब्रह्मरूपत्वमिति प्रतिपादनम्, सेतुरूपस्यात्मन उपासनम्, यज्ञादिषु ब्रह्मचर्यदृष्टिः, नाडीनां स्वरूपम्, प्रजापतिद्वाराऽऽत्मतत्त्वविदुषो फलोक्तिः, इन्द्रविरोचनयोरात्मविद्याप्राप्तये प्रजापतिसमीपगमनम्, प्रजापतिद्वाराऽऽत्मविद्योपदेशः, विरोचनस्य सम्यगात्मतत्त्वमज्ञात्वैव प्रत्यावृत्तिः, इन्द्रेण एकाधिकशतवर्षपर्यन्तं प्रजापतौ ब्रह्मचर्यमुषित्वाऽऽत्मज्ञानप्राप्तिः, तत्क्रमे अक्षिपुरुषस्य प्रतिबिम्बपुरुषस्य चोपदेशः, इन्द्रस्य तत्र दोषदृष्टिः, स्वप्नपुरुषस्योपदेशः, तत्रापीन्द्रस्य दोषदृष्टिः, सुषुप्तपुरुषस्योपदेशः, इन्द्रस्य तत्रापि दोषदृष्टिः, सशरीरस्य प्रियाप्रियापहतिरूपस्य मोक्षस्याभावः, अशरीरस्यैव तत्प्राप्तिः, अशरीरत्व-साधनाय स्वेनरूपेणावस्थानस्यावश्यकता, तत्फलप्रदर्शनम्, आत्मज्ञानपरम्परायाः आत्मविद्याप्राप्त्युपायस्य तत्फलस्य चोक्त्या ग्रन्थोपसंहारः

## ५. शिक्षणविधिः

निगमनागमनविमर्शव्याख्यानप्रश्नोत्तराद्याः पद्धतयो विषयानुसारेणावलम्बनीयाः । शिक्षणक्रमे छात्रा एव विशेषतो व्यापृताः करणीयाः । सति सम्भवे छात्रा अन्वेषणेऽपि प्रेरणीयाः । यथासम्भवं श्रव्यदृश्यसामग्रीणामपि प्रयोगो विधेयः । आवश्यकत्वे सति शिक्षकेण दूरशिक्षणानुकूलतया पाठयोजना विधेया, प्रविध्युपयोगश्च कर्तव्यः ।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तोऽस्ति– आन्तरिकम् (निर्माणात्मकम्), बाह्यम् (निर्णयात्मकम्) चेति । आन्तरिक-मूल्याङ्कनं मुख्यरूपेण कक्षागतमेव भवति । छात्रोपस्थितिम्, कक्षाकार्यम्, गृहकार्यम्, कक्षापरीक्षा चेत्याद्याधारेण विभागसमन्वयेनाऽऽन्तरिकं मूल्याङ्कनं विधीयते । विंशतिप्रतिशदङ्का आन्तरिकमूल्याङ्कनस्य कृते निर्धारिताः । बाह्यपरीक्षा शतपूर्णाङ्कात्मिकैव भवति । परीक्षाफलप्रकाशने आन्तरिकमूल्याङ्कनस्याङ्कानां समायोजनं भवति । बाह्यपरीक्षार्थं प्रश्नपत्रनिर्माणमधोनिर्दिष्टप्रकारेण भवति–

**वार्षिक-परीक्षा-प्रश्नपत्रनिर्माणयोजना**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, घ, ङ, च | विवेचनात्मकाः | ३ | २ | २४ |
| क, ख, ग, घ, ङ, च | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| क, ख, ग, घ, ङ, च | व्याख्यात्मकाः | ४ | ३ | २४ |
| क, ख, ग, घ, ङ, च | वस्तुगताः | १० | १० | १० |
| | योगः | २६ | २१ | १०० |

## ७. पाठ्यसूची

### क) पाठ्यग्रन्थः

१. **छान्दोग्योपनिषद्,** शाङ्करभाष्यसहिता, ५–८ अध्यायाः

**ख) सहायकग्रन्थाः**

१. **छान्दोग्योपनिषद्,** सानुवाद-शाङ्करभाष्यसहिता, गीताप्रेस, गोरखपुर ।

२. **छान्दोग्योपनिषद्,** 'उपनिषद्भाष्यम् ङ्कखण्ड २)' इत्यत्र सङ्गृहीता, श्रीमन्नरेन्द्रपुरी-श्रीमदानन्दगिरिकृत-टीकायुत-शाङ्करभाष्यसहिता, दक्षिणामूर्ति प्रकाशन, वाराणसी, २०६२ वै. ।

३. **छान्दोग्योपनिषद्,** भाषानुवाद, माधवप्रसाद देवकोटा, ने.रा.प्र.प्र., काठमाडौं २०३० वै. ।

**ग) सन्दर्भग्रन्थौ**

१. कल्याणपत्रिकाया **उपनिषदङ्कः**, गीताप्रेस, गोरखपुर, २००५ वै. ।

२. **वैदिक धर्म मूल रूपमा,**शिवराज आचार्य कौण्डिन्न्यायन, स्वाध्यायशाला, काठमाडौं, द्वि.सं.२०६२ वै. ।

# धर्मशास्त्रम्

**पाठ्यांशनाम** –अग्निप्रणयनादिसहितसंस्कारादिज्ञानम् **पाठ्यांशसङ्केतः**– ध.शा. ४०१

**स्तर** – शास्त्री **पूर्णाङ्काः**–१००

**खण्ड** – द्वितीयः **वार्षिकः पाठ्यभारः**–१६० घण्टा

**पत्रम्** – तृतीयम् **साप्ताहिकः पाठ्यभारः**– ६

## १. पाठ्यांशपरिचयः

धर्मशास्त्रविषयस्य शास्त्रिस्तरीयद्वितीयवर्षस्य तृतीयपत्रे हरिहरभाष्यसहितपारस्करगृह्यसूत्रं तथा निर्णयसिन्धोः प्रथमपरिच्छेदस्तथा तृतीयपरिच्छेदस्या छुद्रकालमारभ्य कलिवर्ज्य प्रकरणपर्यन्तं निर्धारितं वर्तते। वेदादिशास्त्राणां व्याख्या सूत्रमाध्यमेन क्रियते । सूत्रेषु श्रौतगृह्यधर्मशुल्वसूत्राणि सन्ति । श्रौतविधिनिदर्शनाय कात्ययनादिश्रौतसूत्रस्योपयोगः क्रियते। गृह्यसूत्रेष्वपि पारस्करगृह्यसूत्रं शुक्लयजुर्वेदिनां मुख्यं गुह्यसूत्रं मन्यते। अस्मिन् गृह्यसूत्रे होमविधिमारभ्य विविधसंस्काराणां वर्णनं कृत्यनिर्देशनञ्च निर्दिष्टमस्ति। संस्कारेषु विशेषतः चूडोपनयनविवाहादिविषयकृत्यानाञ्च कर्तव्यनिदर्शनमस्ति। तथा ह्यन्तेष्टिसंस्कारविषये च कृत्यविधिराशौचविधानञ्च प्रदर्शितं वर्तते । अस्य ग्रन्थस्य सूक्ष्मतमज्ञानाय हरिहरभाष्यस्यावश्यकतां निभाल्य तस्यापि समावेशः कृतो वर्तते पाठ्यग्रन्थे। तेन पारस्करगृह्यसूत्रग्रन्थे वर्णितविषयाणां गभीरतया विषयबोधाय सरलता च भविष्यति।

सम्वत्सर–तिथि–व्रत–पर्व–सङ्क्रान्ति–मलमास–ग्रहण–गुरुशुक्रास्तादिज्ञानाधारेण हि धर्मशास्त्रीयनिर्णयो विधीयते। एतेषां विषयाणां ज्ञानाय निर्णयसिन्धोः प्रथमपरिच्छेदस्य समावेशो विहितो वर्तते । एवं हि तेषां विषयाणामुपयोगाय निर्णयसिन्धुग्रन्थस्यैव तृतीयपरिच्छेदस्य जलाशयादीनां शुभमुहूर्त निर्धारणार्थं क्षुद्रकालमारभ्य कलिवर्ज्यप्रकरणान्तभागेन प्रतिष्ठासु गुणाधानदोषापनोदनादीनि भवन्तीति मत्वा संस्कारप्रतिष्ठासम्पादनकालः, शुभमुहूर्तज्ञानम्, देवालयादिभङ्गे, दोषादिपाते च पुनःप्रतिष्ठाशान्त्यादिविधिश्चात्रोपस्थापितो वर्तते । एतेन हि छात्राः जलाशयादिप्रतिष्ठासम्बन्धितिकृत्यादिविषयमुहूर्तनिर्धारणे च निपुणाः भवन्ति।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

- शास्त्रीयहोमविधौ कुशकण्डिकादिहवनविधिस्तथार्घदानविवाहविधिकृत्यसम्पादने
- सविधिचूडोपनयनादिसंस्कारस्तथानवान्नप्राशनादिविषयकविधिविवेचने

- अन्त्येष्टिसंस्कारसम्बन्धिविधिनिषेधकृत्यवर्णनेसम्पादने च
- सम्वत्सरमलमासव्रतोपवासग्रहणादिकालकृत्यविषयाणांवैशिष्ठ्यव्याख्याने
- वापीकूपदीनां शास्त्रनिर्दिष्टमुहूर्तनिर्धारणावश्यकतिथ्यादिविवेचने

**३.पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च**

| **प्रकरणानि** | **प्रकरणगतविशिष्टोद्देश्यानि** | **पाठ्यविषयाः** | **अङ्काः** | **पाठघण्ट्याः** |
|---|---|---|---|---|
| क | पारस्करगृह्यसूत्रप्रथमकाण्ड –स्य प्रथमकण्डिकामारभ्यान्नप्राश –नान्तं प्रथमकाण्डं सम्पूर्णम् | अग्निस्थापनविवाहसंस्कारन्नप्रा– शनदिविषयाः | २० | ३८ |
| ख | अस्यैव ग्रन्थस्य द्वतीयकाण्डस्य चूडोपनयनादिविधिज्ञानपूर्वकं तृतीयकाण्डस्य वृषोत्सर्गान्तम् | चूडोपनयनविधिज्ञानपूर्वकं वृषोत्सर्गादिविषयाः | २० | ३८ |
| ग | अस्यैवग्रन्थस्य अन्त्येष्टिसंस्कारज्ञानपूर्वकम धीत वेदादिशास्त्राणामविस्मरणोपा यज्ञानपर्यन्तम् | अन्त्येष्टिसंस्कारसम्बन्धिविविध– विषयपाठनपूर्वकं नैमित्तिकादिदोषापनोदनज्ञानसहित वेदादिशास्त्राध्ययना विस्मृतिज्ञानान्तविषयाः | १० | १६ |
| घ | वार्षिकतिथिपर्वादिनिर्णयज्ञान ाय निर्णयसिन्धोः प्रथम– परिच्छेदस्य साङ्गाध्ययनम्। | वार्षिकव्रतपर्वमलमासग्रहणादिषु कृत्याकृत्यविषयाः | २२ | २८ |
| ङ | गर्भधानादिसंस्कारेषु शुभमुहूर्तज्ञानपूर्वकं मूलनक्षत्रादिजननेन दोषपतिते सति शान्त्यादिविषयज्ञानाय निर्णयसिन्धोः तृतीय परिच्छेदस्य प्रारम्भतः संस्कारप्रकरणान्तोभागः। | गर्भाधानादिसंस्कारेषु शुभमुहूर्तज्ञानपूर्वकं विविधशान्त्यादिविषयाः | २८ | ४० |

४. पाठ्यवस्तुविवरणम्

**क प्रकरणे**

**अग्निस्थापनसहितविवाहाद्यन्नप्राशनान्तसंस्काराध्ययनम्**

होमसाधारणविधिः, आवसथ्याधानविधिः, अर्घविधिः, विवाहविधिः, औपासनहोमः, वध्वाभतृगृहे प्रथमगमने कर्म, चतुर्थीकर्म, पक्षादिकर्म, गर्भाधानविधिः, पुंसवनम्, सीमन्तोन्नयनम्, सोष्यन्तीकर्म, जातकर्म, रक्षाविधिः, नामकरणम्, निष्क्रमणम्, सूर्यावेक्षणम्, प्रोष्यागतस्य कर्म, अन्नप्राशनम् ।

**ख प्रकरणे**

**चूडाकरणसंस्कारमारभ्यवृषोत्सर्गान्तविषयाध्ययनम्**

चूडाकरणम्, केशान्तः, उपनयनम्, समिधादानम्, भिक्षाचरणदण्डाजिनधारणादिब्रह्मचारिव्रतानि, समावर्तनकालः, पतितसावित्रिकाः, स्नानविधिः, स्नातकव्रतानि, स्नातकस्य स्नानदिनात्प्रभृति त्रिरात्रव्रतम् पञ्चमहायज्ञविधिः, उपाकर्मविधिः, अनध्यायाः, उत्सर्गोत्तरं जपः, उत्सर्गविधिः, लाङ्गलयोजनम्, श्रवणाकर्म, इन्द्रयज्ञः, आश्वयुजीकर्म, सीतायज्ञः, नवान्नप्राशनम्, स्रस्तारोहणं, अष्टका, अन्वष्टका, शालाकर्म( वास्तुशान्तिः), मणिकावधानम्, शीर्षरोगभेषजम्, उतूलपरिमेहः, शूलगवः, गोयज्ञ, वृषोत्सर्गः ।

**ग प्रकरणे**

**अन्त्येष्टिसंस्कारमारभ्य वेदादिशास्त्राविस्मृतिज्ञानपर्यन्तम्**

अन्त्येष्टिसंस्कारः (उदककर्म), शाखापशुविधिः, अवकीर्णिप्रायश्चित्तम्, सभाप्रवेशकर्म, रथारोहणविधिः, हस्त्यादिरोहणविधिः, अश्वोष्ट्रखरमार्गादिरोहणानि, चतुष्पदगमनम्, वनादिविविधाभिमन्त्रणम्, नैमित्तिकदोषनिवारणम्, प्रतिग्रहविधानम्, अधितस्याविस्मरणोपायः ।

**घ प्रकरणे**

**वार्षिकतिथिपर्वादिनिर्णयज्ञानाध्ययनम्**

अस्मिन् प्रकरणे निर्णयसिन्धोः प्रथमपरिच्छेदान्तर्गता विषयाः । तत्र वर्षनिर्णयः, सम्वत्सरनिर्णयः, ऋतु–मास–संक्रान्तिनिर्णयः संक्रान्तिषु दानोपवासश्राद्धविचारः चान्द्रसावनादिमासाः, मलमासक्षयमासनिर्णयः, तत्र कृत्याकृत्यविचारः, शुक्रगुर्वस्तादिविचारः वाल्यवृद्धत्वादिविचारः, तिथिनिर्णयः, नक्तप्रदोषदिव्यवस्था, अयाचितनिर्णयः, व्रतपरिभाषा, उपवासाधिकारिणः,

व्रतारम्भकालः, भद्रानिर्णयः, खण्डतिथिलक्षणम्, व्रते धर्माः, प्रतिमास्वरुपनिर्णयः, दक्षिणादिनिर्णयः, सूतकादौ व्रतनिर्णयः, व्रतादिसन्निपातेषु निर्णयः, प्रतिपदादितिथिनिर्णयः, एकादशीषु काम्यव्रतविधिः, प्रदोषदिसंकटे निर्णयः, इष्टिकालनिर्णयः, अमावास्यायां श्राद्धादिनिर्णयः, ग्रहणवेधादिनिर्णयः, ग्रहणेभोजनस्नानश्राद्धसहितशान्त्यादिविचारसहितसमुद्रस्नानपर्यन्तस्थविषयाः ।

**ङ प्रकरणे**

वापीकूपादिनिर्माणकालः, कूपदेशास्तत्फलं च, वापीकूपाद्युत्सर्गविधिः, कूपादेरुत्सर्गाकरणे दोषः, वृक्षारोपणम्, मूर्तिप्रतिष्ठाकालनिर्णयः, प्रतिष्ठानक्षत्राणि, मासनिर्णयः, प्रतिष्ठातिथयस्तत्फलानि च, वारफलानि, अयनर्तुफलानि, लिङ्गप्रतिष्ठायां विशेषः, प्रतिष्ठाधिकारिनिर्णयः, शूद्रस्थापितलिङ्गादौ निर्णयः, स्त्रीशूद्राणां शिवविष्णुपूजने निषेधः, प्रतिमादिपूजने दिङ्नियमः, प्रतिमानिर्णयः, गृहे प्रतिमामानम्, प्राणप्रतिष्ठादिविधिः, मृदादिद्रव्यभेदेन लिङ्गे फलविशेषः, पञ्चसूत्रीविधिः, गृहे शङ्खशालग्रामादिपूजननिर्णयः, स्त्रीभिः शिवविष्णुस्पर्शो न कार्यः, ब्राह्मणादिभिःकतिसंख्याःप्रतिमाःपूज्याः, नवधा द्रव्यस्य प्रतिप्रसवः, शालग्रामशिवनाभिपरीक्षा, पार्थिवपूजाविधिः, अमुकदेवे अमुकवाद्यनिषेधः, शिवस्य, पुष्पादिकमर्पणीयम्, त्रिपुण्ड्रधारणं रुद्राक्षधारणं च , रुद्राक्षधारणे एकवक्रादिभेदेन फलविशेषः, रुद्राक्षाभिमन्त्रणम्, रुद्राक्षमालाधारणम्, शिवमहास्नानं पञ्चामृतस्य, विष्ण्वादौ महास्नानं पञ्चामृतस्य, विष्वक्सेनादीनां नैवेद्यविभागः, पञ्चायतनस्थापनप्रकारः, केशवादिमूर्तिनिर्णयः, देवप्रतिष्ठाप्रयोगः, लिङ्गप्रतिष्ठा, ब्रह्मादिमण्डलदेवताः, प्राणप्रतिष्ठा, पुनःप्रतिष्ठा, जीर्णोद्धारः, मूर्तीप्रासादभेदने, तुलसीग्रहणम्, पुष्पादीनां पर्युषितापर्युषितत्वविचारः, शिवनिर्माख्यविर्णयः, कृषिकर्मनिर्णयः, वस्त्रपरिधाननिर्णयः, अलङ्कारवलयादिधारणनिर्णयः,सूचीकर्म, शय्याद्यारम्भः, शस्त्रधारणम्, स्वमिसेवा, नृत्यारम्भः, क्रयविक्रयनिर्णयः, सेतुबन्धनम्, पशूनां क्रयादिनिर्णयः, गजदन्तच्छेदः, धननिक्षेपः, ऋणमोक्षः, राजमुद्रानिर्माणम्, नौकानिर्माणम्, भोगनिर्णयः, श्मश्रुकर्मनिर्णयः, काष्ठसंग्रहः, नवान्नमुहूर्तः, नवभोजनपात्रम्, नवपर्णफलभक्षणादिनिर्णयः, होमे–आहुतिनिर्णयः, शान्तिनिर्णयः, ज्वरादौ फलं परिहारनिर्णयश्च, भेषजग्रहणम्, आरोग्यस्नानम्, दन्तधावनम्, प्रोषितभर्तृकानियमाः, आमलकस्नानम्, अभ्यङ्गनिषेधः, गृहारम्भमुहूर्तः, गृहप्रवेशः, कलिवर्ज्यानि ।

**५. शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता

अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयप्रकृत्यनुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – **आन्तरिकम्** (निर्माणात्मकम्), **बाह्यम्** ( निर्णयात्मकम्) च । आन्तरं मूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरं मूल्याङ्कनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरमूल्याङ्कनस्य कृते प्रतिशतं **विंशत्यङ्काः** निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानाम् आन्तरमूल्याङ्कनस्याङ्कानां ने.सं.वि.परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारिणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, घ, ङ | विवेचनात्मकाः | ३ | २ | २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| | व्याख्यात्मकाः | ४ | ३ | २४ |
| | वस्तुगताः | १० | १० | १० |
| योगः | | २६ | २१ | १०० |

७ पाठ्यसूची

(क) पाठ्यग्रन्थौ

१.पारस्करः, *हरिहरभाष्यसहितं पारस्करगृह्यसूत्रं , चौखम्बा अमरभारती प्रकाशन, वाराणसी, वि.सं.२०३६*

२.कमलाकरभट्टः, *निर्णयसिन्धुः , चौखम्बा विद्याभवन, वाराणसी, ई.सं १९९१ प्रथम संस्करण*

ख) सहायकग्रन्थौ

१. काशीनाथः , धर्मसिन्धुः चौखम्बा संस्कृत संस्थान द्वितीय संस्करण, ई.सं.१९९१

२. बुद्धिसागरपराजुलिः (सं), कृत्यवाटिका, राष्ट्रिय अभिलेखालय

(ग) सन्दर्भग्रन्थः

१ राधाकृष्ण –अधिकारी, धर्मशास्त्रं सामाजिकव्यवस्थायाः साधनम्, (सम्बद्धांशमात्रम्) प्रकाशक सहप्रा. शान्तिकृष्ण अधिकारी आदि, वि.सं. २०७७

# धर्मशास्त्रम्

**पाठ्यांशनाम** – संस्काराशौचयोर्धर्ममीमांसायाश्च स्वरूपम् **पाठ्यांशसंकेतः** -ध.शा.४०२

**स्तरः** – शास्त्री **पूर्णाङ्काः** – १००

**वर्षः** – द्वितीयः **वार्षिकः पाठ्यभारः** – १६० घण्टाः

**पत्रम्** – चतुर्थम् **साप्ताहिकः पाठ्यभारः** – ६

## १. पाठ्यांशपरिचयः

धर्मसूत्राणि, स्मृतयो धर्मनिबन्धाश्चेति त्रिविधानि शास्त्राणि मूलतो धर्मशास्त्ररूपेण प्रसिद्धानि । धर्मनिबन्धेषु विशेषेण धर्मसूत्रनिबद्धानां मन्वादिस्मृतिनिरूपितविषयाणां च देशकालपरिस्थित्यनुकूलतया व्यवस्थापनम्, वर्णनम्, विश्लेषणं सत्यापनञ्च विहितमस्ति । अस्मिन् पाठ्यांशे पाठ्यविषयत्वेन मुख्यतः संस्कारसम्बद्धाः, आशौचसम्बद्धाश्च विषया निर्धारिताः सन्ति । एवमत्र धर्माधर्मविवेकसौकर्याय मीमांसापरिचायको विषयश्च समाविष्टः । धर्मशास्त्रेतिहासाध्ययनक्रमे नैकविधा धर्मनिबन्धग्रन्था धर्मशास्त्रविषयीभूताः समुपलभ्यन्ते । तेषु ग्रन्थेषु शास्त्रिद्वितीयवर्षस्य चतुर्थे पत्रे धर्मशास्त्रविषयमवलम्ब्य पिपठिषूणां छात्राणां कृते श्रीनीलकण्ठभट्टसुतः श्रीशङ्करभट्टविरचितः संस्कारमयूखः, श्रीमधुसूदनओझाविरचिता आशौचपञ्जिका, श्रीकृष्णयज्वाविरचिता मीमांसापरिभाषा चेति त्रयो ग्रन्था निर्धारिताः सन्ति । संस्कारमयूखे निरूपिता धर्मप्रमाणादिसंन्यासधर्मान्ता विषयाः, आशौचपञ्जिकायां निरूपिताः परिभाषाध्यायाद्याशौचापवादाध्यायान्ता विषयाः, मीमांसापरिभाषायां निरूपिता ग्रन्थप्रस्तावनादिक्रमनिरूपणान्ताश्च विषयाः पाठ्यसामग्रीरूपेण पाठ्यांशेऽस्मिन्निर्धारिताः सन्ति । पाठ्यांशोऽयं पञ्चभिः प्रकरणैः समन्वितो विद्यते । तेषु प्रथमे कप्रकरणे संस्कारमयूखान्तर्गता धर्मलक्षणमीमांसादि-गार्हस्थ्यस्तुत्यन्ता विषया निर्धारिताः सन्ति चेद् द्वितीये खप्रकरणे संस्कारमयूख एव निबद्धाः समावर्तनसंस्कारादि-संन्यासधर्मान्ता विषया निर्धारिताः सन्ति । तृतीये गप्रकरणे आशौचपञ्जिकायां निरूपिताः शास्त्रसङ्ग्रहादि-सूतिकासंसर्गाधिकारान्ताः विषया निर्धारिताः सन्ति चेच्चतुर्थे घप्रकरणे पुरुषाशौचाधिकारादि-वचनाधिकारान्ताः सर्वे विषया निर्धारिताः सन्ति । तथैव पञ्चमे ङप्रकरणे मीमांसापरिभाषायां निरूपिता विषयाः पाठ्सामग्रीरूपेण निर्धारिताः सन्ति । एवमस्मिन् पाठ्यांशे संस्कारमयूखे निरूपिताः संस्कारसम्बद्धाः, आशौचपञ्जिकायां निरूपिता आशौचसम्बद्धाः, मीमांसापरिभाषायां निरूपिता धर्ममीमांसासम्बद्धाश्च विषयाः समाविष्टाः सन्ति ।

## २. पाठ्यांशस्य सामान्योद्देश्यम्

अस्मिन् पाठ्यांशे उद्देश्यद्वयं सन्निहितं विद्यते । तत्र प्रथमं निखिलपाठ्यविषयगतं समुच्चयात्मकं सामान्योद्देश्यमस्ति चेद् द्वितीयं प्रतिप्रकरणसम्बद्धं विशिष्टोद्देश्यम्अस्ति । सामान्येनास्य पाठ्यांशस्याध्ययनेन छात्रा अधोलिखितविषयेषु प्रावीण्यमेष्यन्ति –

- धर्मशास्त्रनिर्दिष्टानां विविधसंस्कारसम्बद्धविषयाणां ज्ञानार्जने ।
- जननमरणशौचसम्बद्धानां विविधविषयाणां ज्ञानार्जने ।
- धर्माधर्ममीमांसार्थम्आवश्यकस्य धर्ममीमांसाविषयस्य च सामान्यज्ञानार्जने ।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यं पाठ्यविषयसंयोजनञ्च

| प्रकरणगतविशिष्टोद्देश्यम् | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|
| कप्रकरणे- र्मप्रमाणादिसिद्धान्तानाम्, गर्भाधानादिसंस्कारधर्माणां च स्वरूपोपस्थापनम् | संस्कारमयूखे निबद्धा धर्मप्रमाणविचारादितः उपनयनसंस्कारविशेषान्ता विषयाः । | २० | ३२ |
| खप्रकरणे- समावर्तन- विवाहसंस्कार- विषयकधर्माणाम् आश्रमधर्माणां च स्वरूपनिर्धारणम् | संस्कारमयूखे निबद्धाः समावर्तनसंस्कारादितः आश्रमधर्मान्ताः सर्वे विषया : । | २० | ३२ |
| गप्रकरणे- आशौचसिद्धान्तानम्, जन्माशौचसम्बद्धविषयाणाञ्च समालोचनम् | आशौचपञ्जिकायाः प्रारम्भतो जन्माध्यायपर्यन्तं निरूपिताः आशौचसिद्धान्तविषयकाः, जन्माशौचसम्बद्धाश्च सर्वे विषयाः । | २० | ३२ |
| घप्रकरणे- मरणाशौचोत्तरक्रियाशौचयोः, दोष- पातातिक्रान्ताशौचानाम्, आशौचापवादविषयाणाञ्च | आशौचपञ्जिकायां मरणाध्यायतः आशौचापवादाध्यायपर्यन्तं यथाक्रमं निरूपिताः सर्वे विषयाः । | २० | ३२ |

| | | | |
|---|---|---|---|
| पर्यालोचनम् | | | |
| ङप्रकरणे- धर्ममीमासायाः स्वरूपविवेकार्थम् आवश्यकम् आधारभूतविषयाणाम् अध्ययनम् | मीमांसापरिभाषायां निरूपिता धर्ममीमांसासम्बद्धाः सर्वे विषयाः । | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

### (क) गर्भाधानादिसंस्कारधर्माणां स्वरूपम्

धर्मप्रमाणविचारः, स्मृतिप्रवर्तकानां नामानि, संहितोपपुराणमहापुराणानां लक्षणानि, धर्मलक्षणम्, धर्मानुष्ठानदेशाः, संस्कारोद्देश्यम्, तद्भेदाः, रजोदर्शनविचारः, गर्भाधानम्, पुंसवनम्, अनवलोभनम्, सीमन्तोन्नयनम्, जातकर्म, नामकर्म, कर्णवेधः, निष्क्रमणम्, उपनिवेशनम्, अन्नप्राशनम्, चूडाकर्म, विद्यारम्भः, उपनयनञ्चेति संस्कारविशेषाः कप्रकरणस्य पाठ्यविषयाः सन्ति ।

### (ख) समावर्तन-विवाहसंस्कारयोः, आश्रमधर्मस्य चाध्ययनम्

संस्कारमयूखे निबद्धाः समावर्तनसंस्कारसम्बद्धा नियमास्तथैव कन्यालक्षणम्, सापिण्ड्यस्वरूपम्, गोत्रप्रवरनिर्णयः, द्व्यामुष्याणमीमांसा, विवाहक्रमः, विवाहभेदाः, विवाहकालः, कन्यादातृक्रमश्चेत्यादयो विवाहसंस्कारसम्बद्धाः सर्वे धर्माः, वर्णजातिविवेकः, स्त्रीधर्माः, ब्राह्मणक्षत्रियवैश्यशूद्राणां धर्माः, चतुर्णामाश्रमाणां धर्मविशेषाश्च खप्रकरणान्तर्गताः पाठ्यविषयाः सन्ति ।

### (ग) आशौचसिद्धान्तो जन्माशौचश्च

आशौचनिर्णयो जननाशौचविचारश्च मूलतो गप्रकरणान्तर्गतः । अत्र विशेषेण आशौचस्वरूपम्, आशौचविशेषाः, स्पर्शास्पर्शव्यवस्था, कर्तव्याकर्तव्यवस्था, आशौचारम्भहेतुः कालश्च, आशौचनिवृत्तिहेतवः, शुद्धिक्षौरम्, आशौचप्रभवविचारः, सम्बन्धसूत्रविचारः, योनिसम्बन्धस्तदभेदविचारश्च, गोत्र-सगोत्र-सपिण्ड- सापिण्ड्यमेरुविशेषाः, विवाह-दायाशौचसापिण्ड्यविचारः, पिण्डरहस्यम्, विद्यार्त्विज्यसम्बन्धौ, प्रेतसंसर्ग-खनन-दाहोदकदानानि, निमित्तसंसर्गः, आशौचतादात्म्यम्, गर्भस्य स्राव-पात-प्रसवेष्वाशौचम्, पतिगृहे पितृगृहे च प्रसवादौ व्यवस्था, सूतिकाया भर्तुरधिकारविचारः, सूतिकाभर्तुकुलाधिकारविचारः, सूतिकासंसर्गविचारश्चेति पाठ्यविषयाः गप्रकरणान्तर्गताः सन्ति ।

### (घ) मरणाशौचादिविषयाणां परिचयः

पुरुषाधिकारे- ब्राह्मणक्षत्रियादीनाम्, बालानाम्, प्रौढानाम्, शूद्रबालकानाञ्च पृथक्पृथगाशौचनियमाः । स्त्र्यधिकारे- मातापित्रोर्मरणे ऊढकन्यायाः, कन्यामरणे पित्रादीनाम्, भार्यामरणे पत्यादीनाम्, परपूर्वाया भार्याया मरणे सम्बद्धपुरुषाणां कृते चाशौचनियमाः । विगोत्राधिकारे- भगिनीमातुलमातृष्वसृश्वशुरादियोनिसम्बन्धानाम्, गुरुशिष्यादीनाञ्च परस्परमाशौचव्यवस्था । संसर्गाशौचाधिकारे- मित्रश्रोत्रियऋत्विङ्महाराजानां मरणे आशौचनियमाः, आशौचिनामन्नभोजनादौ नियमाश्च । उत्तरक्रियाध्याये निरूपिताः - रोदन-स्पर्शनालङ्करणानुगमन-वहन- दहन-प्रतिदहनादौ पृथक्पृथगाशौचनियमाः । दोषाशौचाध्याये निरूपिताः संसर्गदोष-आशौचदोष-कालदोष-रजोदोषेभ्यो जायमाना आशौचनियमाः । पाताध्याये निरूपिताः गौडसम्प्रदायाधिकारविचारः, द्रविडसम्प्रदायाधिकारविचारस्तथैव फक्किकाधिरश्चेति विषयाः । अतिक्रान्ताशौचप्रकरणे निरूपिता अन्तर्दशाहाधिकारविचारः, निर्दशसूतिकाधिकारविचारः, निर्दशपूर्णशावाधिकारविचारः, विदेशस्थशावाधिकारविचारः, देशान्तरलक्षणञ्चेति विषयाः। आशौचापवादप्रकरणे निरुपिताः कर्तृविशेषादाशौचाभावविचारः, कर्मभेदाशौचाभावविचारः, द्रव्यभेदादाशौचाभावविचारः, मरणविशेषादाशौचाभावविचारः, वचनाधिकारादाशौचाभावविचारश्चेति विषयाः । एते सर्वे घप्रकरणान्तर्गताः पाठ्विषयाः सन्ति ।

### (ङ) धर्ममीमांसाया अध्ययनम्

वेदस्य धर्मे प्रामाण्यम्, वेदस्य द्वैविध्यम्, ब्राह्मणवाक्यभेदाः, कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम्, फलाय गुणवाक्यम्, विशिष्टविधिः, प्रयोगापूर्वनियमपरिसङ्ख्याविधीनां स्वरूपम्, अङ्गत्वबोधकप्रमाणानि, श्रुत्यादीनां सन्निपाते बलाबलविचारः, अङ्गलक्षणम्, अङ्गस्य द्वैविध्यम्, कर्मद्वैविध्यम्, अर्थकर्मगुणकर्मयोः स्वरूपम्, काम्यकर्मणस्त्रैविध्यम्, विधेर्विधायकत्वनिरूपणम्, आर्थीभावनाशाब्दीभावनयोः स्वरूपविचारः, भावनाशब्दार्थनिरूपणम्, नामधेयविचारः, विरुद्धत्रिकविचारः, अर्थवादविचारः, मन्त्रविचारः, परिसङ्ख्याया दोषत्रैविध्यम्, कृत्स्नवेदस्य धर्माधर्माख्यार्थे प्रामाण्यम्, स्मृत्यादीनां धर्मे प्रामाण्यविचारः, धर्मस्य परस्परं भेदकप्रमाणानि, प्रमेयविचारः, प्रयोजकत्वविचारः, श्रुत्यादिक्रमाणां विचारश्चेति पाठ्यविषयाः ङप्रकरणान्तर्गताः सन्ति ।

### ५. शिक्षणविधयः शैक्षिकसामग्री च

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया । मूल्याङ्कनविधिः मूल्याङ्कनं द्विधा विभक्तमस्ति – आन्तरम् (निर्माणात्मकम्), बाह्यम् (निर्णयात्मकम्) च । आन्तरं मूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरं मूल्याङ्कनं विधीयते । गृहकार्यं कक्षापरीक्षा, परियोजनकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरमूल्याङ्कनस्य कृते प्रतिशतं पञ्चविंशत्यङ्काः निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानाम्आन्तरमूल्याङ्कनस्याङ्कानां ने.सं.वि.परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते ।

बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात्सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

वार्षिक-प्रश्नपत्रनिर्माण-सारिणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, घ, ङ | विवेचनात्मकाः | ३ | २ | २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| | व्याख्यात्मकाः | ४ | ३ | २४ |
| | वस्तुगताः | १० | १० | १० |
| योगः | | २६ | २१ | १०० |

## पाठ्यसूची

### पाठ्यग्रन्थाः

भट्टः, शङ्करः (१९६९), **संस्कारमयूखः** , सम्पा.नरहरिशास्त्री, मुम्बई : गुजराती मुद्रणालय ।

ओझाजी, मधुसूदनः (२००८), **आशौचपञ्जिका** , सम्पा.सुरजनदासस्वामी, जयपुर : प्रद्युम्नशर्मा ओझा ।

कृष्णयज्वा, (१९१५ई), **मीमांसापरिभाषा** , वाराणसी : विद्याविलासमुद्रणालयः ।

### सहायकपाठ्यसामग्र्यौ

संस्कारमयूखे निबद्धाः कातीयसूत्रानुसारिप्रयोगाः

आशौचपञ्जिकायां निबद्धः स्मृतिसङ्ग्रहः

### सन्दर्भग्रन्थौ

अधिकारी, राधाकृष्ण (अनु.), **धर्मशास्त्र** (राधाकृष्णाश्रमी-टीकासहिता), काठमाडौं : पाठ्यक्रम विकाश केन्द्र, त्रि.वि., कीर्तिपुर ।

भट्टः, कमलाकरः (२०६८), **निर्णयसिन्धुः**, अनु. वेणीमाधव ढकाल, काठमाडौंः विद्यार्थी पुस्तक भण्डार

# प्राचीनन्यायवैशेषिकम्

**पाठ्यांशनाम** - वैशेषिकसम्मतपदार्थाः पाश्चात्त्यदर्शनाभिमतपरमाणुवादश्च

**स्तरः**- शास्त्री

**पाठ्यांशसङ्केतः** - प्रा.न्या.४०१

**खण्डः**- द्वितीयः

**वार्षिकः पाठ्यभारः** - १६० घण्टाः

**पत्रम्**- तृतीयम्

**पूर्णाङ्काः** - १००

**साप्ताहिकः पाठ्यभारः** - ६

## १. पाठ्यांशपरिचयः

पाठ्यांशोऽयं प्राचीनन्यायविषयमधीयानानां छात्राणां कृते शास्त्रिद्वितीयवर्षस्य तृतीयपत्रत्वेन निर्धारितो वर्तते ।

अत्र पाठ्यांशे वैशेषिकदर्शनाभिमताः पदार्था द्रव्यगुणकर्मसामान्यविशेषसमवायाः पाठ्यत्वेन समाविष्टाः सन्ति । अथ च पाश्चात्त्यदर्शनाभिमतपरमाणुवादचिन्तनमपि पाठ्यत्वेन समाविष्टं वर्तते ।

पाठ्यांशश्चायं पञ्चसु प्रकरणेषु विभक्तो वर्तते । तत्र प्रथमप्रकरणे वैशेषिकदर्शनाभिमतपदार्थोद्देशः, तेषां साधर्म्यवैधर्म्ये, पृथिव्यादीनि द्रव्याणि, तत्र क्रमे सृष्टिसंहारप्रक्रिया चैतावन्तो विषया निर्धारिता वर्तन्ते । द्वितीये च प्रकरणे वैशेषिकदर्शनाभिमतगुणेषु आरम्भतः सङ्ख्यान्तगुणा निर्धारिताः सन्ति । तृतीये च प्रकरणे परिमाणतः शब्दान्तगुणा निर्धारिता इति । एवं रीत्या तुरीये प्रकरणे वैशेषिकदर्शनाभिमतकर्मसामान्यविशेषसमवायाः पाठ्यविषयत्वेन निर्धारिताः सन्ति । एवं रीत्या पञ्चमे च प्रकरणे पाश्चात्त्यदर्शनाभिमतपरमाणुवादस्य सङ्क्षिप्तेतिहासं समाविश्य केचन प्रमुखविषयाः सन्निविष्टाः सन्ति । अत्र तावत् सामान्यविशिष्टोद्देश्यप्रकरणविभागशिक्षणविधिमूल्याङ्कनविधिप्रश्नपत्रनिर्माणप्रक्रियापाठ्यग्रन्थसन्दर्भ-ग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि समाविष्टानि सन्तीति ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः सामान्यतयाधोनिर्दिष्टविषयेषु समर्था भविष्यन्ति -

- वैशेषिकदर्शनाभिमतपदार्थोद्देशे, तत्साधर्म्यवैधर्म्यवर्णने, द्रव्यपदार्थनिरूपणे च,
- वैशेषिकदर्शनाभिमतरूपाद्यपरत्वान्तगुणव्याख्याने,

- वैशेषिकदर्शनाभिमतबुद्धितः शब्दान्तगुणवर्णने,
- कर्मतः समवायान्तनिरूपणे,
- पाश्चात्त्यदर्शनाभिमतपरमाणुवादस्य सङ्क्षेपेण वर्णने च ।

**३. प्रकरणगतविशिष्टोद्देश्यानि अथ च पाठ्यविषयज्ञापनपूर्वकमङ्कानां पाठघण्टानाञ्च निर्देशनम्**

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| (क) | वैशेषिकदर्शनाभिमतपदार्थोद्देशे, द्रव्यादिपदार्थानां साधर्म्यवैधर्म्यनिरूपणे, सभेदपृथिव्यादिचतुष्टयद्रव्यव्याख्याने, सृष्टिसंहारप्रक्रियावर्णने कालाद्यवशिष्टद्रव्याणां विवेचने च सामर्थ्यसम्पादनम् । | वैशेषिकदर्शनाभिमतपदार्थोद्देशः, प्रशस्तपादभाष्ये प्रतिपादिते द्रव्यादिपदार्थानां साधर्म्यवैधर्म्ये, प्रशस्तपादभाष्ये प्रतिपादितद्रव्याणि च । | २० | ३२ |
| (ख) | वैशेषिकदर्शनाभिमतानामपरत्वान्त-गुणानां वर्णने, रूपादिस्पर्शान्तपाकजगुणोत्पत्तिवर्णने, द्वित्वादिसङ्ख्याद्युत्पत्तिव्याख्याने, सभेदपरिमाणपृथक्त्वसंयोगविभाग-परत्वापरत्वविवेचने च नैपुण्यसम्पादनम् । | प्रशस्तपादभाष्ये प्रतिपादिता रूपाद्यपरत्वान्तगुणाः । प्रशस्तपादभाष्ये प्रतिपादिता पाकजगुणोत्पत्तिप्रक्रिया, द्वित्वादिसङ्ख्योत्पत्तिप्रक्रिया च । | २० | ३२ |
| (ग) | वैशेषिकदर्शनाभिमतानां बुद्धितः शब्दान्तगुणानां निर्वचने, सभेदबुद्धिनिर्वचने, प्रत्यक्षानुमानप्रमाणविवेचने, | प्रशस्तपादभाष्ये प्रतिपादिताः परिमाणतः शब्दान्तगुणाः । प्रशस्तपादभाष्ये प्रतिपादितं | २५ | ४० |

| | | | | |
|---|---|---|---|---|
| | शब्दादीनामनुमानेऽन्तर्भावविश्लेषणे,<br>प्रतिज्ञाद्यवयवविवेचने,<br>सभेदहेत्वाभासवर्णने,<br>स्मृत्यार्षज्ञानवर्णने,<br>सुखादिशब्दान्तगुणनिर्वचने च सामर्थ्यार्जनम् । | बुद्धिप्रकरणम् ।<br>प्रत्यक्षानुमानप्रमाणे,<br>अवयवाः,<br>सुखादिशब्दान्तगुणाः । | | |
| (घ) | वैशेषिकाभिमतानां कर्मतः समवायान्तपदार्थानां व्याख्याने,<br>सभेदकर्मवर्णने,<br>सभेदसामान्यविवेचने,<br>विशेषसमवायव्याख्याने च सामर्थ्यार्जनम् । | प्रशस्तपादभाष्ये प्रतिपादिताः कर्मतः समवायान्तपदार्थाः । | २० | ३२ |
| (ङ) | पाश्चात्यपरमाणुवादिदर्शनस्य सङ्क्षिप्तेतिहासवर्णने,<br>एम्पोडिक्लीज-एनेक्सागोरस-ल्युपिसस-डेमोक्रिटसानां परिचयदानपूर्वकं सङ्क्षेपतस्तेषां दार्शनिकदृष्टिविषयकपरिचयदाने च सामान्यसामार्थ्यसम्पादनम् । | पाश्चात्यपरमाणुवादिदर्शनस्य सङ्क्षिप्तेतिहासः ( इलियाटिकसम्प्रदायः, पाश्चात्यबहुतत्त्ववादिदर्शनम्, ल्युपिसस-डेमोक्रिटसौ, तयोः दार्शनिकं चिन्तनम्, एपिक्युरसः, तच्चिन्तनम् । | १५ | २४ |
| | | | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

### 'क'प्रकरणे

सम्बन्धचतुष्टयप्रदर्शनम्, पदार्थोद्देशः, पदार्थानां साधर्म्यवैधर्म्यनिरूपणम्, पृथिवी, पृथिव्या गुणनिदर्शनम्, पृथिव्या भेदप्रदर्शनम्- कार्यभेदः, शरीरभेदः, पार्थिवेन्द्रियम्, जलनिरूपणम्, जलस्य गुणनिरूपणम्, जलस्य भेदः- कार्यभेदः, शरीरभेदः, इन्द्रियम्, तेजोनिरूपणम्, तेजसो गुणनिरूपणम्, तेजसो भेदः- कार्यभेदः, शरीरभेदः, इन्द्रियम्, वायुविवेचनम्, वायोः गुणनिरूपणम्, वायोर्भेदः- कार्यभेदः, शरीरभेदः, इन्द्रियम्, सृष्टिसंहारप्रक्रियानिरूपणम्, आकाशस्याधिगमे शब्दस्य लिङ्गत्वप्रसाधनम्, श्रोत्रेन्द्रियत्वविवेचनम्, कालविवेचनम्, एकत्वसिद्धिपूर्वकं दिशो विवेचनम्, एकत्वेऽपि भक्त्या दिशो दशत्वप्रतिपादनम्, देहाद्यतिरिक्तात्मसिद्धिः, सुखदुःखादीनां करणत्वसिद्धिपूर्वकं मनोनिरूपणम् ।

### 'ख'प्रकरणे

गुणानां साधर्म्यम्, मूर्त्तामूर्त्तादिरूपेण गुणानां भेदः, रूपरसगन्धस्पर्शाः, तेषां पाकजत्वम्, क्षणगणनापुरस्सरं पार्थिवपरमाणौ रूपरसगन्धस्पर्शानां पाकजत्वोत्पत्तिप्रक्रिया, उत्पत्तिविनाशप्रक्रियाविवेचनपूर्वकम् सङ्ख्याविवेचनम् ।

### 'ग'प्रकरणे

परिमाणपृथक्त्वयोः सभेदवर्णनम्, तयोरुत्पत्तिविनाशप्रक्रियाविवेचनम्, संयोगविभागयोः सभेदवर्णनम्, तयोरुत्पत्तिविनाशप्रक्रियाविवेचनम्, सभेदं परत्वापरत्वयोः विवेचनम्, सभेदा बुद्धिः, सभेदसंशय-विपर्यय-अनध्यवसाय-स्वप्ननिरूपणम्, स्वप्नस्वप्नान्तिकयोर्भेदोपपादनपूर्वकम् अविद्यायाश्चातुर्विध्यप्रतिपादनम्, प्रत्यक्षम्, द्रव्याणां गुणानाञ्चोपलब्धिप्रक्रियावर्णनम्, युक्तवियुक्तयोगिनां प्रत्यक्षप्रक्रियाविवेचनम्, अनुमानम्, लिङ्गोपपादनम्, अनुमानप्रक्रियावर्णनम्, अनुमानभेदवर्णनम्, शब्दादीनामनुमानेऽन्तर्भावः, प्रतिज्ञाद्यवयवाः, अपदेशः, हेत्वाभासः, निदर्शनम्, निदर्शनाभासः, अनुसन्धानम्, प्रत्याम्नायः, निर्णयस्य मानान्तरत्वखण्डनम्, स्मृतिः, आर्षज्ञानम्, सिद्धदर्शनम्, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, गुरुत्वम्, द्रवत्वम्, स्नेहः, संस्कारः, धर्मः, अधर्मः, संसारापवर्गौ, शब्दः ।

### 'घ'प्रकरणे

कर्म (उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि), सत्प्रत्ययकर्म, असत्प्रत्ययकर्म, सभेदसामान्यविवेचनम्, विशेषस्यापरिहार्यत्वप्रदर्शनपूर्वकं तद्विवेचनम्, विशेषे

अनवस्थानिराकरणम्, समवायः, समवायसंयोगयोर्भेदप्रतिपादनम्, समवायस्यार्थान्तरत्वप्रतिपादनम्, तस्यैकत्वप्रतिपादनम्, समवायस्य नित्यत्वप्रतिपादनम् ।

**'ङ'प्रकरणे**

पाश्चात्त्यदर्शनाभिमतपरमाणुवादचिन्तनम् । पाश्चात्त्यपरमाणुवादिदर्शनस्य सङ्क्षिप्तेतिहासः (इलियाटिकसम्प्रदायः, पाश्चात्त्यबहुतत्त्ववादिदर्शनम्, एपिक्युरियनधारा, स्टोइकधारा), एम्पोडिक्लीजः तस्य चिन्तनम्, एनेक्सागोरसः तस्य चिन्तनम्, ल्युपिसस-डेमोक्रिटसौ तयोश्चिन्तनम्, एपिक्युरसः तस्य चिन्तनम् ।

## ५. शिक्षणविधिः शैक्षणिकसामग्री च

पाठ्यांशस्यास्य शिक्षणे व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणादयो विधयः प्रकरणानुसारेण प्रतिपाद्यविषयानुरूपेण चात्र प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुत्प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषयानुरूपाणां प्रयोगोऽपेक्षितः । अत्यावश्यके स्थितिविशेषे अन्तर्जालादिमाध्यमेन दूरशिक्षणमपि कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्रादीनि प्रयुज्यानि । तद्व्यवस्थापनं सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेयम् । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थापि कार्या । यथाकालं शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तद्व्यवस्थापनं विभागेन कार्यम् । तदर्थं विद्यापीठेन विश्वविद्यालयेन वा साहाय्यं विधेयम् ।

## ६. मूल्याङ्कनविधिः

आन्तरिक(निर्माणात्मक)बाह्य(निर्णयात्मक)भेदेन मूल्याङ्कनं द्विधा विभज्यते । आन्तरिकमूल्याङ्कनं मूलतः कक्षागतमेव भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायामान्तरिकमूल्याङ्कनं विधेयम् । गृहकार्य-कक्षापरीक्षापरियोजनाकार्यादीन्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुमर्हन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालयपरीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । बाह्यपरीक्षा लेखात्मिकैव भवति । वार्षिकपरीक्षायाः कृते सति सम्भवे

विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानां कृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया । तदर्थमधोनिर्दिष्टप्रकारेण प्रश्नपत्रनिर्माणं विधेयम्-

**वार्षिकपरीक्षार्थं प्रश्नपत्रनिर्माणप्रकारविवरणम्**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| क, ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| क, ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ | वस्तुगताः ( बहुवैकल्पिकाः) | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यसामग्रीसूची

**(क) पाठ्यग्रन्थः**

**प्रशस्तपादभाष्यम्**

**(ख) सहायकग्रन्थाः**


केदारनाथः त्रिपाठी — प्राचीनार्वाचीनपरमाणुविचाराणां पर्य्यालोचनम्, **सारस्वत सुषमा** १६ : १-२ (वि.स.२०१८), वाराणसी : वाराणसेय संस्कृत विश्वविद्यालय, पृ. ८१२५-१३४) ।

केशवशरणोऽर्यालः, — पौरस्त्यपाश्चात्त्यदर्शनपथेन परमाणुवादविचारः, **शोध**, वर्ष -१,

अङ्क १, पृ.५३-५८, काठमाडौं : नेपाल संस्कृत विश्वविद्यालय प्राध्यापक संघ, वि.सं.२०६९ ।

... **पौरस्त्यपाश्चात्त्यपरमाणुवादिदर्शनाभिमतसृष्टिविषयकं समीक्षणम्** अप्रकाशित शोधप्रबन्ध, विश्वविद्यालय अनुदान आयोग, भक्तपुर, वि.सं. २०६९ ।

प्रशस्तपादाचार्यः, सम्पादक **प्रशस्तपादभाष्यम्** (श्रीधराचार्यकृततन्याय-कन्दलीयुतम्), हिन्दीव्याख्याकार - श्रीदुर्गानन्द झा, द्वितीय संस्करण, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, सन् १९९७ ।

... **प्रशस्तपादभाष्य** (नेपाली अनुवाद तथा तात्पर्यचन्द्रिका व्याख्यासमेत), अनुवादक तथा व्याख्याता केशवशरण अर्याल, नेपाल प्रज्ञा–प्रतिष्ठान, कमलादी, काठमाडौं, वि.सं.२०७८ ।

सी.एल., त्रिपाठी 'बहुतत्त्ववादी दार्शनिक', **पाश्चात्त्य दर्शन का इतिहास,** द्वितीयावृत्ति, सम्पादक- दयाकृष्ण, राजस्थान हिन्दी अकादमी, जयपुर, सन् १९८८ ।

... 'परमाणुवादी दर्शन', **पाश्चात्त्य दर्शन का इतिहास,** द्वितीयावृत्ति, सम्पादक- दयाकृष्ण, राजस्थान हिन्दी अकादमी, जयपुर, सन् १९८८ ।

**(ग) सन्दर्भग्रन्थाः**

अन्नम्भट्टः, **तर्कसङ्ग्रहः,** दीपिकाकिरणावलीन्यायबोधिनीपदकृत्यटिप्पण्यादिसहितः, चौखम्भा विद्याभवन, वाराणसी, सन् २००३ ।

आनन्द झा, **पदार्थशास्त्र**, हिन्दी समिति सूचना विभाग, लखनऊ, सन् १९६५ ।

... **न्यायसूत्र र वैशेषिकसूत्रको तुलनात्मक पर्यालोचन**, नेपाल प्रज्ञा प्रतिष्ठान कमलादी, काठमाडौँ, वि.सं.२०७५ ।

... **वैशेषिक सूत्रको विवेचनात्मक व्याख्या**, नेपाल प्रज्ञा प्रतिष्ठान कमलादी, काठमाडौँ, वि.सं.२०७८ ।

चन्द्रधर शर्मा, **भारतीय दर्शन : आलोचना और अनुशीलन,** पुनर्मुद्रण, मोतीलाल वनारसीदास, दिल्ली, सन् १९९८ ।

... **पाश्चात्त्य दर्शन,** पुनर्मुद्रण संस्करण, मोतीलाल बनारसीदास, दिल्ली, सन् २००३ ।

जगदीशभट्टाचार्यः, **तर्कामृतम्,** नेपालीभाषानुवादविशेषटिप्पणीसहितम्, अनुवादक, टिप्पणीकर्ता जगत्प्रसाद उपाध्याय, विष्णुप्रभा उपाध्याय, काठमाडौँ, वि.सं. २०६७ ।

जगदीश सहाय श्रीवास्तव, **ग्रीक एवं मध्ययुगीन दर्शन का वैज्ञानिक इतिहास,** पञ्चम संस्करण, किताब महल, इलाहाबाद, सन् २००० ।

नरेशप्रसाद तिवारी, **ग्रीक एवम् मध्ययुगीन दर्शन एक अवलोकन**, मोतीलाल बनारसी दास, दिल्ली, १९९६ ।

नारायण मिश्र, **वैशेषिकदर्शन : एक अध्ययन**, चौखम्बा विद्याभवन, वाराणसी, सन् १९६८ ।

पद्मप्रसाद भट्टराई, **पौरस्त्य दर्शन : एक चिनारी,** विद्यार्थी पुस्तक भण्डार, काठमाडौँ, वि.सं.२०७४ ।

भट्टाचार्य, शिवजीवन
र कार्ल एच्. पोटर **इन्साइक्लोपिडिया अफ इन्डियन फिलोसोफीज्** (भाग - १३), दिल्ली : मोतीलाल बनारसीदास, सन् २०११ ।

या. मसीह, **पाश्चात्त्य दर्शन का समीक्षात्मक इतिहास,** पाँचौ संस्करण, मोतीलाल बनारसीदास, दिल्ली, सन् १९९४ ।

विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली**, किरणावलीव्याख्यासहिता, पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान, वाराणसी, वि.सं.२०५२ ।

व्योमशिवाचार्यः **व्योमवती** (प्रथमो भागः), सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, सन् १९८३ ।

... **व्योमवती** (द्वितीयो भागः), सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, सन् १९८४ ।

# प्राचीनन्यायवैशेषिकम्

**पाठ्यांशनाम**- न्यायदर्शनाभिमतपदार्थाः पाश्चात्त्यतर्कशास्त्रञ्च

**पाठ्यांशसङ्केतः**- प्रा.न्या.४०२

**स्तरः**- शास्त्री

**वार्षिकः पाठ्यभारः**- १६० घण्टाः

**खण्डः**- द्वितीयः

**पूर्णाङ्काः**- १००

**पत्रम्**- चतुर्थम्

**साप्ताहिकः पाठ्यभारः**- ६

## १. पाठ्यांशपरिचयः

पाठ्यांशोऽयं प्राचीनन्यायविषयमधीयानानां छात्राणां कृते शास्त्रिद्वितीयवर्षस्य चतुर्थपत्रत्वेन निर्धारितो वर्तते ।

अत्र पाठ्यांशे न्यायदर्शनाभिमताः प्रमाणप्रमेयादयः पदार्थाः पाठ्यत्वेन समाविष्टाः सन्ति । अथ च पाश्चात्त्यतर्कपद्धतिरपि पाठ्यत्वेन सन्निविष्टा वर्तते ।

पाठ्यांशश्चाऽयं पञ्चसु प्रकरणेषु विभक्तो वर्तते । तत्र प्रथमप्रकरणे न्यायभाष्यस्यादिवाक्यस्योत्थानबीजम्, संशयादीनां पृथगुद्देशसार्थक्यम्, चत्वारि प्रमाणानीत्येतावन्तो विषयाः सन्निविष्टाः सन्ति । द्वितीये च प्रकरणे न्यायदर्शनाभिमतमात्मादिकं प्रमेयं निर्धारितं वर्तते । प्रकरणे च तृतीये न्यायदर्शनाभिमतसंशयादिनिर्णयान्तपदार्था निर्धारिता इति । एवं रीत्या तुरीये प्रकरणे न्यायदर्शनाभिमतवादादिनिग्रहस्थानान्तपदार्थाः पाठ्यविषयत्वेन निर्धारिताः सन्ति । एवं रीत्या पञ्चमे च प्रकरणे पाश्चात्त्यतर्कपद्धतेः सङ्क्षिप्तेतिहासं समाविश्य केचन प्रमुखविषयाः सन्निविष्टाः सन्ति । तत्क्रमे पाश्चात्त्यतर्कशास्त्रपद्धतौ अरस्तुमहोदयस्य चिन्तनम्, तस्य योगदानम्, तर्कपद्धतौ वादत्रयम्, प्रमाणमित्यादयो विषया विन्यस्ता वर्तन्ते । अत्र तावत् सामान्यविशिष्टोद्देश्यप्रकरणविभागशिक्षणविधिमूल्याङ्कनविधिप्रश्नपत्रनिर्माणप्रक्रियापाठ्यग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि समाविष्टानि सन्तीति ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः सामान्यतयाऽधोनिर्दिष्टविषयेषु समर्था भविष्यन्ति-

- न्यायभाष्यस्यादिवाक्यस्योत्थानबीजप्रतिपादने, संशयादीनां पृथगुद्देशसार्थक्यवर्णने, चतुर्णां प्रमाणानां निरूपणे च,

- न्यायदर्शनाभिमतात्मादिप्रमेयव्याख्याने,
- न्यायदर्शनाभिमतसंशयादिनिर्णयान्तपदार्थानां वर्णने,
- न्यायदर्शनाभिमतवादादिनिग्रहस्थानान्तपदार्थानां निरूपणे,
- पाश्चात्त्यतर्कपद्धतेः सङ्क्षेपेण वर्णने च ।

**३. प्रकरणगतविशिष्टोद्देश्यानि अथ च पाठ्यविषयज्ञापनपूर्वकमङ्कानां पाठघण्टानाञ्च निर्देशनम्**

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठ-घण्टाः |
|---|---|---|---|---|
| (क) | न्यायभाष्यस्यादिवाक्योत्थानबीजप्रति-पादने, संशयादीनां पृथगुद्देशबीजनिरूपणे, प्रत्यक्षादीनां चतुर्णां प्रमाणानां व्याख्याने च सामर्थ्यसम्पादनम् । | न्यायभाष्यस्यादिवाक्यम्, संशयादीनां पृथगुद्देशबीजम्, न्यायसूत्रभाष्यस्य प्रथमाध्याये प्रतिपादितानि प्रत्यक्षादीनि चत्वारि प्रमाणानि । | २० | ३२ |
| (ख) | न्यायदर्शनानुसारेण इच्छादिभिरात्मनः सिद्धौ, शरीरेन्द्रियलक्षणव्याख्याने, अर्थबुद्धिमनसां लक्षणवर्णने, प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाव-वेचने च नैपुण्यार्जनम् । | न्यायसूत्रभाष्यस्य प्रथमाध्याये प्रतिपादितमात्मादिकं प्रमेयम् । | २० | ३२ |
| (ग) | न्यायदर्शनाभिमतसंशयादि-वितण्डान्तपदार्थानां निर्वचने, सकारणसंशयस्य निर्वचने, प्रयोजनविश्लेषणे, सभेदसिद्धान्तव्याख्याने, | न्यायसूत्रभाष्यस्य प्रथमाध्याये प्रतिपादिताः संशयादिनिर्णयान्ताः पदार्थाः । | २५ | ४० |

| | | | | |
|---|---|---|---|---|
| | सभेदावयवविश्लेषणे, तर्कनिर्णययोर्निर्वचने च नैपुण्यसम्पादनम् । | | | |
| (घ) | परस्परं भेदपुरस्सरं वादजल्पवितण्डानां विवेचने, सभेदोपभेदहेत्वाभासनिरूपणे, जातिनिग्रहस्थानयोर्विश्लेषणे च सामर्थ्यार्जनम् । | न्यायसूत्रभाष्यस्य प्रथमाध्याये प्रतिपादिता वादादिनिग्रहस्थानान्ता : पदार्थाः । | २० | ३२ |
| (ङ) | पाश्चात्त्यतर्कशास्त्रस्य सङ्क्षिप्तेहासवर्णने, तर्कशास्त्रपद्धतौ अरस्तुमहोदयस्य चिन्तनव्याख्याने, तर्कपद्धतौ वादत्रयस्य विश्लेषणे, प्रमाणविषयकसङ्क्षिप्तविवेचने, अनुमानविधिविषयके व्याख्याने ( तत्र आगमनविधौ व्याप्तिविधौ च), न्यायवाक्यस्य विश्लेषणे, तर्कशास्त्रविषये लकमहोदयस्य चिन्तने, लक्षणसम्बद्धधर्मत्रयस्य व्याख्याने च सामर्थ्यार्जनम् । | पाश्चात्त्यतर्कपद्धतेः सङ्क्षिप्तेहासः । तत्रारस्तोश्चिन्तनम्, योगदानञ्च । वादत्रयम् । प्रत्यक्षादिप्रमाणत्रयम् । अनुमानविधिविषयः । न्यायवाक्यानि, लकमहोदयस्य चिन्तनम्, लक्षणसम्बद्धधर्माः । | १५ | २४ |
| | | | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

### 'क'प्रकरणे

न्यायभाष्यस्यादिवाक्यस्योत्थानबीजानुसन्धानम्, प्रमाणादीनामुद्देशः, संशयादीनां पृथग्वचनसार्थक्यप्रतिपादनम्, न्यायप्रवृत्तिस्थानप्रदर्शनम्, न्यायन्यायाभासभेदप्रदर्शनम्, वादजल्पवितण्डानां सप्रयोजननिष्प्रयोजनत्वनिर्धारणम्, दृष्टान्तसिद्धान्तावयवानां भाष्यरीत्या विवेचनम्, तर्कस्य प्रमाणानुग्राहकत्वप्रदर्शनम्,

निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां भाष्यरीत्या सङ्क्षिप्तविवेचनम् । प्रत्यक्षलक्षणम्, तत्र अव्यपदेश्य-अव्यभिचारि-व्यवसायात्मकपदानां प्रयोजननिरूपणम् । अनुमानलक्षणम्, तत्पूर्वकपदस्यार्थः, अनुमानत्रैविध्यम्, पूर्ववदित्यादीनामर्थद्वयम् । उपमानलक्षणम्, शब्दलक्षणम्, तद्द्वैविध्यनिरूपणम् ।

**'ख'प्रकरणे**

प्रमेयभेदाः, इच्छादिभिर्लिङ्गैरात्मानुमानप्रकारः, देहेन्द्रियबुद्धिव्यतिरिक्तात्मसिद्धिः, शरीरम्, इन्द्रियाणि, तेषां भौतिकत्वसाधनम्, अर्थाः, बुद्धिलक्षणम्, बुद्धेः पर्यायपदानामभिधानबीजम्, मनोलक्षणम्, प्रवृत्तिलक्षणम्, दोषलक्षणम्, प्रेत्यभावः, फललक्षणम्, दुःखम्, मोक्षे नित्यसुखाभिव्यक्तेर्निरासपूर्वमपवर्गनिरूपणम् ।

**'ग'प्रकरणे**

सभेदसंशयनिरूपणम्, प्रयोजनलक्षणम्, दृष्टान्तलक्षणम्, भेदपुरस्सरं सिद्धान्तनिर्वचनम्, प्रतिज्ञादयो न्यायावयवाः, प्रतिज्ञादीनां विवेचनम्, प्रतिज्ञाद्यवयवार्थकथनम्, तर्कलक्षणस्य पदसार्थक्यप्रदर्शनपूर्वकं तर्कलक्षणम्, निर्णयविवेचनम् ।

**'घ'प्रकरणे**

परस्परं भेदपुरस्सरं वादजल्पवितण्डानिर्वचनम्, सभेदोपभेदहेत्वाभासाः, सभेदं छलम्, जातिनिग्रहस्थाने ।

**'ङ'प्रकरणे**

पाश्चात्त्यतर्कपद्धतिः । पाश्चात्त्यतर्कशास्त्रस्य सङ्क्षिप्तेहासः । तर्कशास्त्रपद्धतौ अरस्तुमहोदयस्य चिन्तनम्, तस्य योगदानञ्च । तर्कपद्धतौ वादत्रयम् । प्रमाणम् (प्रत्यक्षम्, अनुमानम्, आप्तवचनम् (शब्दः) । अनुमानविधिविषयकं चिन्तनम् (आगमनविधिः व्याप्तिविधिश्च), । न्यायवाक्यानि, तर्कशास्त्रविषये लकमहोदयस्य चिन्तनम्, लक्षणसम्बद्धधर्मत्रयम् ।

**५. शिक्षणविधिः शैक्षणिकसामग्री च**

पाठ्यांशस्यास्य शिक्षणे व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणाद्यः विधयः प्रकरणानुसारेण प्रतिपाद्यविषयानुरूपेण चात्र प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुत्प्रेरणीयाः । समुचितानां विविधानां

श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषयानुरूपाणां प्रयोगोऽपेक्षितः । अत्यावश्यके स्थितिविशेषे अन्तर्जालादिमाध्यमेन दूरशिक्षणमपि कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्रादीनि प्रयुज्यानि । तद्व्यवस्थापनं सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेयम् । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थापि कार्या । यथाकालं शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तद्व्यवस्थापनं विभागेन कार्यम् । तदर्थं विद्यापीठेन विश्वविद्यालयेन वा साहाय्यं विधेयम् ।

## ६. मूल्याङ्कनविधिः

आन्तरिक(निर्माणात्मक)बाह्य(निर्णयात्मक)भेदेन मूल्याङ्कनं द्विधा विभज्यते । आन्तरिकमूल्याङ्कनं मूलतः कक्षागतमेव भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायामान्तरिकमूल्याङ्कनं विधेयम् । गृहकार्य-कक्षापरीक्षापरियोजनाकार्यादीन्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुमर्हन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालयपरीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । बाह्यपरीक्षा लेखात्मिकैव भवति । वार्षिकपरीक्षायाः कृते सति सम्भवे विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानां कृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया । तदर्थमधोनिर्दिष्टप्रकारेण प्रश्नपत्रनिर्माणं विधेयम्-

### वार्षिकपरीक्षार्थं प्रश्नपत्रनिर्माणप्रकारविवरणम्

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| क, ख,ग, घ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |

| | | | | | |
|---|---|---|---|---|---|
| क, ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ | वस्तुगताः ( बहुवैकल्पिकाः) | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यसामग्रीसूची

### (क) पाठ्यग्रन्थः

**न्यायभाष्यम्** (प्रथमाध्यायान्तम्)

### (ख) सहायकग्रन्थाः

जगदीश काश्यप — **पाश्चात्त्य तर्क-शास्त्र,** भारतीय ज्ञानपीठ, वनारस, सन् १९४७ ।

वात्स्यायनः — **न्यायभाष्यम्**, प्रथमाध्यायान्तम्, सुदर्शनाचार्यकृतप्रसन्नपदापरिभूषितम्, अभिनव संस्करण, बौद्धभारती, वाराणसी, सन् १९९८) ।

श्रीनिवासः बरखेडी — **पाश्चात्त्यं तर्क-शास्त्रम्**, नागपुर : कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, सन् २०२० ।

### (ग) सन्दर्भग्रन्थाः

अन्नम्भट्टः — **तर्कसङ्ग्रहः,** दीपिकाकिरणावलीन्यायबोधिनीपदकृत्यटिप्पण्यादिसहितः, चौखम्भा विद्याभवन वाराणसी, सन् २००३ ।

उदयनाचार्यः — **किरणावली**, सम्पादक - विन्ध्येश्वरीप्रसाद द्विवेदी, वनारस संस्कृत सिरिज, वाराणसी, सन् १९१९ ।

केशवशरण अर्याल, — **न्यायसूत्र र वैशेषिकसूत्रको तुलनात्मक पर्यालोचन**, नेपाल प्रज्ञा- प्रतिष्ठान कमलादी, काठमाडौं, वि.सं.२०७५ ।

चन्द्रधर शर्मा, **भारतीय दर्शन : आलोचना और अनुशीलन,** पुनर्मुद्रण, मोतीलाल वनारसीदास, दिल्ली, सन् १९९८ ।

… **पाश्चात्त्य दर्शन,** पुनर्मुद्रण संस्करण, मोतीलाल बनारसीदास, दिल्ली, सन् २००३ ।

भट्टराई पद्मप्रसाद (अनु.) **गौतमन्यायसूत्रम्,** (आह्निकद्वयले युक्त प्रथम अध्यायको भाष्यसमेत), जयतु संस्कृत, काठमाडौँ, वि.सं.२०६८ ।

भट्टाचार्य, शिवजीवन र कार्ल एच्. पोटर **इन्साइक्लोपिडिया अफ इन्डियन फिलोसोफीज्** (भाग - १३), दिल्ली : मोतीलाल बनारसीदास, सन् २०११ ।

वरदराजाचार्यः तार्किकरक्षा (न्यायसारसङ्ग्रहाभिधव्याख्यासहिता मल्लिनाथसूरिविरचितनिष्कण्टकव्याख्यानुगता च), सम्पादकः - विन्ध्येश्वरीप्रसादद्विवेदी, ...?, सन् १९०३ ।

विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली**, किरणावलीव्याख्यासहिता, पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान वाराणसी, वि.सं.२०५२ ।

# नव्यन्यायः

**पाठ्यांशनाम –व्याप्तिसिद्धान्तलक्षणस्वरूपम्** **पाठ्यांशसङ्केतः**– न.न्या. ४०१

**स्तरः –** शास्त्री **पूर्णाङ्काः** – १००

**वर्षः** – द्वितीयः **वार्षिकः पाठ्यभारः** - १६०

**पत्रम्–** तृतीयम् **साप्ताहिकः पाठ्यभारः** – ६

## १. पाठ्यांशपरिचयः–

नेपालसंस्कृतविश्वविद्यालयीयविद्यापीठेषु नव्यन्यायविषयमवलम्ब्य शास्त्रिद्वितीयवर्षेऽधिजिगमिषूणां छात्राणां कृते तृतीयपत्रत्वेन निर्धारितोऽयं पाठ्यक्रमः **व्याप्तिसिद्धान्तलक्षणस्वरूप**व्युत्पादनपरको वर्तते । तत्र दार्शनिकाः स्वमतसिद्धवस्तुप्रतिपादनाय प्रमाणानि स्वीकुर्वन्ति । प्रमाणेष्वप्यनुमानस्य प्राधान्यमङ्गीकुर्वन्ति नैयायिकाः, अत एवास्य दर्शनस्यान्वीक्षिकीति नामान्तरम् । तत्रानुमानप्रमाणन्तावल्लिङ्गपरामर्शरूपम्, परामर्शश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानात्मकः । अतः परामर्शात्मकानुमानप्रमाणस्य व्याप्तिज्ञानाधीनत्वेन व्याप्तेः स्वरूपनिर्वचनमत्यावश्यकमिति धिया नव्यन्यायप्रणेत्रा गङ्गेशोपाध्यायेन प्रमाणचतुष्टयनिरूपणप्रसङ्गे स्वकीयतत्त्वचिन्तामणौ पूर्वं व्याप्तेः पूर्वपक्षस्वरूपं प्रतिपाद्य तदनु व्याप्तेः सिद्धान्तस्वरूपं प्रतिपादितं वर्तते । अतोऽत्र पाठ्यक्रमे व्याप्तेः सिद्धान्तस्वरूपबोधनाय तत्त्वचिन्तामणिकारप्रतिपादितसिद्धान्तलक्षणस्य दीधितिकाररघुनाथशिरोमणिरचितायां दीधितिव्याख्यायाम्, दीधितिव्याख्याया अप्युपव्याख्यायां जगदीशभट्टाचार्यकृज्जागदीश्यामागतास्तथैव विशेषतः सिद्धान्तलक्षणप्रतिपादकग्रन्थे प्रयुक्ताः पारिभाषिकशब्दाश्चात्र पाठ्यक्रमे पाठ्यविषयत्वेन सन्निविष्टाः सन्ति ।

पाठ्यक्रमेऽस्मिन् नव्यन्यायदर्शने प्रयुक्ताया भाषाशैल्यास्तत्परिष्कारप्रणाल्याश्चावबोधाय नव्यन्यायदर्शनसम्बद्धाः केचन व्युत्पत्तिसम्पादका विशेषतो दीधितिग्रन्थे तद्व्याख्यानभूते जागदीशीसिद्धान्तलक्षणग्रन्थे च प्रयुक्ताः पारिभाषिकशब्दाः पाठ्यक्रमेऽस्मिन् कप्रकरणान्तर्गततया सन्निविष्टाः सन्ति । खप्रकरणे तत्त्वचिन्तामणिकृन्मूलसिद्धान्तलक्षणादारभ्य दण्ड्यादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमित्यस्य प्रकरणस्यासमाप्तिं दीधितौ जागदीश्याञ्चागता विषयाः समाविष्टाः सन्ति । गप्रकरणे सिद्धान्तलक्षणघटकप्रथमयत्पदस्य यद्धर्मावच्छिन्नार्थपरतयेति व्याख्यानादारभ्य जागदीश्यां वस्तुतो व्याप्यवृत्तित्वमत्र साध्यतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तद्वृत्त्यभावस्य तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाभावरूपं

ग्रन्थकृतोऽभिप्रेतमित्यन्तप्रकरणेष्वागता विषयाः पाठ्यांशतया समाविष्टाः सन्ति । घप्रकरणे जागदीश्यां दीधितौ च प्रतियोग्यसामानाधिकरण्यञ्चेत्यारभ्य आसमाप्त्यत्यन्तपदप्रयोजनान्तेषु भागेष्वागता विषयाः समाविष्टाः सन्ति । ङप्रकरणे दीधितेर्ज्ञानवान् द्रव्यत्वादित्यारभ्य सिद्धान्तलक्षणदीधितेर्जागदीश्याश्चासमाप्तिं यावद् भागेष्वागता विषयाः सन्निविष्टाः सन्ति । एवञ्चात्र सामान्य–विशिष्टोद्देश्य–प्रकरणविभाग–शिक्षणविधि–मूल्याङ्कनविधि –प्रश्नपत्रनिर्माणप्रक्रिया –पाठ्यग्रन्थ–सन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि च समाविष्टानि सन्ति ।

## २. पाठ्यांशसामान्योद्देश्यम् –

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधो निर्दिष्टविषयेषु व्युत्पन्ना भविष्यन्ति–

- सिद्धान्तलक्षणपरिष्कारप्रसङ्गे प्रयुक्तानां पारिभाषिकपदानां वाक्येषु प्रयोगे,
- व्याप्तेः सिद्धान्तलक्षणस्वरूपप्रदर्शने,
- व्याप्तेः सिद्धान्तलक्षणघटकानां पदानामर्थावधारणे तत्तत्पदानां सार्थक्योपपादने,
- व्याप्तेः सिद्धान्तलक्षणस्य परिष्कारप्रसङ्गे पूर्वपक्षिभिरुपस्थापितदोषोपस्थापने युक्त्युपस्थापने,
- सिद्धान्तव्याप्तिपरिष्कारप्रसङ्गे पूर्वपक्षमतखण्डनप्रसङ्गे सिद्धान्तिभिः प्रस्तुतानां युक्तीनामुपस्थापने,
- सम्बन्धधर्मिक-प्रतियोगिताधर्मिकोभयाभावघटितसिद्धान्तलक्षणस्वरूपोद्घाटने तत्तल्लक्षणघटकपदानां प्रयोजनप्रदर्शने च ।

## ३. प्रकरणगतविशिष्टोद्देश्यं पाठ्यविषयसंयोजनञ्च

| प्रकरणम् | प्रकरणगतविशिष्टोद्देश्यम् | पाठ्यविषयाः | अङ्काः | पाठ घण्टाः |
|---|---|---|---|---|
| क. | पाठ्यग्रन्थे निर्दिष्टप्रकरणेषु प्रयुक्तानां व्युत्पत्तिसम्पदकानां पारिभाषिकपदानां सोदाहरणमर्थस्फुटीकरणं तेषां पदानां प्रयोगप्रदर्शने च सामर्थ्यसम्पादनम् | जागदीशीसिद्धान्तलक्षणग्रन्थगतानां निर्दिष्टपारिभाषिकशब्दानामर्थपरिचयस्तेषां सोदाहरणं प्रयोगविधिश्च | १५ | २४ |
| ख. | चिन्तामणिकारोक्तसिद्धान्तलक्षणस | तत्त्वचिन्तामणिकारोक्तमू | १५ | २४ |

| | | | | |
|---|---|---|---|---|
| | वरूपप्रदर्शने, चिन्तामण्युक्तसिद्धान्तलक्षणे 'वह्निमान् धूमाद्' इत्यत्र चालनीयन्यायेन अभावमादाय अव्याप्तिप्रदर्शनेन सह तद्वारणोपायप्रदर्शने, अनवच्छेदकत्वघटितलक्षणोपस्थापने,<br>महानसीयवह्न्यभावादाय अव्याप्तिवारणायोपायप्रदर्शने दक्षत्वसम्पादनम् ।<br>विशिष्टसाध्यतावच्छेदकस्थलेऽव्याप्तिप्रदर्शने, तद्वारणाय विशिष्टसाध्यतावच्छेदककस्थलीय-निरवच्छिन्नसाध्यतावच्छेदककस्थलीययोर्लक्षणयोर्निरूपणे,<br>दण्ड्यादौ साध्ये ... इत्यत्र आदिपदप्रयोगस्यौचित्यप्रदर्शने,<br>प्रतियोगितावच्छेदकतानवच्छेदकत्वघटितलक्षणपरिष्कारे,<br>परम्परया दण्डत्वस्य साध्यतावच्छेदकत्वे दोषोद्भावने च सामर्थ्यसम्पादनम् ।<br>केचित्तु यत्तु अपरे तु नव्यास्त्विति ग्रन्थनिर्दिष्टानां मतानां परिशीलने सामर्थ्यसम्पादनञ्च । | लसिद्धान्तलक्षणादारभ्य दण्ड्यादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमित्यस्य प्रकरणस्यासमाप्तिं दीधितिसहितायां जागदीश्यामागता विषयाः । | | |
| ग. | मूले यत्समानाधिकरण इत्यत्र घटकीभूतयत्पदस्य यद्धर्मावच्छिन्नपरतया व्याख्यानस्य प्रयोजनप्रदर्शने,<br>'यद्यपि अवश्यक्लृप्तम्' इत्यादि | सिद्धान्तलक्षणघटकप्रथमयतपदस्य यद्धर्मावच्छिन्नार्थपरतया व्याख्यानादारभ्य जागदीश्या वस्तुतो व्याप्यवृत्तित्वमत्र | १५ | २४ |

| | | | | |
|---|---|---|---|---|
| | जागदीशीग्रन्थस्य तात्पर्यार्थ-प्रकाशने, सामानाधिकरण्यस्य व्याप्तित्वे दोषमुद्भाव्य तद्वारणोपाये दीधितिकृदुक्तयोः द्विविधव्याप्त्योः स्वरूपनिर्वचने,<br>अव्याप्यवृत्तिसाध्यकस्थले अव्याप्तिप्रदर्शनम् । तद्वारणाय प्रतियोग्यसमानाधि-करणमिति पदप्रवेशे युक्त्युपस्थापने, नव्यमतेन प्रतियोग्यसमानाधिकरणान्तपदस्य प्रयोजननिरूपणे, वृक्षे संयोगसामान्याभावप्रत्यक्षे बाधकोपस्थापने, द्रव्ये संयोगसामान्याभावसाधकानुमानो पस्थापने, संयोग-सामान्याभावसाधकविशेषानुमानो पस्थापने, द्रव्ये संयोगसामान्याभावसाधने, केचित्तुयत्त्वादीनां मतविवेचने,<br>प्रतियोग्यसमानाधिकरणेति पदानुपादाने नवीनमते आपतितदोषोद्भावने,<br>नोपादेयञ्चेति दीधितिग्रन्थस्याशयप्रदर्शने, व्याप्यवृत्तिसाध्यकस्थले प्रतियोग्यसमानाधिकरणेति पदानुपादाने सत्तावान् जातेरित्यादिस्थलेऽव्याप्तिं प्रदर्श्य तद्वारणाय वस्तुतो रीत्या व्याप्यवृत्तित्वपरिष्कारकरणे सामर्थ्यसम्पादनञ्च | साध्यतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तद्वृत्त्यभावस्य तादृशसम्बन्धावच्छिन्नप्रति योगित्वाभावरूपं ग्रन्थकृतोऽभिप्रेतमित्यन्तप्र करणेष्वागता विषयाः | | |
| घ. | प्रतियोग्यसमानाधिकरणस्यार्थनि रूपणे, जातिहेतुं परित्यज्य | सिद्धान्तलक्षणजागदीश्यां दीधितौ च | २५ | ४० |

| | | | | |
|---|---|---|---|---|
| | मूर्तत्वहेतौ अतिव्याप्तिकथने युक्त्युपस्थापने,<br>सार्वभौममतेन उभयत्वपदार्थविवेचने, मौलोक्तात्यन्तपदस्य प्रयोजनकथने,<br>अत्यन्ताभावनिवेशे कालो गोमान् गोत्वादित्यत्राति-व्याप्तिप्रदर्शने,<br>मिश्रमतानुसारेण संसर्गाभावप्रवेशे कालो द्व्यणुकवान् स्पन्दादित्यादावतिव्याप्तिकथने,<br>ध्वंसप्रागभावीयप्रतियोगिताया अवच्छेदकधर्मसम्बन्धनिरूपणे,<br>देशवृत्तितायां कालस्य कालवृत्तितायां देशस्य अवच्छेदकत्वकथने,<br>संसर्गाभावप्रवेशे प्रयोजनविरहोऽव्याप्तिश्चेति दीधितेरर्थप्रकाशने च सामर्थ्यसम्पादनम् । | प्रतियोग्यसामानाधिकरण्यञ्चेत्यारभ्य आसमाप्त्यत्यन्तपदप्रयोजनान्तेषु भागेष्वागता विषयाः | | |
| ङ. | ज्ञानवान् द्रव्यत्वादित्यादिस्थलेऽतिव्याप्तिप्रदाने, तद्वारणोपायप्रदर्शने च,<br>अधिकरणपदं विहाय सम्बन्धिपदनिवेशेन अव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्ति वारणोपायप्रदर्शने<br>प्रतियोग्यसमानाधिकिरणेति पदस्य प्रतियोगिसमानाधिकरण-भिन्नार्थपरत्वे दोषप्रदर्शने, | दीधितेर्ज्ञानवान् द्रव्यत्वादित्यारभ्य सिद्धान्तलक्षणदीधिते-र्जागदीश्याश्चासमाप्ति यावद् भागेष्वागता विषयाः | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | प्रतियोग्यसमानाधिकरणहेत्वधिक रणेत्यस्यार्थनिर्वचने,<br>हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे साध्यतावच्छेदक-सम्बन्धावच्छिन्नप्रतियोगिताकाभा वमादाय लक्षणसङ्गतिप्रदर्शने, साध्यतावच्छेदक-सम्बन्धेन प्रतियोग्यनधिकरणत्वप्रवेशे प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत वं न देयमिति प्रसङ्गनिरूपणे, लक्षणेऽत्राधिकरणस्थले सम्बन्धिपदं वृत्तिस्थले च सम्बद्धेति पदं निवेश्य लक्षणकरणे तादात्म्येन हेतुसाध्यकस्थले धर्मिणोऽपि धर्मव्याप्यत्वव्यापकत्वे सम्पादनीय इति प्रसङ्गनिरूपणे,<br>व्याप्यतावच्छेदकसम्बन्धेन पक्षे हेतुमत्ताज्ञानेन व्यापकतावच्छेदकसम्बन्धेन पक्षे साध्यस्यानुमितिर्भवतीति प्रसङ्गनिरूपणे,<br>वृत्त्यनियामकसम्बन्धेन साध्यत्वं सम्भवति न वेति संशये निर्णयप्रदाने,<br>कालिकसम्बन्धेन घटादेः साध्यकस्थले अव्याप्तिप्रदर्शने<br>तद्वारणाय पूर्वपक्षिणां मतोपस्थापने तत्र दोषप्रदर्शने च, सम्बन्धधर्मिकोभयाभावघटित-लक्षणप्रतिपादने, तल्लक्षणस्य समन्वयप्रदर्शने,<br>सम्बन्धधर्मिकोभयाभावघटितलक्ष | | | |

| | | | | |
|---|---|---|---|---|
| | णस्यासद्धेतौ अतिव्याप्तिनिवारणे,<br>स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे प्रतियोगिताधर्मिकोभयाभावघटित लक्षणमनुसृत्य महाकालत्वहेतावव्याप्तिनिरासप्रदर्शने<br>समवायस्यैकत्वे द्रव्यं जातेरित्यादौ कथमतिव्याप्तिवारणमिति सोहापोहनिरूपणे, प्रतियोगित्वादयः पदार्थाः किमात्मकाः ? लक्षणे प्रवेशनीया इति स्फुटीकरणे,<br>लक्षणेऽत्र अभावत्वं कीदृशं ग्राह्यम् ? इति सोदाहरणं प्रतिपादने च सामर्थ्यसम्पादनम् । | | | |
| | योगः | | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

### कप्रकरणम्

प्रतियोगित्वम्, अनुयोगित्वम्, प्रतियोगितावच्छेदकधर्मः, प्रतियोगितावच्छेदकसम्बन्धः, प्रतियोगितावच्छेदकतावच्छेदकधर्मसम्बन्धौ, हेतुतावच्छेदकधर्मसम्बन्धौ, उद्देश्यतावच्छेदकधर्मः, विधेयतावच्छेदकधर्मः, व्यापकतावच्छेदकत्वम्, सामानाधिकरण्यम्, वैयधिकरण्यम्, पर्याप्त्यधिकरणम्, चालनीयन्यायः, अस्वारस्यम्, व्याप्तेर्निरूपकतावच्छेदकत्वम्, व्याप्यवृत्तित्वम्, अव्याप्यवृत्तित्वम्, निरवच्छिन्नवृत्तिकत्वम्, सामान्याभावः, विशेषाभावः, उपाधिः, अप्रयोजकत्वम्, अव्यवहितपूर्ववर्त्तिजातीयता, व्यभिचारसम्बन्धः,

**भूतत्वम्,** मूर्तत्वम्, संसर्गाभावत्वम्, चक्रकः,प्रतियोग्यारोपः, एकार्थसमवायः, सम्बन्ध-धर्मिकत्वम्, प्रतियोगिताधर्मिकत्वमित्यादयः खगघङप्रकरणेष्वागताः पारिभाषिकशब्दाः ।

**खप्रकरणम्**

चिन्तामणिकारोक्तमूलसिद्धान्तलक्षणम्, तद्व्याख्यादीधितिः, जागदीश्यां चालनीयन्यायेनाभावमादायाव्याप्तिकथनम्, अनवच्छेदकत्वानुसरणघटितलक्षणम्, महानसीयवह्न्यभावमादाय अव्याप्तिप्रदर्शनम्, तद्वारणोपायः, मूलोक्ततत्पदस्य तद्धर्मावच्छिन्नपरत्वम्, विशिष्टसाध्यतावच्छेदककस्थलेऽव्याप्तिः, विशिष्टसाध्यतावच्छेदककस्थलीयनिरवच्छिन्न-साध्यतावच्छेदककस्थलीयं लक्षणद्वयम्, दण्ड्यादौ साध्ये ... इत्यत्रादिपदप्रयोगस्यौचित्यम्, प्रतियोगितावच्छेदकतानवच्छेदकत्वघटितलक्षणम्, परम्परया दण्डत्वस्य साध्यतावच्छेदकत्वव्यवस्थापनम्, केचित्तु यत्तु अपरे तु नव्यास्तु इति ग्रन्थप्रदर्शितानि मतानि ।

**गप्रकरणम्**

मूलोक्तप्रथमयत्पदं यद्धर्मावच्छिन्नपरम्, इदं द्रव्यमित्यत्र पक्षनिर्देशः, 'यद्यपि अवश्यक्लृप्तम्' इत्यस्या दीधितेस्तात्पर्यार्थः, द्विविधव्याप्ती, अव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्तिप्रदर्शनम्, नव्यमतेन प्रतियोग्यसमानाधिकरणान्तपदम्, वृक्षे संयोगसामान्याभाव-प्रत्यक्षे बाधकम्, द्रव्ये संयोगासामान्याभाव-साधकानुमानम्, संयोगसामान्याभावसाधक-विशेषानुमानम्, द्रव्ये संयोगसामान्याभाव-साधने केचित्तु-यत्त्वादीनां मतानि, प्रतियोग्यसमानाधिकरणेति पदानुपादाने नवीनमते दोषप्रदर्शनम्, नोपादेयञ्चेति दीधितिग्रन्थस्याशयः, सत्तावान् जातेरित्यत्राऽव्याप्तिप्रदर्शनम्, जगदीशमतेन वस्तुतो रीत्या दीधितिकारानुमतव्याप्यवृत्तित्वकथनम्

**घप्रकरणम्**

प्रतियोग्यसमानाधिकरणेत्यस्यार्थः, जातिहेतुं परित्यज्य मूर्तत्वहेतोरुपादानफलम्, सार्वभौममतेनोभयत्वपदार्थः, अत्यन्तपदस्य प्रयोजनम्, कालो गोमान् गोत्वादित्यत्रातिव्याप्तिः, संसर्गाभावप्रवेशेनातिव्याप्तिवारणम्, ध्वंसप्रागभावीयप्रतियोगिताया अवच्छेदकधर्मसम्बन्धाभावविषयिणी चर्चा, देशवृत्तितायां कालस्य, कालवृत्तितायाञ्च देशस्यावच्छेदकत्वम्, संसर्गाभावप्रवेशे प्रयोजनविरहोऽव्याप्तिश्चेति दीधितेराशयः ।

**ङप्रकरणम्**

ज्ञानवान् द्रव्यत्वाद् इत्यत्रातिव्याप्तिः, प्रतियोगितावच्छेदक-सम्बन्धेन प्रतियोगिनोऽधिकरणविवक्षणेनातिव्याप्तिवारणम्, अधिकरणपदं विहाय सम्बन्धिपदनिवेशनम्, प्रतियोग्यसमानाधिकरणेति पदस्य प्रतियोगिसमानाधिकरणभिन्नार्थपरकव्याख्यानम्, तत्र प्रतियोग्यसमानाधिकरणहेत्वधिकरणेत्यस्यार्थः, हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिता-काभावमादाय लक्षणसङ्गतिः, साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वप्रवेशः, व्याप्यतावच्छेदकसम्बन्धेन पक्षे हेतुमत्ताज्ञानेन व्यापकतावच्छेदकसम्बन्धेन पक्षे साध्यस्यानुमितिर्भवतीति प्रसङ्गः, वृत्त्यनियामकसम्बन्धेन साध्यत्वं सम्भवति न वेति विचारः, कालिकसम्बन्धेन घटादेः साध्यकस्थलेऽव्याप्तिः, पूर्वपक्षिणां मतोपस्थापनपूर्वकं तत्र दोषप्रदर्शनम्, सम्बन्धधर्मिको-भयाभावघटितलक्षणोपस्थापनम्, सम्बन्धर्मिकोभयाभावघटितलक्षणस्यासद्धेतौ अतिव्याप्तिः, तद्वारणञ्च, स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे प्रतियोगिताधर्मिकोभयाभावघटितलक्षणमनुसृत्य महाकालत्वहेतावव्याप्तिनिरासः, समवायस्यैकत्वे द्रव्यं जातेरित्यादौ कथमतिव्याप्तिवारणमिति सोहापोहविचारः, प्रतियागित्वादयः पदार्थाः किमात्मकाः ? लक्षणे प्रवेशनीया इत्यस्मिन् विषये विचारः, लक्षणेऽत्राभावत्वं कीदृशं ग्राह्यमिति विचारः ।

## ५. शिक्षणविधयः शैक्षिकसामग्री च

व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । अत्यावश्यके दशाविशेषे दूरशिक्षणमपि अन्तर्जालादिमाध्यमेन कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्राणि प्रयोज्यानि । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

## ५. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति– आन्तरं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरमूल्याङ्कनं प्रायेणकक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनया आन्तरमूल्याङकनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः सन्ति ।

बाह्यमूल्याङकनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालय- परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकाराः निर्धारिताः सन्ति । बाह्यपरीक्षा लेखात्मिकैव भवति । सति सम्भवे विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानां कृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिण्याः परिकल्पनाधो निर्दिष्टप्रकारेण विधेया ।

**वार्षिकप्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| कख,ग,घ,ङ | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| क,ख,ग,घ,ङ | अतिसंक्षिप्तोत्तरापेक्षिणः | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

**७. पाठ्यग्रन्थसूची**

क) **पाठ्यग्रन्थः–**

**१. जागदीशीदीधितिव्याख्योपेतं सिद्धान्तलक्षणम्**

**ख) सहायकग्रन्थाः**

**१. जागदीशीसिद्धान्तलक्षणम्** वामाचरणभट्टाचार्यकृतविवृत्तिव्याख्यासहितम्, जगदीशभट्टाचार्यः, वाणी विलास प्रकाशन, राजघाट वाराणसी, द्वितीयं संस्करणम्, संवत् २०४१

**२. सिद्धान्तलक्षणम्** रघुनाथशिरोमणिकृतया दीधित्या जगदीशतर्कालङ्कारकृतया जागदीश्या दिव्यानन्दकृतया लक्ष्मीटीकया दिव्याटिप्पण्या च समलङ्कृतम्, प्रकाशकः स्वामी दिव्यानन्दः, वारणसी, सन् १९७० ।

**३. माथुरीपञ्चलक्षण्या बदरीनाथशुक्लकृता भूमिका,** जयपुर,राजस्थान हिन्दी अकादमी,

संवत्,२०३९ ।

**सन्दर्भग्रन्थाः–**

**१.व्याप्तिपञ्चकम्,**नेपालीव्याख्या, केशवशरण अर्याल, नेपाल प्रज्ञाप्रतिष्ठान कमलादी काठमाडौं, संवत् २०७७ ।

**२. न्यायसिद्धान्तमुक्तावली** किरणावलीव्याख्यासहिता, विश्वनाथपञ्चाननभट्टाचार्यः, पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान वाराणसी, संवत् २०५२ ।

**३. अनुमान प्रमाण** बलिराम शुक्लविरचित,प्रकाशकः ईस्टर्न बुक लिङ्कर्स, दिल्ली, सन् १९८६ ।

**४. भारतीय दर्शन में अनुमान** व्रजनारायण शर्मा, प्रकाशक - मध्यप्रदेश हिन्दी ग्रन्थ अकादमी, भोपाल, सन् १९७३ ।

५. **आन्वीक्षिकी,** (न्यायदर्शनविभागीयपत्रिका न्यायविषयक गोष्ठी विशेषाङ्क वर्ष १ अङ्क १) सम्पा. शिवहरि मरहठ्ठा, वाल्मीकि विद्यापीठ न्याय विभाग, संवत् २०६७ ।

# नव्यन्यायः

**पाठ्यांशनाम** – अवच्छेदकत्वस्वरूपनिर्वचनम्

**पाठ्यांशसङ्केतः**–न.न्या. ४०२

**स्तरः** – शास्त्री

**पूर्णाङ्काः** – १००

**वर्षः** – द्वितीयः

**वार्षिकःपाठ्यभारः** - १६०

**पत्रम्**– चतुर्थम्

**साप्ताहिकः पाठ्यभारः** – ६

## १. पाठ्यांशपरिचयः–

नव्यन्यायविषयमवलम्ब्य शास्त्रिकक्षामधीयानानां छात्राणां कृते शास्त्रिद्वितीयवर्षस्य कृते ऐच्छिकचतुर्थपत्रत्वेन निर्धारितः पञ्चसु प्रकरणेषु विभक्तः पाठ्यक्रमोऽयम्**अवच्छेदकत्वस्वरूपनिर्वचन**परको वर्तते । नव्यन्यायदर्शनस्यानुमानप्रधानत्वेन दर्शनमिदमान्वीक्षिकीति नाम्ना प्रसिद्धम् । अनुमानप्रमाणस्य च व्याप्तिज्ञानाधीनत्वेन व्याप्तेः स्वरूपनिर्वचनमत्यावश्यकमिति धिया नव्यन्यायप्रणेत्रा गङ्गेशोपाध्यायेन स्वकीयतत्त्वचिन्तामणाववच्छेदकत्वघटितं व्याप्तेः सिद्धान्तस्वरूपं प्रतिपादितं वर्तते ।तल्लक्षणस्य ज्ञानं तद्घटकीभूतावच्छेदकत्वज्ञानमन्तरा न सम्भवतीत्यतो दीधितिकाररघुनाथशिरोमणिरचितायामवच्छेदकत्वनिरुक्तौ समागता विषयाः, विशेषतस्तस्मिन् ग्रन्थे प्रयुक्ताः पारिभाषिकशब्दाश्चात्र पाठ्यक्रमे पाठ्यविषयत्वेन सन्निविष्टाः सन्ति ।

तत्र नव्यन्यायदर्शने प्रयुक्ताया भाषाशैल्यास्तत्परिष्कारप्रणाल्याश्चावबोधाय नव्यन्यायसम्बद्धाः केचन व्युत्पत्तिसम्पादका विशेषतो रघुनाथशिरोमणिरचितायामवच्छेदकत्वनिरुक्तौ प्रयुक्ताः पारिभाषिकशब्दाः पाठ्यक्रमेऽस्मिन् कप्रकरणान्तर्गततया सन्निविष्टाः सन्ति । खप्रकरणे स्वरूपसम्बन्धरूपावच्छेदकत्वस्वीकारे दोषापादनम्,पूर्वपक्षाभिमतानतिरिक्तवृत्तित्वरूपावच्छेदकत्व–खण्डनम्, पर्याप्तिसम्बन्धविचारश्चेति विषया निर्धारिताः सन्ति । गप्रकरणे सिद्धान्ताभिमतं प्रथममवच्छेदकत्वस्वरूपं सपदकृत्यं सोहापोहं सन्निविष्टं वर्तते । घप्रकरणे द्वितीयं सिद्धान्ताभिमतमवच्छेदकत्वस्वरूपं सपदकृत्यं निविष्टं वर्तते । ङप्रकरणे च प्रतियोगिताधर्मिकोभयाभावघटितं व्याप्तिस्वरूपम्, गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वव्यवस्थापनम्, गुरुधर्मस्य प्रतियोगितावच्छेदकत्वस्वीकारेऽपि युक्त्युपस्थापनम्, तदनुसारेण व्याप्तिस्वरूपव्यवस्थापनमित्यादयो विषयाः सन्निविष्टाः सन्ति । एवञ्चात्र सामान्यविशिष्टोद्देश्यप्रकरणविभागशिक्षणविधिमूल्याङ्कनविधि-

प्रश्नपत्रनिर्माणप्रक्रियापाठ्य-ग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि च समाविष्टानि सन्तीति ।

## २. पाठ्यांशसामान्योद्देश्यम् –

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोनिर्दिष्टविषयेषु दाक्षिण्यमेष्यन्ति–

- नव्यन्यायशैल्या तत्सम्बद्धपारिभाषिकपदप्रयोगे
- गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे युक्तिप्रदर्शने
- स्वरूपसम्बन्धरूपावच्छेदकत्वस्वीकारे दोषाविष्करणे
- पर्याप्तिसम्बन्धसाधनाय सोदाहरणं युक्तिप्रदर्शने
- अवच्छेदकत्वसिद्धान्तस्वरूपोपपादने च

## ३. प्रकरणगतविशिष्टोद्देश्यं पाठ्यविषयसंयोजनञ्च

| प्रकरणम् | प्रकरणगत–विशिष्टोद्देश्यम् | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क. | पाठ्यग्रन्थे निदिष्टप्रकरणेषु प्रयुक्तानां व्युत्पत्तिसम्पदकानां पारिभाषिकपदानां सोदाहरणमर्थस्फुटीकरणं तेषां पदानां प्रयोगप्रदर्शने च दाक्षिण्यसम्पादनम् । | केषाञ्चन पारिभाषिकशब्दानामर्थपरिचय -स्तेषां सोदाहरणं प्रयोगविधिश्च। | १५ | २४ |
| ख. | स्वरूपसम्बन्धरूपावच्छेदकत्वस्वीकारे दोषापादनम्, स्वरूपसम्बन्धरूपावच्छेदकत्वस्वीकारे दोषोद्भावनक्रमे हेत्वन्तराभिधाने प्रयोजनकथनम्, पूर्वपक्षाभिमतानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्वीकारे दोषकथनम्, | अवच्छेदकत्वनिरुक्तिग्रन्थस्य जागदीशीसहितदीधितेरारम्भत आसमाप्ति प्रतियोगितावच्छेदकत्वाभाववदवृत्तित्वघटितलक्षणान्तभागान्तर्गता विषयाः । | २५ | ४० |

| | | | | |
|---|---|---|---|---|
| | पर्याप्तिसम्बन्धस्वीकारे युक्तिप्रदर्शनञ्च । | | | |
| ग. | सिद्धान्ताभिमतप्रथमावच्छेदकत्वस्वरूपोपपादनस्य प्रयोजनकथनम्, सिद्धान्ताभिमतप्रथमस्यावच्छेदकत्वस्य स्वरूपोपपादनम्, सिद्धान्ताभिमतप्रथमावच्छेदकत्वस्वरूपघटकपदानां प्रयोजनकथनम्, प्रथमलक्षणे पूर्वपक्षप्रदर्शितदोषवारणपुरस्सरं सोहापोहं निर्दुष्टप्रथमलक्षणोपसहरणञ्च । | अवच्छेदकत्वनिरुक्तिग्रन्थस्य जागदीशीसहितदीधितेर्वस्तुतस्तुतः– आसमाप्ति प्रथमलक्षणान्तर्गता विषयाः । | १५ | २४ |
| घ. | सिद्धान्ताभिमतद्वितीयाावच्छेदकत्वस्वरूपप्रयोजनकथनम्, सिद्धान्ताभिमतद्वितीयावच्छेदकत्वस्वरूपप्रदर्शनम्, सिद्धान्ताभिमतद्वितीयाावच्छेदकत्वलक्षणघटकपदानां कृत्यप्रदर्शनम् पूर्वपक्षप्रदर्शितदोषवारणपुरस्सरं सोहापोहं निर्दुष्टद्वितीयलक्षणोपसंहारः । | अवच्छेदकत्वनिरुक्तिग्रन्थस्य जागदीशीसहितदीधितेर्द्वितीय लक्षणस्यारम्भत समाप्तिं यावद्द्वितीयलक्षण आगता विषयाः । | १५ | २४ |
| ङ. | प्रतियोगिताधर्मिकोभयाभाव | अवच्छेदकत्वनिरुक्तिग्रन्थस्य | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | घटितव्याप्तिलक्षणप्रदर्शने प्रयोजनकथनम्, प्रतियोगिताधर्मिकोभयाभाव घटितव्याप्तिलक्षणस्य ससमन्वयप्रदर्शनम् गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वव्य वस्थापनम्, गुरुधर्मस्य प्रतियोगितावच्छेदकत्वस्वी कारेऽपि व्याप्तेः सयुक्ति स्वरूपप्रदर्शनम् । | जागदीशीसहितदीधितेः प्रतियोगिताधर्मिकोभयाभावघ टितव्याप्तिलक्षणादारभ्य समाप्तिपर्यन्तभागान्तर्गता विषयाः । | | |

## ४. पाठ्यवस्तुविवरणम्

### कप्रकरणम्

अवच्छेदकत्वम्, अवच्छिन्नत्वम्, पारिभाषिकावच्छेदकत्वम्, प्रतियोगित्वम्, सामनैयत्यम्, प्रतियोगितावच्छेदकत्वम्, प्रतियोगितावच्छेदकताघटकधर्मः, प्रतियोगितावच्छेदकताघटकसम्बन्धः,अनतिरिक्तवृत्तित्वम्, अव्याप्यवृत्तिसाध्यकस्थलम्, व्याप्यवृत्तिसाध्यकस्थलम्, श्रृङ्गग्राहिकन्यायः, व्यापकत्वम्, व्यापकतावच्छेदकत्वम्, अन्यूनवृत्तित्वम्, विशेषाभावः (तत्तद्व्यक्त्यभावः) सामान्याभावः, विशिष्टाभावः, उभयाभावः,स्वसमानवृत्तिकत्वम्, पर्याप्तिः, पर्याप्तिप्रतियागित्वम्, पर्याप्त्यनुयोगित्वम्, व्यासज्यवृत्तित्वम्, अव्यासज्यवृत्तित्वम्, प्रतियोगिसामानाधिकरण्यम्, प्रतियोगिवैय्यधिकरण्यम्, अन्यतरत्वम्, तादात्म्यम्, वैशिष्ट्यम्, गोत्वत्वम्, अस्वारस्यम्, वीप्सा, कालिकविशेषणता, प्रतिबन्धकत्वम्, प्रतिबध्यत्वम्, संसर्गमर्यादा, प्रातिस्विकमित्यादयः खगघङप्रकरणेष्वागतास्तत्तत्पारिभाषिकाः शब्दाः ।

### खप्रकरणम्

गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वाभिधानम्, स्वरूपसम्बन्धरूपावच्छेदकत्वस्वीकारे दोषापादनम्, स्वरूपसम्बन्धरूपावच्छेदकत्वस्वीकारे दोषापादनकमे हेत्वन्तराभिधाने प्रयोजनकथनम्, अनतिरिक्तवृत्तित्वस्य तत्तत्प्रतियोगित्वाभाववदवृत्तित्वरूपत्वे दोषप्रदर्शनम्, तथाविधयत्किञ्चिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वमित्यस्य

व्याप्यवृत्तित्वाव्याप्यवृत्तित्वसाध्यकस्थलाभिप्रायेण द्विविधलक्षणपरतयार्थकरणम्, तथाविधयत्किञ्चिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वरूपाच्छेदकत्वस्वीकारे दोषकथनम्, सामान्याभावस्य विशेषाभावातिरिक्तत्वस्वीकारे प्रयोजनकथनम् प्रतियोगितावच्छेदकाभाववदवृत्तित्वरूपावच्छेदकत्वस्वीकारे प्रयोजनकथनम्, तत्रापि दोषोद्भावनम्, तत्र यत्तुमतविवेचनम्, सिद्धान्ततस्तद्दोषवारणाय प्रतियोगितावच्छेदके स्वसमानवृत्तिकत्वविशेषणदानम्स्वसमानवृत्तिकत्वविशेषणस्य पर्याप्तिसम्बन्धघटितार्थकरणम्, पर्याप्तिसम्बन्धस्वीकारे युक्तिप्रदर्शनम्, स्वसमानवृत्तिकत्वविशेषणस्य पर्याप्तिसम्बन्धघटितार्थकरणे प्रयोजनकथनम्, पर्याप्तिसम्बन्धसत्त्वे प्रमाणकथनम्,व्यासज्यवृत्तित्वतदन्यत्वान्यतररूपेण स्वसमानवृत्तिकत्वस्वीकारे दोषकथनम्, द्वौ,द्वित्ववानिति प्रतीत्योर्भेदप्रदर्शनम्, तत्रैव प्रसङ्गे परेतुमतोपपादनपूर्वकं तन्मतखण्डनम्, केचित्तुमतोपपादनपूर्वकं तन्मतखण्डनम्, वस्तुतस्तुरूपेण पूर्वोक्तदोषवारणम्, प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे यद्धर्मपदस्यार्थकरणम्, प्रतियोगितावच्छेदकाभाववदवृत्तित्वरूपावच्छेदकत्वघटितलक्षणत्यागे बीजकथनम् ।

**गप्रकरणम्**

वस्तुतस्तुरूपेण सिद्धान्ताभिमतप्रथमावच्छेदकत्वस्वरूपोपपादनस्य प्रयोजनकथनम्, सिद्धान्ताभिमतप्रथमावच्छेदकत्वस्वरूपोपपादनम्, सिद्धान्ताभिमतप्रथमावच्छेदकत्वस्वरूपघटकतत्तत्पदानां प्रयोजनकथनम्, प्रथमावच्छेदकत्वलक्षणघटकाभावे प्रतियोगिवैय्यधिकरण्यपदप्रवेशनस्य प्रयोजनकथनम्, तस्यार्थनिर्धारणम्, प्रतियोगिव्यधिकरणाभावघटितलक्षणे दोषोद्भावनम्, तद्वारणायात्रापि सम्बन्धधर्मिकोभयाभावघटितलक्षणकथनम्, प्रथमलक्षणे पूर्वपक्षप्रदर्शितदोषवारणपुरस्सरं सोहापोहं निर्दुष्टप्रथमलक्षणपरिष्कारपूर्वकं प्रथमलक्षणोपसंहारः ।

**घप्रकरणम्**

सिद्धान्ताभिमतद्वितीयावच्छेदकत्वस्वरूपकथनस्य प्रयोजनम्, सिद्धान्ताभिमतद्वितीयावच्छेदकत्वस्वरूपप्रदर्शनम्,सिद्धान्ताभिमतद्वितीयावच्छेदकत्वलक्षणघटक तत्तत्पदानां कृत्यप्रदर्शनम्, द्वितीयावच्छेदकत्वलक्षणघटकाभावे प्रतियोगिवैय्यधिकरण्यपदप्रवेशनस्य प्रयोजनम्, तस्यार्थनिर्धारणम्, अवच्छेदकत्वलक्षणघटितव्याप्तिलक्षणघटकाभावे प्रतियोगिवैय्यधिकरण्यपदप्रवेशनस्य प्रयोजनम्, तत्र परेतुमतोपस्थापनपूर्वकं तन्मतखण्डनम्, प्रतियोगिव्यधिकरणाभावघटितलक्षणे दोषोद्भावनम्, तद्वारणायात्रापि सम्बन्धधर्मिकोभयाभावघटितलक्षणकथनम्,

सम्बन्धधर्मिकोभयाभावघटितलक्षणे प्रमेयधूमवान् वह्नेरित्यत्र दोषोद्भावनम्, अत्र वदन्ति कल्पोद्भावनम्, अत्रैव वस्तुतस्तुकेचित्त्वादीनां मतमुपपाद्य तन्मतखण्डनम्, पूर्वपक्षप्रदर्शितदोषवारणपुरस्सरं सोहापोहं निर्दुष्टद्वितीयलक्षणपरिष्कारपूर्वकं द्वितीयलक्षणोपसंहारः ।

**ङप्रकरणम्**

प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिलक्षणप्रदर्शने प्रयोजनकथनम्, प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिलक्षणस्य समन्वयप्रदर्शनम्, अत्रापि स्वविशिष्टसम्बन्धिनिष्ठाभावे प्रतियोगिवैय्यधिकरण्यविशेषणप्रवेशनम्, तस्यार्थविचारः, अत्रापि प्रतियोगिवैय्यधिकरण्यघटितलक्षणे कालो घटवान् महाकालत्वादित्यत्र दोषोद्भावनं तद्वारणञ्च, पूर्वपक्षप्रदर्शितदोषवारणपुरस्सरं सोहापोहं निर्दुष्टप्रतियोगिताधर्मिकोभयाभावघटितलक्षणपरिष्कारपूर्वकं तल्लक्षणोपसंहारः, मौलमिदमीयप्रतियोगिवैय्यधिकरण्यपदप्रवेशस्य प्रयोजनकथनम्, प्रतियोगितयोरेकसम्बन्धावच्छिन्नत्वादिपक्षप्रतिपादनम्, गौरवज्ञानस्य प्रतियोगितावच्छेदकत्वज्ञानं प्रति प्रतिबन्धकत्वव्यवस्थापनम्, गुरुधर्मस्य प्रतियोगितावच्छेदकत्वस्वीकारे च व्याप्तिस्वरूपनिर्धारणपूर्वकं ग्रन्थसमाप्तिः ।

## ५. शिक्षणविधयः शैक्षिकसामग्री च

व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणाद्याः शिक्षणविधय एवात्रप्रयुज्यन्ते ।यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेवशिक्षणाय छात्राः प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणांप्रयोगो विधेयः । अत्यावश्यके दशाविशेषे दूरशिक्षणमपि अन्तर्जालादिमाध्यमेन कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यानि । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया ।आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते ।तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति– आन्तरं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्)च ।आन्तरमूल्याङ्कनं प्रायेणकक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्यसम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनया आन्तरमूल्याङ्कनं विधीयते । गृहकार्यं कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुंशक्नुवन्ति । आन्तरमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः सन्ति ।

बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेनप्रेषितानामान्तरमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालय-परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्यासंयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकाराः निर्धारिताः सन्ति । बाह्यपरीक्षा लेखात्मिकैव भवति । सतिसम्भवेविवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानांकृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिण्याः परिकल्पनाधो निर्दिष्टप्रकारेण विधेया ।

**वार्षिकप्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ | वस्तुगताः | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यग्रन्थसूची

क) **पाठ्यग्रन्थः–**

**१. अवच्छेदकत्वनिरुक्तिः जागदीशीव्याख्यासहिता,**वामाचरणभट्टाचार्यविरचितविवृत्त्या मनोरमया च समुल्लसिता मास्टर खेलाडीलाल ऐण्ड सन्स कचौडीगली बनारस वि.सं. २००५ ।

**ख) सहायकग्रन्थाः**

**१.सिद्धान्तलक्षणम् वामाचरणभट्टाचार्यकृतविवृतिव्याख्यासहितम्**, जगदीशभट्टाचार्यः, वाणी विलास प्रकाशन राजघाट वाराणसी, द्वितीयं संस्करणम्, संवत् २०४१ ।

**२. सिद्धान्तलक्षणम्** रघुनाथशिरोमणिकृतया दीधित्या जगदीशतर्कालङ्कारकृतया जागदीश्या दिव्यानन्दकृतया लक्ष्मीटीकया दिव्याटिप्पण्या च समलङ्कृतम्, प्रकाशक :

स्वामी दिव्यानन्दः, वारणसी, सन् १९७० ।

**३. न्यायसिद्धान्तमुक्तावली** किरणावलीव्याख्यासहिता, विश्वनाथपञ्चाननभट्टाचार्यः, संवत् २०५२ पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान वाराणसी ।

**४.अनुमान प्रमाण** बलिराम शुक्लविरचित, प्रकाशकः ईस्टर्न बुक लिङ्कर्स, दिल्ली, स.१९८६ ।

**५.भारतीय दर्शन में अनुमान** व्रजनारायण शर्मा, प्रकाशक - मध्यप्रदेश हिन्दी ग्रन्थ अकादमी, भोपाल, स. १९७३

# साहित्य

**पाठ्यांशनामः** – साहित्यशास्त्रं काव्यञ्च
**पाठ्यांशसंकेतः** – सा. ४०१
**स्तर** :-शास्त्री
**पूर्णाङ्का** :- १००
**वर्ष :** – द्वितीय
**बार्षिक पाठ्यभार** :- १६०
**पत्रम्** – तृतीयम्
**साप्ताहिक पाठ्यभार** – ६

## १. पाठ्यांशपरिचयः

स्नातकस्तरस्य चतुर्वर्षात्मके पाठ्यक्रमे शास्त्रिद्वितीयवर्षस्य साहित्यविषयस्य तृतीयपत्रे निर्धारितस्य पाठ्यवस्तुनोंऽशद्वयं वर्तते –१.साहित्यशास्त्रम् २.काव्यञ्च । प्रथमे किल काव्यशास्त्ररूपेंऽशे हानप्रयोजनेन काव्यदोषाणामादानप्रयोजननेन च गुणानां रीतीनां शब्दार्थलङ्काराणाञ्च शिक्षणस्य व्यवस्था विद्यते । द्वितीये काव्यशिक्षणरुपेंऽशे खण्डकाव्यस्यैकस्य शिक्षणस्य व्यवस्था विहितास्ति। आद्यस्य साहित्यशास्त्रशिक्षणरूपस्यांशस्य कृते विश्वनाथकविराजकृतस्य साहित्यशास्त्रपरम्परायामत्यन्तं ख्यातस्य साहित्यदर्पणनामक ग्रन्थस्य सप्तपरिच्छेदादारभ्य दशमपरिच्छेदपर्यन्तं प्रतिपादितो विषयः पाठ्यवस्तुत्वेन निर्धारितोऽस्ति। द्वितीयस्य काव्याध्ययनरूपस्यांशस्य कृते च राष्ट्रप्रेमसंवलितं प्रकृतिचित्रणपरं सुललितं नैपालकेन कविना किञ्जल्कोपावेन गोपालवैद्येन प्रणीतं हिमाद्रिमहिमनामकं खण्डकाव्यं निर्धारितमस्ति।

पाठ्यांशोऽयं साकल्येन चतुर्षु प्रकरणेषु विभक्तोऽस्ति। यत्र प्रथमेंऽशे त्रीणि प्रकरणानि सन्ति। द्वितीयेंऽशे चैकं प्रकरणं निर्दिष्टमस्ति। तत्राद्य –

कप्रकरणे दोषसामान्यलक्षणस्य तद्भेदानां पददांशवाक्यर्थरसदोषाणां शिक्षणं निर्धारितमस्ति । द्वितीय खप्रकरणे गुणानां रीतीनाञ्चाभ्यासस्य तृतीये गप्रकरणे शब्दालङ्काराणामर्थालङ्काराणां च वक्ष्यमाणरीत्याधविवेचनस्य व्यवस्था विद्यते । चतुर्थे घप्रकरणे हिमाद्रिमहिमनामकस्य खण्डकाव्यस्य प्रणेतुः किञ्जल्कस्य देशकालकृत्यादिसंवलितस्य परिचयस्य, तत्रत्यस्य काव्यवस्तुनो विषयगतवैशिष्ट्यस्य तत्रत्यायाः काव्यकलायाश्च विश्लेषणेन सहैव हिमाद्रिमहिमखण्डकाव्यस्य पद्यानां काव्यसौष्ठवविश्लेषणपुरस्सरं व्याख्यानं शिक्षणाय निर्धारितमस्ति।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

पाठ्यांशस्यास्याभ्यासेन छात्रैः सामान्यतयाधोनिर्दिष्टेषु विषयेषु दक्षता लप्स्यत –

- काव्यगतानां दोषाणां ज्ञानेन दोषदृष्ट्या काव्यानां मूल्याङ्कने दोषपरिहारे च
- गुणानां रीतीनाञ्चाभ्यासेन काव्यानां विश्लेषणे तेषां मूल्याङ्कने च
- काव्यगतानामलङ्काराणां स्वरूपगतदक्षतया काव्यानां विश्लेषणे तन्मूल्याङ्कने च
- साहित्यसर्गविधौ दोषाणां परिहारे गुणरीत्यलङ्काराणामधाने च
- किञ्जल्ककृतहिमाद्रिमहिमखण्डकाव्यस्याभ्यासेन काव्यसौन्दर्यस्य खण्डकाव्यसरण्याश्च विश्लेषणे।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यं पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | विशिष्टोद्देश्यम् | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | दोषसामान्यलक्षणस्य तद्भेदानां पदपदांशवाक्यगतानां पदमात्रगतानां वाक्यमात्रगतानामर्थगतानां रसगतानाञ्च दोषाणां तेषां गुणत्वस्य परिहारोपायस्य च निरूपणम्। | पदपदांशवाक्यगताः पदमात्रगता वाक्यमात्रगता अर्थगता रसगताश्च दोषास्तेषां गुणत्वम्, रसविरोधपरिहारश्चैवं साहित्यदर्पणस्य सप्तमपरिच्छेदगतः सर्वोऽपि विषयः | ३० | ४८ |
| ख | काव्यगतानां गुणानां रीतीनां तद्भेदानाञ्च लक्षलक्षणसमन्वयस्य तेषामन्तः सम्बन्धस्य च विवेचनम्। | काव्यगता गुणाः वामनादीनां प्राचीनानां मतसमीक्षणम्, रीतयः वक्त्राद्यौचित्याद् रचनादीनामन्यथात्वम्‌ साहित्यदर्पणस्याष्टमनवम-परिच्छेदयोः प्रतिपादिताः सर्वे विषयाः | १५ | २४ |
| ग | काव्येऽङ्काराणां स्थितेः, गुणलङ्कारभेदस्य, शब्दालङ्काराणामर्थालङ्काराणां तद्भेदानाञ्च सलक्ष्यसङ्गति लक्षणविरूपणम् यथासम्भवं तेषां साम्यवैषम्यविवेचनञ्च। | अलङ्कारसामान्यलक्षणम्, गुणालङ्काराणामन्तरम् शब्दार्थोभयवर्गत्वेनालङ्काराणां वर्गीकरणे बीजम्, शब्दालङ्कारास्तद्भेदाश्च साहित्यदर्पणस्य | ४० | ६४ |

| | | | | |
|---|---|---|---|---|
| | | दशमपरिच्छेदगतः सर्वोऽपि विषयः। | | |
| घ | किञ्जल्कनिष्ठस्य कवित्वस्य कृतित्वस्य व्यक्तित्वस्य च परिचयप्रदाने, हिमाद्रिमहिमकाव्यस्य साहित्यसौन्दर्यविश्लेषणे खण्डकाव्यसरण्या विवेचने च प्राणीण्यावगमः हिमाद्रिमहिमकाव्यस्य व्याख्याने दक्षतावगमश्च। | हिमाद्रिमहिमकाव्यकर्तुः कवेः किञ्जल्कस्य परिचयः, हिमाद्रिमहिमकाव्यगतस्य सौन्दर्यस्य विवेचनम् , खण्डकाव्यसरण्या निरूपणम् समङ्गलाचरणं हिमाद्रिखण्डकाव्यव्याख्यानम् । | १५ | २४ |

## ४. पाठ्यवस्तुविवरणम्

**कप्रकरणे**

अ) दोषसामान्यलक्षणम् दोषभेदाः अधोनिर्दिष्टाः पदपदांशवाक्यगताः पदमात्रगता वाक्यमात्रगताश्च दोषाः –

पदपदांशवाक्यगताः –

दुःश्रवत्वम् अश्लीलत्वम् अनुचितार्थत्वम्

अप्रयुक्तत्वम् ग्राम्यत्वम् अप्रतीतत्वम्

सन्दिग्धत्वम् नेयार्थत्वम् निहतार्थत्वम्

अवाचकत्वम् क्लिष्टत्वम् विरुद्धमतिकृत्त्वम्

अविमृष्टविधेयांशत्वम्

**पदमात्रगताः –**

असमर्थत्वम् निरर्थकत्वम् च्युतसंस्कारत्वम्

**वाक्यमात्रगताः –**

वर्णप्रतिकूलत्वम् लुप्तविसर्गत्वम् आहतविसर्गत्वम्

| | | |
|---|---|---|
| अधिकपदत्वम् | न्यूनपदत्वम् | कथितपदत्वम् |
| हतवृत्तत्वम् | पतत्प्रकर्षत्वम् | सन्धिविश्लेषत्वम् |
| सन्ध्यश्लीलत्वम् | सन्धिकष्टत्वम् | अर्धान्तरैकपदत्वम् |
| समाप्तपुनरात्तत्वम् | अभवन्मतसम्बन्धत्वम् | अक्रमत्वम् |
| अमतपरार्थत्वम् | वाच्यानभिधानत्वम् | भग्नप्रक्रमत्वम् |
| प्रसिद्धित्यागत्वम् | अस्थानस्थपदत्वम् | अस्थानसमासत्वम् |
| सङ्कीर्णत्वम् | गर्भितत्वम्। | |

**आ) अधोनिर्दिष्टा अर्थगता दोषाः –**

| | | |
|---|---|---|
| अपुष्टत्वम् | दुष्क्रमत्वम् | ग्राम्यत्वम् |
| व्याहतत्वम् | अश्लीलत्वम् | कष्टार्थत्वम् |
| अनवीकृतत्वम् | निर्हेतुत्वम् | प्रकाशितविरुद्धत्वम् |
| सन्दिग्धत्वम् | पुनरुक्तत्वम् | ख्यातिविद्धता |
| विद्याविरुद्धता | साकाङ्क्षत्वम् | सहचरभिन्नता |
| अस्थानयुक्तता | अविशेषविशेषत्वम् | विशेषाविशेषत्वम् |
| अनियमे नियमत्वम् | नियमेऽनियमत्वम् | विध्ययुक्तता |
| अनुवादायुक्तत्वम् | निर्मुक्तपुनरुक्तत्वम्। | |

**इ) अधोनिर्दिष्टा रसदोषाः**

रसादीनां स्वशब्दाभिधानता स्थायिनां स्वशब्दवाच्यता व्यभिचारिणां स्वशब्दाभिधानता विरोधिरसविभावादिपरिग्रहः अनुभावविभावयोः कष्टाक्षेपः रसस्याककाण्डे प्रथनम् रसस्याकाण्डे विच्छेदः रसस्य पुनः पुनर्दीप्तिः अङ्गिनोऽननुसन्धानम् अनङ्गरसकीर्तनम् अङ्गस्यातिविस्तारः प्रकृतिविपर्ययः।

अर्थानौचित्यम् इत्येतेषां दोषाणां सोदाहरणसङ्गति स्वरूपनिरूपणं यथासम्भवं परस्परभेदनिरूपणञ्च।

**खप्रकरणे**

अ) गुणसमान्यलक्षणम्, गुणभेदनिरूपणम्, गुणव्यञ्जकवर्णवृत्तिरचनानां निरूपणम्, रसेषु गुणानां सातिशयतायाः स्थितिः, प्राचीनोक्तानां शब्दार्थगुणानामन्तर्भावो निरसनञ्च।

आ) रीतिलक्षण्म्, गुणरीत्योरन्तः सम्बन्धस्य साधर्म्यवैधर्म्ययोश्च विवेचनम्, सोदाहरणं रीतिभेदस्वरूपनिरूपणम्, वक्त्राद्यौचित्याद् रचनादीनामन्यथात्वम्।

गप्रकरणे

अ) अलङ्कारसामान्यलक्षणम्, गुणलङ्कारयोरन्तरम्, अलङ्काराणां शब्दार्थधर्मत्वम्, शब्दगतत्वेनार्थगतत्वेन शब्दार्थोभयगतत्वेन चालङ्काराणां विभागे बीजम्।

आ) अधोनिर्दिष्टानां शब्दालङ्काराणामुभयालङ्कारस्य च लक्ष्यलक्षणसङ्गतिः, तेषां यथासम्भवं मिथः साम्यवैषम्यनिरूपणञ्च –

पुनरुक्तवदाभासः, अनुप्रासस्तद्भेदाश्च, यमकम्, वक्रोक्तिः, भाषसमः, शब्दश्लेषस्तद्भेदाश्च, चित्रालङ्कारः, प्रहेलिकाया अलङ्कारत्वनिरसनम्।

इ) अधोनिर्दिष्टानामर्थालङ्काराणां सलक्ष्यणसङ्गति (सत्सु भेदेषु सभेदानां) निरूपणम्, तेषां यथासम्भवं मिथः साम्यवैषम्यविश्लेषणञ्च –

| | | |
|---|---|---|
| उपमा, | अनन्वयः, | उपमेयोपमा, |
| स्मरणम्, | रूपकम् | परिणामः, |
| सन्देहः, | भ्रान्तिमान्, | उल्लेखः, |
| अपह्नुतिः, | निश्चयः, | उत्पेक्षा, |
| अतिशयोक्तिः, | तुल्ययोगिता, | दीपकम् |
| प्रतिवस्तूपमा, | दृष्टान्तः, | निदर्शना, |
| व्यतिरेकः, | सहोक्तिः, | विनोक्तिः, |
| समासोक्तिः, | परिकरः, | अर्थश्लेषः, |
| अप्रस्तुतप्रशंसा, | व्याजस्तुतिः, | पर्यायोक्तम्, |
| अर्थान्तरन्यासः, | काव्यलिङ्गम्, | अनुमानम्, |
| हेतुः, | अनुकूलम्, | आक्षेपः, |

| | | |
|---|---|---|
| विभावना, | विशेषोक्तिः, | विरोधः, |
| असङ्गतिः, | विषमम्, | समम्, |
| विचित्रम्, | अधिकम्, | अन्योन्यम्, |
| विशेषः, | व्याघातः, | कारणमाला, |
| मालादीपकम्, | एकावली, | सारः, |
| यथासङ्ख्यम्, | पर्यायः, | परिवृत्तिः, |
| परिसङ्ख्या, | उत्तरम्, | अर्थापत्तिः, |
| विकल्पः, | समुच्चयः, | समाधिः, |
| प्रत्यनीकम्, | प्रतीपम्, | मीलितम्, |
| सामान्यम्, | तद्गुणः, | अतद्गुणः, |
| सूक्ष्मम्, | व्याजोक्तिः, | स्वभावोक्तिः, |
| भाविकम्, | उदात्तम्, | रसवदादयः, |
| संसृष्टि : | सङ्करः । | |

**घप्रकरणे**

अ) किञ्जल्ककवेर्देशकालवंशपरम्परादिसंवलितो वैयक्तिकः कृतित्वकवित्वविद्वत्त्वसंवलितश्च साहित्यिकः परिचयः ।

आ) हिमाद्रिमहिमखण्डकाव्यस्य वर्ण्यवस्तुगतं काव्यसौन्दर्यगतञ्च विश्लेषणम् ।

इ) हिमाद्रिमहिमखण्डकाव्यस्य काव्यशास्त्रीयतत्त्वदृष्ट्या विवेचनम् ।

ई) हिमाद्रिमहिमखण्डकाव्यस्य मङ्गलपद्यानां काव्यगतवैशिष्ट्यनिरूपणपुरस्सरं व्याख्यानम् ।

उ) हिमाद्रिमहिमखण्डकाव्यगतानां पद्यानां काव्यशास्त्रीयवैशिष्ट्यविश्लेषणपुरस्सरं व्याख्यानम् ।

**५. शिक्षणविधयः शिक्षणसामग्री च**

काव्यशास्त्रशिक्षणाय आगमन-निगमन- तुलना- प्रयोग - शास्त्रार्थविधयो मुख्यतयोपयोगिनो भवन्ति । प्रश्नोत्तरविधिस्तु सर्वैर्विधिभिः संयोज्य सर्वविधेषु शिक्षणेषु प्रयोक्तव्यः, येन छात्राणां जागरूकतायां रुच्युत्पादने जिज्ञासाभिवर्द्धौ सक्रियतायाञ्च योगो भवति । काव्याध्ययने च

व्याख्या - प्रवचन - विश्लेषण - विमर्श - तुलना - प्रश्नोत्तरादयो विधयो यथावश्यकमुपयोज्याः ।

तालिकाश्चित्राणि श्वेतश्यामट्टिकादयः स्थलादिनिरीक्षणादयः सङ्गणकयन्त्रादियोजनया वैद्युतोपकरणकिरण - जवनिकापट्टिकाप्रक्षेपणप्रसारण (स्लाइडप्रोजेक्टर) प्रभृतयः पारम्परीणा आधुनिकाश्च दृश्यश्रव्यसामग्र्यो यथावश्यकं यथोपलब्धि यथावसरञ्चोपयोज्याः ।

## ६. मूल्याङ्कनविधिः

द्विविधो हि मूल्याङ्कनविधिराभ्यन्तरो बाह्यश्च । तत्राभ्यान्तरं मूल्याङ्कनं छात्रस्य कक्षायामुपस्थितिमनुशासनं कक्षाकार्यं गृहकार्यमध्ययनप्रवृत्तिं परियोजनासम्पादनं विद्यापीठेन सञ्चालितेष्वतिरिक्तबौद्धिक - क्रीडनादिषु कार्यकलापेषु संलग्नतामान्तरिकीं परीक्षां प्रतिभानञ्चाधिकृत्य सम्बद्धविषयशिक्षकेण परीक्षानियन्त्रणकार्यालयनिर्धारिते समये मूल्याङ्कनपत्रं प्रपूर्येत । आभ्यन्तरमूल्याङ्कनार्थं प्रतिशतं विंशतिपूर्णाङ्का निर्धारितः । सम्बद्धशिक्षकेण विहितं मूल्याङ्कनं विद्यापीठप्रशासनेनातीवगोपनीतया परीक्षानियन्त्रणकार्यालयं प्रति यथासमयं प्रेष्येत ।

बाह्यं मूल्याङ्कनं परीक्षानियन्त्रणकार्यालयस्य व्यवस्थानुसारेण शैक्षिकवर्षसमाप्तौ लिखितपरीक्षया विधीयते । स्वतन्त्रछात्राणां नियमितच्छात्राणां च कृते प्रश्नपत्राणां मूल्याङ्कनस्य चैकरूपतायै पूर्णाङ्कानां शताङ्कात्मकतैव निर्धारितास्ति नियमितच्छात्राणामुभयविधेष्वङ्केष्वधिगतेषु परीक्षानियन्त्रणकार्यालयेनानुपातिकसरण्याङ्कसंयोजनं विधीयेत ।

वार्षिक्यां परीक्षायां बाह्यं मूल्याङ्कनं विधातुमधोनिर्दिष्टरीत्या प्रश्नप्रकाराणां प्रष्टव्यानां समाधेयानाञ्च तेषां सङ्ख्याया अङ्कानाञ्च व्यवस्थापनेन प्रश्नपत्रनिर्माणं विधीयेत येन मूल्याङ्कनसरण्यामप्येकरूपतामानेतुं शक्येत ।

### वार्षिक-परीक्षा-प्रश्नपत्रनिर्माण-सारणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क, ख, | | प्रष्टव्याः | समाधेयाः | |
| ग, घ, ङ, | विवेचनात्मकाः | ३ | २ | १२x२=२४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ x ६=४२ |
| | व्याख्यात्मकाः | ४ | ३ | ८ x ३=२४ |
| | वस्तुगताः | १० | १० | १ x१०=१० |

## ७. पाठ्यग्रन्थसूची

### क) पाठ्यगन्थौ

१. कविराजविश्वनाथप्रणीतः ***साहित्यदर्पणः*** (७–१० परिच्छेदाः)

२. कविकिञ्जल्ककृतं ***हिमाद्रिमहिम खण्डकाव्यम्*** (सम्पूर्णम्)

### ख) सहायकग्रन्थाः

१. कविराजविश्वनाथरचितः ***साहित्यदर्पणः*** शेषराजशर्मप्रणीतया ***चन्द्रकला*** टीकया सहितः।

२. कविराजविश्वनाथरचितः ***साहित्यदर्पणः*** हरिदासप्रणीतया ***कुसुमप्रतिम*** टीकया सहितः।

३. कविराजविश्वनाथरचितः ***साहित्यदर्पणः*** कृष्णमोहनशास्त्रिप्रणीतया ***लक्ष्मी*** टीकया सहितः।

४. कविराजविश्वनाथरचितः ***साहित्यदर्पणः*** शालग्रामशर्मप्रणीतया ***विमला*** टीकया सहितः।

५. कविराजविश्वनाथरचितः ***साहित्यदर्पणः*** योगेश्वरदत्तशर्मसम्पादिताभिरष्टभिष्टीकाभिः सहितः।

६. किञ्जल्कः, वि.सं. २०६१, हिमाद्रिमहिमा पोखराः अनिलवैद्यः भैषज्यसदनम्।

७. राजवंश सहाय हीरा, सन् १९७०, अलङ्कारानुशीलन वाराणसीः चौखम्बासंस्कृत सीरीज अफिस।

८. राजवंश सहाय हीरा, सन् १९७०, अलङ्कारमीमांसा वाराणसीः चौखम्बाविद्याभवन।

### ग) सन्दर्भग्रन्थाः

१.जगदीशचन्द्रमिश्रः १९८६ ई, अलङ्कारशास्त्रस्येतिहासः, वाराणसीः चौखम्बा सुरभारती प्रकाशन।

२. जयमन्तमिश्रः, १९६४ ई., काव्यात्ममीमांसा वाराणसीः चौखम्बा सुरभारती प्रकाशन।

३. बलदेव उपाध्याय आदि (सं), २००९ ई, संस्कृत वाङ्मयका बृहद् इतिहास (अष्टम् काव्यशास्त्रखण्ड) लखनऊः उत्तरप्रदेश संस्कृत संस्थान।

# साहित्यम्

**पाठ्यांशनाम** – महाकाव्ये, कथा च  
**पाठ्यांशसंकेत** :– सा. ४०२  
**स्तर** :– शास्त्री  
**पूर्णाङ्क** :– १००  
**वर्ष :** – द्वितीय  
**बार्षिक पाठ्यभार** :– १६०  
**पत्रम्** – चतुर्थम्  
**साप्ताहिक पाठ्यभार** – ६

## १. पाठ्यांशपरिचयः–

साहित्यविषयमवलम्ब्य शास्त्रिप्रथमखण्डाध्ययनानन्तरंद्वितीयखण्डेऽधित्सूनां छात्राणां कृते **महाकाव्ये, कथा च** इति पाठ्यांशश्चतुर्थपत्रत्वेननिर्धारितोऽस्ति । अत्र महाकाव्ये इति पदेन प्राचीन–महाकविप्रणीतंमहाकाव्यम्, नैपालककविप्रणीतंमहाकाव्यं चेति द्वे महाकाव्ये निर्धारिते स्तः । कथापदेन गद्यकाव्यमितिज्ञेयम् । महाकाव्यानि खलु जीवनजगतोर्विस्तृतवर्णनान्वितानि विपुलाकाराणि प्रतिभोत्कर्षनिदर्शकानि च गौरववन्ति भवन्ति । न केवलं प्राचीनैर्मनीषिभिरेव तादृशानिमहाकाव्यानि प्रणीतानि, अपि त्वर्वाचीनैः प्रतिभान्वितैर्नैपालकैर्महाकविभिरपि तादृशानि महाकाव्यानि प्रणीतानि। गद्यकाव्यमपि कवित्वनिकषोपकलम्। एतेषांविषयाणामध्ययनमध्यापनं च पत्रेऽस्मिन्विधीयते।

महाकाव्ये कथा चेति खण्डद्वयात्मकोऽयं पाठ्यांशः षट्सु प्रकरणेषु विभक्तोऽस्ति । महाकाव्याख्यप्रथमखण्डान्तर्गते कप्रकरणे महाकविश्रीहर्षपरिचयसम्बद्धविषयाणामध्ययनम्, खप्रकरणे नैषधीयचरितान्तर्गतसम्बद्धांशाध्ययनम्, गप्रकरणे महाकविसुकृतिदत्तपरिचयसम्बद्धविषयाणामध्ययनम्, घप्रकरणे कार्तवीर्योदयमहाकाव्यान्तर्गतसम्बद्धांशाध्ययनम् इति चत्वारिप्रकरणानि सन्ति । कथाख्यद्वितीयखण्डान्तर्गते ङप्रकरणे बाणभट्टेतिवृत्तादिसम्बद्धविषयाणामध्ययनम् चप्रकरणे कादम्बरीकथायाः सम्बद्धांशाध्ययनमितिद्वे प्रकरणे विद्येते।

## २. पाठ्यांशस्यसामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोनिर्दिष्टविषयेषु व्युत्पन्ना भविष्यन्ति –

- सेतिवृत्तंश्रीहर्षप्रणीतस्य नैषधीयचरितस्य काव्यकलाज्ञाने
- नैषधीयचरितान्तर्गतसम्बद्धांशव्याख्याने
- नैपालकमहाकवेः सुकृतिदत्तपन्तस्येतिवृत्तसहितं कार्तवीर्योदयस्य काव्यकलाज्ञाने

- कार्तवीर्योदयमहाकाव्यस्य सम्बद्धसर्गव्याख्याने
- इतिवृत्तसहिताया बाणभट्टप्रणीतायाः कादम्बरीकथाया वैशिष्ट्यनिरूपणे
- कादम्बरीगद्यकाव्यस्य सम्बद्धांशव्याख्याने विश्लेषणे च।

### ३. प्रकरणगत विशिष्टोद्देश्यं पाठ्यविषयसंयोजनञ्च

| प्रकरणम् | प्रकरणगतविशिष्टोद्देश्यम् | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | श्रीहर्षकवेर्देशकालनिर्धारणम्, तस्यविद्वत्तायाः कृतीनां च परिचयः, नैषधीयमहाकाव्यस्य महाकाव्यलक्षणदृशासमीक्षणम्, तत्र नैषधीयचरित- कथावस्तुविमर्शः, तत्र प्रयुक्तानांपात्राणांपरिचयः, नैषधे रसविधानम्, प्रकृतिचित्रणम्, पदलालित्यदृशानैषधकाव्यस्य समीक्षणम्, अलङ्कारविन्यासे- नैषधकाव्यस्यवैशिष्ट्य विवेचनम्, नैषधकाव्यदृशा- श्रीहर्षकवेरनेकशास्त्रज्ञ त्वविवेचनम्। | श्रीहर्षस्य परिचयः, नैषधीयचरितमहाकाव्य - समीक्षणसम्बद्धा निर्धारिता विषयाश्च। | १५ | १५ |
| ख | नैषधीयचरितस्य प्रथमद्वितीयसर्गयोः कथावस्तु, नलस्यचरित्रचित्रणम्, नलस्यारामविहारार्थंप्रस्थानम्, उपवनरामणीयकम्, नलहंससंवादः, दमयन्तीसौन्दर्यम्, कुण्डिननगर्यावैशिष्ट्यश्च । नैषधीयचरित - महाकाव्यान्तर्गतप्रथमद्वितीयसर्गस्य- पद्यानां प्रसङ्ग- समास- विग्रह- कोश - ध्वन्यलङ्कारवृत्तप्रदर्शनपूर्वकं व्याख्यानम्, उक्तसर्गद्वयान्तर्गतानांसु- भाषितानांभावार्थप्रदर्शनपूर्वकं व्याख्यानञ्च। | नैषधीयचरितमहाकाव्य - स्यप्रथमद्वितीयसर्गौ। | २० | ३५ |

| | | | | |
|---|---|---|---|---|
| ग | सुकृतिदत्तपन्तस्यदेशकालादिसम्बलित परिचयः, कार्तवीर्योदयमहाकाव्यस्यमहाकाव्यत्व समीक्षणम्, तत्र कार्तवीर्योदस्यकथावस्तु समीक्षणम्, सुकृतिदत्तस्यवस्तूपूस्थापनशैली, सुकृतिदत्तप्रणीतान्यकृतीनांपरिचयः, कार्तवीर्योदयमहाकाव्येऽभिव्यक्ता-विविधशास्त्रव्युत्पत्तिः, नैषधीयचरितकार्तवीर्योदययोस्तुलना-त्मकमध्ययनम्। | सुकृतिदत्तस्यपरिचयः, कार्तवीर्योदयमहाकाव्य - समीक्षणसम्बद्धा निर्धारिताविषयाञ्च। | १५ | १५ |
| घ | कार्तवीर्योदयमहाकाव्यस्याष्टमनवम-सर्गयोः कथावस्तु, कृतवीर्यदत्तात्रेयसंवादः, कार्तवीर्यस्यराज्याभिषेकः, कार्तवीर्यायकृतवीर्यदत्तोपदेशेऽभिव्य-क्ताराजनीतिः, कार्तवीर्यव्यक्तित्वम्, कुण्डिननगरीवैशिष्ट्यम्, कुण्डिन-नगरीसौन्दर्यम्, कनकप्रभासौन्दर्य समीक्षणञ्च । कार्तवीर्योदयमहाकाव्य-स्याष्टमनवमसर्गयोः पद्यानांप्रसङ्ग - समास - विग्रह - कोश - ध्वन्यलङ्कार - वृत्तप्रदर्शनपूर्वकं व्याख्यानम्, उक्त सर्गद्वयान्तर्गतानां सुभाषितानां भावर्थप्रदर्शनपूर्वकं व्याख्याञ्च। | कार्तवीर्योदय-महाकाव्यस्याष्टम नवम सर्गौ। | २० | ३५ |
| ङ | बाणभट्टेतिवृत्तसंवलितायाः कादम्बरीकया वैशिष्ट्य निरूपणम्, बाणभट्टकवेर्देशकालकृतिपरिचयः, कादम्बर्याः कथावस्तु विवेचनम्, पात्राणां परिचयः, कादम्बर्यारसविधानम्, | गद्यकाव्यनिर्मातुर्बाण-भट्टस्य परिचयः, कादम्बरीगद्य- काव्य समीक्षणसम्बद्धा-निर्धारिता विषयाः। | १० | १५ |

| | | | | |
|---|---|---|---|---|
| | प्रकृतिचित्रणविमर्शः, तत्र प्रयुक्तानामलङ्काराणांविश्लेषणम्, भाषाशैली विवेचनम्। | | | |
| च | कादम्बरीकथायापूर्वार्धगताना-मधोलिखितविषयाणां स्वभाषयावर्णनम् उच्चयिनीवर्णनम्, तारापीडपरिचयः, विलासवतीसान्त्वनम् , विलासवत्या-विविधधर्माचरणम्, चन्द्रापीडः इन्द्रायुधः, पत्रलेखा, राजकुलम्, विद्यागृहम्, चन्द्रापीडमृगयावर्णनञ्च । कादम्बरीकथायामुज्जयिनीवर्णनतः चन्द्रापीडामृगयावर्णनान्तकथान्तर्गतानां गद्यांशानां प्रसङ्गकोशविग्रहालङ्कार-भावार्थप्रदर्शनपूर्वकं व्यख्यानम्। | कादम्बरी गद्यकाव्यस्योज्जयिनी-वर्णनान्मृगयावर्ण नान्तोभागः। | २० | ४५ |

## ४. पाठ्यवस्तुविवरणम्

### कप्रकरणे

संस्कृतमहाकाव्यपरम्पराया विश्लेषणम्, श्रीहर्षकवेर्देशकालनिर्धारणम्, तस्य विद्वत्तायाः कृतीनां च परिचयः, बृहत्त्रय्यन्तर्गतस्य नैषधीयचरितस्य महाकाव्यलक्षणदृशा समीक्षणम्, तत्र नैषधीयचरितकथावस्तुविमर्शः, तत्र प्रयुक्तानां पात्राणां परिचयः, नैषधे रसविधानम्, प्रकृतिचित्रणम्, पदलालित्यदृशा नैषधीयचरितस्य समीक्षणम्, अलङ्कारविन्यासे नैषधकाव्यस्य-वैशिष्ट्यविवेचनम्, नैषधीयचरितस्य प्रथमद्वितीयसर्गावाधृत्य श्रीहर्षस्यानेकशास्त्रज्ञत्वविवेचनम्।

### खप्रकरणे

नैषधीयचरितमहाकाव्यस्य प्रथमद्वितीयसर्गयोः कथावस्तु, काव्यनायकस्य नलस्य चरितचित्रणम्, उपवनविहारव्याजेन कामसन्तप्तस्य नलस्य निर्जनस्थानगमनाय प्रस्थानम्, उपवनरामणीयकम्, नलहंससंवादः, दमयन्तीसौन्दर्यम्, कुण्डिननगर्या वैशिष्ट्यम् । नैषधीयचरितमहाकाव्यान्तर्गत-प्रथमद्वितीयसर्गस्थपद्यानां प्रसङ्ग- समास - विग्रह - कोश - ध्वन्यलङ्कारवृत्तप्रदर्शनपूर्वकं व्याख्यानम्, उक्तसर्गद्वयान्तर्गतानां सुभाषितानां भावार्थ-प्रदर्शनपूर्वकव्याख्यानञ्च।

**गप्रकरणे**

नैपालकमहाकाव्यलेखनपरम्परा, नैपालककवेः सुकृतिदत्तपन्तस्य देशकालादिसम्बलितः परिचयः, कार्तवीर्योदयमहाकाव्यस्य महाकाव्यत्वसमीक्षणम्, तत्र कार्तवीर्योदयस्य वस्तुसमीक्षणम्, सुकृतिदत्तस्य वस्तूपस्थापनशैली, सुकृतिदत्तप्रणीतान्यकृतीनांपरिचयः, कार्तवीर्योदयमहाकाव्ये-ऽभिव्यक्ताविविधशास्त्रव्युत्पत्तिः, नैषधीयचरितकार्तवीर्योदययोस्तुलनात्मकमध्ययनञ्च।

**घप्रकरणे**

कार्तवीर्योदयमहाकाव्यस्याष्टमनवमसर्गयोः कथावस्तु, कृतवीर्यदत्तात्रेयसंवादः, कार्तवीर्यस्य राज्याभिषेकः, कार्तवीर्यायकृतवीर्यदत्तोपदेशेऽभिव्यक्ता राजनीतिः, कार्तवीर्य-व्यक्तित्वम्, कुण्डिननगरीवैशिष्ट्यम्, कनकप्रभासौन्दर्यसमीक्षणञ्च। कार्तवीर्योदयमहाकाव्यस्याष्टमनवमसर्गयोः पद्यानां प्रसङ्ग - समास - विग्रह - कोश - ध्वन्यलङ्कारवृत्तप्रदर्शनपूर्वकं व्याख्यानञ्च।

**ङप्रकरणे**

बाणभट्टेतिवृत्तसहितं कादम्बरीकथाया वैशिष्ट्यनिरूपणम्, बाणभट्टकवेर्देशकालकृतिपरिचयः, कादम्बर्याः कथावस्तुविवेचनम्, पात्राणां परिचयः, कादम्बर्या रसविविधानम्, प्रकृतिचित्रणविमर्शः, तत्र प्रयुक्तानामलङ्काराणां विश्लेषणं, भाषाशैलीविवेचनञ्च।

**चप्रकरणे**

कादम्बरीकथायां पूर्वार्धगतानामधोलिखितविषयााणमध्ययनम् -उज्जयिनीवर्णनम्, तारापीडपरिचयः, विलासवतीसान्त्वनम्, विलासवत्याविविधधर्माचरणम्, चन्द्रापीड- इन्द्रयुध - पत्रलेखा - राजकुल - विद्यागृहवर्णनम्, चन्द्रापीडमृगयावर्णनञ्चेति। उल्लिखितविषयाणां स्वभाषयावर्णनम्। कादम्बरीकथायामुज्जयिनीवर्णनतः चन्द्रापीडमृगयावर्णनान्तकथान्तर्गतानांगद्यांशानां प्रसङ्गकोशविग्रहालङ्कारभावार्थप्रदर्शनपूर्वकं-व्याख्यानम्।

**५. शिक्षणविधयः शैक्षिकसामग्री च**

व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनाद्याः शिक्षणविधयो यथाप्रकरणं प्रतिपाद्यविषया-नुरूपमत्र प्रयोक्तुं शक्यन्ते। यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुत्प्रेरणीयः। समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषयानुरूपः प्रयोगो

विधेयः । अत्यावश्यकेऽन्तर्जालादिमाध्यमेनाप्यध्ययनाध्यापनं कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्राणिप्रयोज्यानि । तस्य व्यवस्थापनं सम्बद्धशिक्षकेण विभागेन–विद्यापीठेन वा विधेयम् । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थापि कार्या । महाकाव्याध्यापनसमये पद्यानां सलयमुच्चारणाय छात्राः प्रेरणीयाः । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया।

### ६.मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधाविभक्तमस्ति आन्तरं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरं मूल्याङ्कनं प्रायेण कक्षागतं भवति। कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्ध–शिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरं मूल्याङ्कनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यमित्यादीनिअन्यानिसाधनान्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते प्रतिशतं विंशतिरङ्का निर्धारिताः सन्ति। बाह्यमूल्याङ्कनस्य वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानाम् आन्तरमूल्याङ्कनस्याङ्कानां नेपाल –संस्कृत– विश्वविद्यालय – परीक्षानियन्त्रणकार्यालयेन–अनुपातपद्धत्या संयोजनं विधास्यते। बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेनसहैवअधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति। साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति। बार्षिकपरीक्षायाः कृते सतिसम्भवे विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगताञ्च प्रश्नानां कृते प्रकरणनिर्देशनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क, ख, ग, घ, ङ, | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | १२x२=२४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ x ६=४२ |
| | व्याख्यात्मकाः | ४ | ३ | ८ x ३=२४ |
| | वस्तुगताः | १० | १० | १ x१०=१० |

**७. पाठ्यग्रन्थसूची**

**क) पाठ्यगन्थौ**

१.नैषधीयचरितम् श्रीहर्षप्रणीतम् (निर्धारितोंऽशः, प्रथमद्वितीयसर्गौ)।

२.कार्तवीर्योदयम् सुकृतिदत्तपन्तप्रणीतम् (निर्धारितोंऽशः, अष्टमनवमसर्गौ) प्रकाशकः नेपाल राजकीय प्रज्ञा प्रतिष्ठान, कमलादी, काठमाडौं।

३. कादम्बरी बाणभट्टप्रणीता (निर्धारितोंऽशः, उज्जयनीवर्णनतः शुकनाशोपदेशपूर्वभागः)।

ख) सन्दर्भग्रन्थाः

१. कार्तवीर्योदयमकरन्दः प्रा.डा. वेणीमाधव ढकालः (कार्तवीर्योदयमहाकाव्यस्याष्टमनवमसर्गयो –र्व्याख्यात्मकोग्रन्थः) प्रकाशकः विद्यार्थी पुस्तक भण्डार काठमाडौं (२०६९)।

# विशिष्टीकरण तालिका

स्तर :- शास्त्री खण्डः- द्वितीयः विषयः- साहित्यम् पत्रम्ः- चतुर्थम्

पूर्णाङ्काः- १०० उत्तीर्णाङ्का :- ३५ संकेताङ्काः –सा.४०२

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क, ख, ग, घ, ङ, | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | १२X२=२४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ X ६=४२ |
| | व्याख्यात्मकाः | ४ | ३ | ८ X ३=२४ |
| | वस्तुगताः | १० | १० | १ X१०=१० |

१. विवेचनात्मकाः प्रश्नाविषयवस्तुनोविश्लेषणसामर्थ्यपरीक्षणदृशा, गद्यपद्यव्याख्यात्मकाः प्रश्नाः पाठ्यांशाध्ययनपरीक्षणदृशा, वस्तुगताश्चपश्ना अत्यन्तसंक्षिप्ततयावाक्येनैकेनवाक्यांशेनवासु-स्पष्टतयाविषयज्ञानमात्रो पस्थापनसामर्थ्यपरीक्षणदृशानिर्मेयाः।

२.प्रश्नपत्रनिर्माणेवार्षिक – परीक्षा – प्रश्नपत्रनिर्माण – सारिण्याविशिष्टीकरण तालिकायाश्च समायोजनपूर्वकं वैकल्पिकप्रश्नदानेप्राश्निकः स्वतन्त्रोविद्यते । अत्र प्राश्निकः संक्षिप्तोत्तरापेक्षिषुप्रश्नेष्वपिसप्रसङ्गगद्यपद्यव्याख्यानां व्याख्यात्मकान्प्रश्नानिर्मातुं प्रभवति।

३. वार्षिक – परीक्षा –प्रश्नपत्रनिर्माण –सारिणीमनतिक्रम्ययथासम्भवंप्रतिप्रकरणं वैकल्पिकः प्रश्नोदेयः परंवस्तुगतेप्रश्नेतस्यावसरोनास्ति।

४. कस्मात्प्रकरणाद्वैकल्पिकः प्रश्नो देय इत्यत्रप्राश्निकः स्वतन्त्रोभवति । वैकल्पिक प्रश्नाः सम्बद्धप्रकरणाद्देवदेयाः।

# इतिहासपुराणम्

**पाठ्यांशनाम**– विराट्स्वरूपसृष्ट्यवतारादिज्ञानम्, देवीचरितं शृङ्ग्युपाख्यानञ्च

**पाठ्यांशसङ्केतः**– इ.पु.४०१

**स्तरः**– शास्त्री

**वार्षिकः पाठ्यभारः**–१६० घण्टाः

**खण्डः**– द्वितीयः

**पूर्णाङ्काः**– १००

**पत्रम्**– तृतीयम्

**साप्ताहिकः पाठ्यभारः**–६

### १. पाठ्यांशपरिचयः

प्रकरणत्रयेषु विभक्तोऽयं पाठ्यांशः शास्त्रिकक्षायामितिहासपुराणविषय-मधीयानानां छात्राणां कृतेनिर्धारितोऽस्ति।

अस्मिन् पाठ्यक्रमे **क** प्रकरणेश्रीमद्भागवतमहापुराणस्य द्वितीयस्कन्धस्था विषयाः पाठ्यांशत्वेन निर्धारिताः सन्ति।

अत्र **ख**–प्रकरणे श्रीमद्देवीभागवतस्य प्रथमस्कन्धस्थाविषया निर्धारिताः सन्ति। तथैव अत्र **ग**–प्रकरणेमहाभारतस्य आदिपर्वणो विंशतितमाध्यायात् द्विचत्वारिंशत्तमाध्याय(२०–४२) पर्यन्ताविषयाः पाठ्यांशत्वेन निर्धारिताः सन्ति।

### २.पाठ्यांशस्य सामान्योद्देश्यानि

एतेषां पाठ्यांशानामध्ययनेन विद्यार्थिनोऽधोनिर्दिष्टोद्देश्यपूर्तये समर्था भविष्यन्ति।

- श्रीमद्भागवतमहापुराणवर्णितविराट्स्वरूपसृष्ट्यवतारादिविषये।
- श्रीमद्देवीभागवतस्थदेवीचरितवर्णने।
- महाभारतस्थसौपर्णाख्यानशृङ्ग्युपाख्यानविवेचने।

### ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | श्रीमद्भागवतद्वितीयस्कन्धे वर्णित- ध्यानविधिनिर्देशना- दारभ्य विराट्पुरुषविग्रहे | शुकप्रवचनादारभ्य, विराट्पुरुषविग्रहे इन्द्रिय- तदधिष्ठातृदेवानामुत्पत्तिपर्यन्त | ४० | ६४ |

| | | | | |
|---|---|---|---|---|
| | इन्द्रियाणां तदधिष्ठातृदेवाना-मुत्पत्तिपर्यन्ता विषयाः | ता श्रीमद्भागवतस्य द्वितीयस्कन्धस्था विषयाः | | |
| ख | श्रीमद्देवीभागवतप्रथमस्कन्धे वर्णित-स्कन्धादिसङ्ख्यानिरूपणा-दारभ्य धृतराष्ट्रपाण्डुविदुराणामुत्पत्ति-पर्यन्त-विषयाः | श्रीमद्देवीभागवतस्य महापुराण-त्वादिसिद्धान्तनिर्णयादारभ्य व्यासकृत्योपवर्णनपर्यन्ताः श्रीमद्देवीभागवतप्रथमस्कन्धस्था विषयाः । | ३० | ४८ |
| ग | महाभारतस्य आदिपर्वणि ( २०-४२अध्यायेषु) वर्णिताः सौपर्णाख्यानादारभ्य काश्यपागमनपर्यन्तविषयाः । | सौपर्णाख्यानादारभ्य काश्यपागमनपर्यन्ता महाभारतस्यादिपर्वणः (२०-४२) अध्यायस्था विषयाः । | ३० | ४८ |

## ४. पाठ्यवस्तुविवरणम्

### क प्रकरणे

शुकप्रवचनम्-तत्रादौ ध्यानविधिः, भगवतो विराड्रूपस्य वर्णनं च, योगिनां योगधारणयोत्क्रमणप्रकारस्य वर्णनं, सद्योमुक्तिक्रममुक्त्योर्निरूपणं च, नानाविधकामनासिद्धये नानादेवानामुपासनम्, शौनकप्रश्नः, तत्र भगवत्सेवापरायणेन्द्रियाणां प्रशंसनं च, सूतोक्तिः, राज्ञः सृष्टिविषयकः प्रश्नः, शुकस्य मङ्गलाचरणपूर्वकं कथारम्भश्च, ब्रह्माणं प्रति नारदप्रश्नः, ब्रह्मोक्तिः, तत्त्वानामुत्पत्तिः, ब्रह्माण्डनिर्माणवर्णनञ्च, पुरुषसूक्तार्थेन भगवतो विराट्स्वरूपस्य वर्णनम्, वराहावतारादारभ्य श्रीकृष्णावतारपर्यन्तं संक्षेपतोऽवतारचरितवर्णनम्, परीक्षितः प्रश्नाः, शुकस्य प्रतिवचनम्, ब्रह्मणो वैकुण्ठधाम-दर्शनम्, तत्राभ्यर्थमानेन भगवता ब्रह्मणे चतुः-श्लोकभागवतोपदेशदानम्, पुराणलक्षणानि, विराट्पुरुषविग्रहे इन्द्रिय-तदधिष्ठातृदेवानामुत्पत्तिश्च ।

### ख प्रकरणे

श्रीमद्देवीभागवतस्य महापुराणत्वादिसिद्धान्तनिर्णयः, ग्रंथारंभे मङ्गलम्, ऋषीणां पुराणविषयकः प्रश्नः, ग्रन्थसंख्यानिरूपणम्, ससंख्यकपुराणाख्यानं तत्तद्युगीयव्यासानुकथनञ्च, देवी

सर्वोत्तमेतिकथनं, प्रसङ्गतः शुकजन्मच, देव्या महोत्कर्षः, मधुकैटभयोर्युद्धोद्योगः, मधुकैटभभीतेन ब्रह्मणा परांबिकायाः स्तुतिः, आराध्यनिर्णयः, विष्णुना मधुकैटभवधः, शिवस्य वरदानम्, बुधोत्पत्तिः, पुरूरवस उत्पत्तिः, पुरूरवस उर्वश्याश्च चरितम्, शुकस्योत्पत्तिः, शुकवैराग्यम्, शुकायैतत्पुराणोपदेशः, राज्ञो जनकस्य परीक्षार्थं शुकस्य मिथिलागमनम्, शुकाय जनकोपदेशः, शुकस्य विवाहादिकम्, शुकनिर्गमोत्तरव्यासकृत्योपवर्णनम्।

**ग प्रकरणे**

सौपर्णाख्यानतः कद्रूविनतयोरुच्चैःश्रवसो दर्शनाय गमनम्, सर्पैर्मातृवचनादुच्चैःश्रवः पुच्छवेष्टनम्, गरुडोत्पत्तिः, अरुणेन सूर्यसारथ्यकरणम्, विनतागरुडाभ्यां कद्रूसर्पवहनम्, इन्द्रेण जलवर्षणम्, सर्पैदास्यमोचनोपायकथनम्, अमृताहरणाय गरुडगमनम्, गरुडकश्यपसंवादः, उत्पातान्दृष्ट्वा देवैरमृतरक्षणम्, गरुडस्य पक्षीन्द्रत्वेऽभिषेकः, देवगरुडयुद्धम्, अमृतं गृहीत्वा गच्छतो गरुडस्य विष्णुदर्शनम्, इन्द्रगरुडसख्यं, विनतादास्यमोचनम्, सर्पनामकथनम्, शेषवृत्तकथनम्, वासुक्यादिमन्त्रणम्, एलापत्रवाक्यम्, जरत्कार्वन्वेषणम्, परीक्षिदुपाख्यानम्, परीक्षिच्छापः, काश्यपागमनम्।

**५.शिक्षणविधिः**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते अन्वेषणपरियोजनसदृशा विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः सकलमार्गनिर्देशनं विधाय स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । सति सम्भवे शैक्षिकभ्रमणमप्यावश्यकतानुसारेण करणीयम् । तद्व्यवस्था च सम्बद्धशिक्षणविभागेन विद्यापीठेन वा करणीया । आवश्यकञ्चेत् पुराणवाचनादिप्रयोगात्मककक्षाया अपि व्यवस्था करणीया । अधुना दूरशिक्षणस्यापि प्रचलनमस्तीति सङ्गणकयन्त्रस्यापि प्रयोगो विधीयते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा व्यवस्था विधेया । विद्यापीठेष्वन्तर्जालव्यवस्थापि करणीया। पुस्तकालयेषु पाठ्यसामग्रीरूपेण टंकणयन्त्राणामपि व्यवस्था विधेया।

**६.मूल्याङ्कन विधिः**

मूल्याङ्कनं द्विधा विभक्तं विद्यते- आन्तरिकं (निर्माणात्मकम्) बाह्यं (निर्णयात्मकम्) चेति । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतरूपेण भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्य-योजनायामान्तरिकमूल्याङ्कनं क्रियते गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यमित्यादीन्यन्यानि साधनानि च मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति।

आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशतमङ्गा निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य कृते वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्गाः शतमेव भवन्ति, किन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वमेव सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृत-विश्वविद्यालयेन अनुपातपद्धत्या संयोजनं विधातव्यम् । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणरूपेण बाह्यपरीक्षा लेखात्मिकैव भविष्यति, किन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि कर्तुं शक्यते ।

**वार्षिक-परीक्षा-प्रश्नपत्रनिर्माण-सारणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क, ख, | | प्रष्टव्याः | समाधेयाः | |
| ग, घ, ङ, | विवेचनात्मकाः | ३ | २ | १२x२=२४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ x ६=४२ |
| | व्याख्यात्मकाः | ४ | ३ | ८ x ३=२४ |
| | वस्तुगताः | १० | १० | १ x१०=१० |

**७. पाठ्यसूची-**

### क) पाठ्यग्रन्थाः

- वेदव्यासः, श्रीमद्भागवतम्,द्वितीयस्कन्धः
- वेदव्यासः, श्रीमद्देवीभागवतम्, प्रथमस्कन्धः
- वेदव्यासः, महाभारतस्यादिपर्वणः (२०-४२ अध्यायाः)

### ख) सहायके पुस्तके

- पुराणदिग्दर्शनम् , पं माधवाचार्य शास्त्री
- पौराणिकपुरुषपात्रपर्यालोचनम् , डा.श्रीकृष्णमणि त्रिपाठी

### ग) सन्दर्भपुस्तकम्

- महाभारततात्पर्यप्रकाशः, सदानन्द व्यासः

# इतिहासपुराणम्

**पाठ्यांशनाम-**विदुरतीर्थयात्रादिवर्णनम्, शक्तितत्त्ववर्णनं मन्वन्तरादिवर्णनं च

**पाठ्यांशसङ्केतः**- इ.पु.४०२

**स्तरः-** शास्त्री
**वार्षिकः पाठ्यभारः**-१६० घण्टाः

**खण्डः-** द्वितीयः
**पूर्णाङ्काः**- १००

**पत्रम्-** चतुर्थम्
**साप्ताहिकः पाठ्यभारः**-६

## १. पाठ्यांशपरिचयः

पञ्चसु प्रकरणेषु विभक्तोऽयं पाठ्यांशः। शास्त्रिकक्षायामितिहासपुराणविषय-मवलम्ब्य ये पठितुमिच्छन्ति, तेषां छात्राणां कृतेऽयं पाठ्यांशो निर्धारितोऽस्ति ।

अस्मिन् पाठ्यक्रमे क-ख प्रकरणयोः श्रीमद्भागवतमहापुराणस्य तृतीयस्कन्धस्य प्रथमाध्यायतः दशमाध्यायपर्यन्ता विषया (१-१० अ.) एकादशतमाध्यायायतः सप्तदशतमाध्यायपर्यन्ता (११-१७अ.) विषयाः पाठ्यांशत्वेन निर्धारिताः सन्ति ।

अत्र ग-प्रकरणे श्रीमद्देवीभागवतस्यनवमस्कन्धस्य प्रथमाध्यायादारभ्य पञ्चविंशतितमाध्यायपर्यन्ताः (१-२५अ.) विषया निर्धारिताः सन्ति ।

अत्र **घ-ङ प्रकरणयोः** विष्णुपुराणस्य तृतीयांशे वर्णिता विषयाश्च पाठ्यांशत्वेन निर्धारिताः सन्ति ।

## २.पाठ्यांशस्य सामान्योद्देश्यानि

एतेषां पाठ्यांशानामध्ययेनेनच्छात्रा अधोनिर्दिष्टोद्देश्यपूर्तये समर्था भविष्यन्ति ।

- श्रीमद्भागवतमहापुराणस्य वैशिष्ट्यप्रकाशने,
- श्रीमद्देवीभागवतस्य देवीतत्वज्ञाने,
- विष्णुपुराणस्य निर्धारितांशेषु वर्णितविषयाणां निरूपणे
- विशिष्टपद्यानाम् प्रौढरूपेण व्याख्याने च

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | श्रीमद्भागवतमहापुराणसन्दर्भे श्रीकृष्णलीला तथा यदुवंशसंहारविषयस्तथा | विदुरस्योद्धवेनसह समागमप्रसंगाद्दशविध सृष्टिवर्णनपर्यन्ता | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | दशविधसृष्टिविषयकज्ञानम् | विषयाः ( श्रीमदभागवतस्य तृतीयस्कन्धे १-१० अध्यायाः) | | |
| ख | श्रीमद्भागवतमहापुराणसन्दर्भे मन्वन्तरादिकालपरिमाणनिरूपणादारभ्य हिरण्याक्षदिग्विजयपर्यन्तानाम् विषयाणाम् व्याख्यानम् | मन्वन्तरादिकालपरिमाण निरूपणादारभ्य हिरण्याक्षदिग्विजय- पर्यन्ता विषयाः (श्रीमद्भागवतस्य तृतीयस्कन्धे ११-१७ अध्यायाः) | २० | ३२ |
| ग | श्रीमद्देवीभागवतस्य शक्तिवर्णनादारभ्य तुलसीपूजनपर्यन्तानां विषयानां विवेचनम् | श्रीमद्देवीभागवतस्य शक्तिवर्णनादारभ्य तुलसीपूजनपर्यन्ता विषयाः ( श्रीमद्देवीभागवतस्य नवमस्कन्धे १-२५ अध्यायाः) | ३० | ४८ |
| घ | श्रीविष्णुपुराणान्तर्गतमन्वन्तरविषयक- प्रश्नादारभ्य शौचविधानपर्यन्तानां विषयाणां प्रतिपादनम् | मैत्रेयस्यपराशरं प्रति मन्वन्तरविषयक- प्रश्नादारभ्य शौचविधानपर्यन्ता विषयाः ( श्रीविष्णुपुराणस्य तृतीयांशे १-१० अध्यायाः) | १५ | २४ |
| ङ | श्रीविष्णुपुराणस्थो गार्हस्थ्यसदाचारवर्णनादारभ्य मायामोहकृतदैत्य पराजय वर्णनपर्यन्तानां विषयाणां व्याख्यानम् | गार्हस्थ्यसदाचारवर्णनादारभ्य मायामोहकृतदैत्यपराजयवर्णनपर्यन्ता विषयाः ( श्रीविष्णुपुराणस्य तृतीयांशे ११-१८ अध्यायाः) | १५ | २४ |

## ४. पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

धृतराष्ट्रं परित्यज्य गतस्य विदुरस्योद्धवेन सह, प्रभुविरहविषण्णेनोद्धवेन संक्षेपतः श्रीकृष्णबाल-लीलावर्णनम्, मथुरायां द्वारकायां च सम्पन्नानां श्रीकृष्णलीलानां वर्णनम्, यदूनां प्रभासक्षेत्रगमनं च, यदुवंशसंहारकथनम्, स्वपदारोहणात्प्रागुद्धवायोपदिष्टस्य ज्ञानस्योपलब्धये विदुरस्य मैत्रेयसन्निधौ गमनम्, विदुरप्रश्नमनुसृत्य मैत्रेयद्वारा सृष्टिक्रमवर्णनम्, तत्र महदादितत्त्वानामुत्पत्तिः, तत्त्वात्मकदेवैः कृतं भगवत्स्तवनं च, ईशशक्तिप्रवेशेन स्थूलभूतानां जगन्निर्माणशक्तितत्त्वप्रदर्शनपूर्वकं विराड्विग्रहोत्पत्तिकथनम्, निर्गुणस्य भगवतो गुणक्रियादिसङ्गः कथमिति प्रश्नस्य मैत्रेयद्वारा समाधानं श्रुत्वा पुनर्विदुरकृता विविधाः प्रश्नाः, विष्णोर्नाभिकमलाद्ब्रह्मोत्पत्तिवर्णनम्, ब्रह्मकृता भगवत्स्तुतिः, भगवता ब्रह्मणे वरप्रदानं, दशविधसृष्टिवर्णनञ्च,

**'ख'प्रकरणे**

मन्वन्तरादिकालपरिमाणनिरूपणम्, मनुष्यदेवाद्यायुषो वर्णनञ्च, सनकादीनां रुद्रस्य मरीच्यादीनां सरस्वत्या वेदादीनां चोत्पत्तिवर्णनम्, ब्रह्मणो देहात् स्वायम्भुवमनोः शतरूपायाश्च जन्म, ब्रह्मणो नासारन्ध्रादाविर्भूतस्य भगवतो यज्ञवराहस्य संक्षिप्तचरितम्, ऋषिभिः कृतं भगवतः स्तवनञ्च, दितिकश्यपसंवादः, दित्यां कश्यपद्वारा गर्भस्थापनम्., वैकुण्ठधामवर्णनम् तत्र गतानां सनकादीनां जय-विजयावुद्दिश्य शापदानम् भगवद्दर्शनम्, भगवत्कृतं सनकादीनां सान्त्वनम्, वैकुण्ठाज्जयविजययोः पतनम्, हिरण्यकशिपुहिरण्याक्षयोर्जन्म, तदानीमुत्पातदर्शनम्, हिरण्याक्षदिग्विजयवर्णनञ्च ।

**'ग'प्रकरणे**

संक्षेपेण शक्तिवर्णनम्, पंचप्रकृतिसंभवः, देवतादिसृष्टिः, सरस्वतीस्तोत्रपूजादि, धर्मात्मजेन नारदाय सर- स्वतीमहास्तोत्रकथनम्, पृथ्वीलोके लक्ष्मीगंगाभारतीनां जन्म, तासां शापोद्धारप्रकारः, गंगादीनां समुत्पत्तिस्तासां कलौ, वर्तनञ्च, शक्त्युत्पत्तिप्रसंगतो भूमिशक्तेः समुत्पत्तिः, धरादेव्या अपराधे कृते सति नरकादिफलप्राप्तिकथनम्, गंगोत्पत्तिः, राधाकृष्णाङ्गसंभवाया गंगाया गोलोके समुत्पत्तिः, जाह्नवी नारायणप्रिया जातेति वार्ता, गंगाविष्ण्वोः परस्परसम्बन्धः, तुलस्युपाख्यानप्रश्नः, महालक्ष्म्या राजगृहे जन्म, धर्मध्वजसुतायास्तुलस्याः कथा, शंखचूडेन तुलस्याः संगतिः संवादश्च, तयोर्विवाहानन्तरं देवानां वैकुण्ठगमनम्, शंखचूडस्य देवैः सह संग्रामः, शंखचूडमहेशयोर्युद्धम्, समवाययुद्धारम्भः, जनार्दनेन शंखचूडस्य कवचहरणम्, तुलसीसङ्गवर्णनं तन्माहात्म्यं महामंत्रसहितं तुलसीपूजनञ्च ।

**'घ'प्रकरणे**

मन्वन्तराणि मैत्रेयस्य पराशरंप्रति प्रश्नः, ततः पराशरस्य चतुर्दश-मनुनामनिर्देशकरणम्, प्रतिमनुगतशक्रादिदेवर्षिप्रमुखानां नामनिर्देशपूर्वकवर्णनम्, सावर्ण्यादिमनूत्पत्तिवर्णनम्, चतुर्दशमनोरन्ते कल्पान्तादिवर्णनम्, प्रतिद्वापरयुगेषु भिन्नव्यासानां नामाख्यानम्, ब्रह्मस्तवनपूर्वकं ब्रह्मज्ञानमाहात्म्यसंकीर्तनम्, व्यासविभक्तऋग्वेदशाखाभेदविवरणम्, क्रुद्धगुरुवचनाद्याज्ञवल्क्यस्य गुरुपाठितयजुर्वेदत्यागकरणम्, याज्ञवल्क्यस्य सूर्याराधनां विधाय सूर्यतः शुक्लयजुर्वेदाध्ययनकरणम्, तैत्तिरीययजुःशाखावर्णनम्, यजुर्वेदविभागकरणम्, जैमिनिकृतसामवेदशाखाविभागवर्णनं स्वशिष्येभ्योऽध्यापनञ्च, अष्टादश-महापुराणभेदकथनम्, उपपुराणविभागः, महापुराणलक्षणम्, चतुर्दशविद्याविभागकथनम्, वैवस्वतगीतयमयातनाविनाशकभगवन्नाममाहात्म्यवर्णनपुरःसरं यमवरुणसंवादवर्णनम्, सगरौर्वसंवादे विष्ण्वाराधनविधिमाहात्म्यवर्णनम्, चातुर्वर्ण्यधर्माश्रमवर्णनम, ब्रह्मचर्याद्याश्रमचतुष्टयधर्माधर्मव्यवहारपद्धतिवर्णनम्, मोक्षाधिकारिपुरुषवर्णनम्, कामादिजयविधानम्, पुरुषाणां नित्यनैमित्तिककाम्याकाम्यक्रियाफलवर्णनम्, भार्यापाणिग्रहणविचारः शौचविधानञ्च ।

**'ङ'प्रकरणे**

गार्हस्थ्यसदाचारवर्णनम्, वैदिकसत्यशौचादिस्नानसंध्याद्यावश्यकाचारवर्णनम्, पञ्चमहायज्ञविधानवर्णनम्, ऋतौ भार्यागमने शुभाशुभविचारः, सन्ध्यादिकर्मकर्तुर्दोषप्रख्यापनम्, गृहस्थानां दृष्टादृष्टप्रधानसदाचारप्रपञ्चः, योग्यकाले होमाद्यावश्यककर्मविधिवर्णनम्, जातकर्मादिविधानवर्णनम्, अशौचविचारकरणम्, श्राद्धादिविचारः, श्राद्धप्रशंसाकरणम्, श्राद्धे पात्रापात्रविचारः, पिण्डदानप्रशस्तिः, श्राद्धाकरणे दोषकथनम्, पार्वणश्राद्धप्रयोगविधिवर्णनम्, श्राद्धानर्हब्राह्मणकथनम्, ब्राह्मणाऽऽमंत्रणप्रकारकथनम्, श्राद्धे पवित्रपदार्थविचारकरणम्, श्राद्धे प्रदेयद्रव्यप्रशंसाकरणम्, श्राद्धेऽप्रदेयद्रव्यवर्णनम्, श्राद्धविधिवर्णनम्, नग्नस्वरूपकथनम्, देवकृतविष्णुस्तवनम्, असुरनाशनाय भगवद्दत्तस्य मायामोहस्य ब्रह्मादिदेवग्रहणकरणम्, मायामोहासुरसंवादवर्णनम्, मायामोहकर्तृकं दैत्यानां वेदमार्गतोऽपाकरणम्, शतधन्वोराख्यानवर्णनम्, मायामोहकृतदैत्यपराजयवर्णनञ्च ।

## ५.शिक्षणविधिः

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते अन्वेषणपरियोजनसदृशा विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः सकलं मार्गनिर्देशनं विधाय स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । समुचितानां विविधानां

श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । सति सम्भवे शैक्षिकभ्रमणमप्यावश्यकतानुसारेण करणीयम् । तद्व्यवस्था च सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा करणीया । आवश्यकञ्चेत् पुराणवाचनादिप्रयोगात्मककक्षाया अपि व्यवस्था करणीया । अधुना दूरशिक्षणस्यापि प्रचलनमस्तीति सङ्गणकयन्त्रस्यापि प्रयोगो विधीयते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा व्यवस्था विधेया । विद्यापीठेष्वन्तर्जालव्यवस्थापि करणीया । पुस्तकालयेषु पाठ्यसामग्रीरूपेण टंकणयन्त्राणामपि व्यवस्था विधेया ।

## ६.मूल्याङ्कन विधिः

मूल्याङ्कनं द्विधा विभक्तं विद्यते- आन्तरिकं (निर्माणात्मकम्) बाह्यं (निर्णयात्मकम्) चेति । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतरूपेण भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्य-योजनायामान्तरिकमूल्याङ्कनं क्रियते गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यमित्यादीन्यन्यानि साधनानि च मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशताङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य कृते वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, किन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वमेव सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृत-विश्वविद्यालयेन अनुपातपद्धत्या संयोजनं करिष्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणरूपेण बाह्यपरीक्षा लेखात्मिकैव भविष्यति, किन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि कर्तुं शक्यते ।

### वार्षिक-परीक्षा-प्रश्नपत्रनिर्माण-सारणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क, ख, ग, घ, ङ, | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | १२×२=२४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७×६=४२ |
| | व्याख्यात्मकाः | ४ | ३ | ८×३=२४ |
| | वस्तुगताः | १० | १० | १×१०=१० |

## ७. पाठ्यसूची-

### क) पाठ्यग्रन्थाः

- वेदव्यासः, श्रीमदभागवतम् (तृतीयस्कन्धे १-१७ अध्यायाः)
- वेदव्यासः, श्रीमद्देवीभागवतम्, (वेदव्यासप्रणीतम्, नवमस्कन्धे (१-२५ अध्यायाः)
- वेदव्यासः, विष्णुपुराणम्, (तृतीयांशः सम्पूर्णः)

**ख) सहायकग्रन्थाः**

- अष्टादशपुराणपरिचयः - डा. श्रीकृष्णमणित्रिपाठिकृतः ।
- कल्याण, श्रीमद्भागवतविशेषाङ्कः ।
- पुराणविषयानुक्रमणी - डा. राजवलि पाण्डेयः

**ग) सन्दर्भग्रन्थाः**

- सांख्यकारिका ।
- पौराणिक-आख्यान - डा. गङ्गासारराय ।
- विष्णुपुराण का भारत - डा. सर्वानन्द पाठक ।

# विशिष्टीकरणतालिका

विषयः इतिहासपुराणम् सङ्केताङ्कः ४०२

| प्रकरणम् | परीक्षणीयाः पाठ्यविषयाः | प्रश्नप्रकृतयः | प्रष्टव्याः प्रश्न-संख्याः | समाधेयाः प्रश्न-संख्याः | पूर्णाङ्काः | विवरणम् |
|---|---|---|---|---|---|---|
| क | श्रीमद्भागवतमहापुराणस्य तृतीयस्कन्धस्य १–१७ अध्यायपर्यन्ता विषयाः | विवेचनात्मकाः | २ | १ | १२ | विदुरस्योद्धवेन सह मेलनम्, विदुरोद्धवसंवादप्रसङ्गे प्रभुविरहविषण्णेनोद्धवेन संक्षेपतः श्रीकृष्णबाल-लीलावर्णनारभ्य मथुरायां द्वारकायां च सम्पन्नानां श्रीकृष्णलीला-वर्णनम्, यदूनां प्रभासक्षेत्रगमनञ्च, यदुवंशसंहारकथनम्, उद्धवायोपदेशप्रदानाय तथा ज्ञानस्योपलब्धये विदुरस्य मैत्रेय-सन्निधौ गमनम्, विदुरप्रश्नमनुसृत्य मैत्रेयकृत-सृष्टिक्रमवर्णनम्, तत्र महदादितत्त्वानामुत्पत्तिः, देवकृतं भगवत्स्तवः, ईशशक्तिप्रवेशेन स्थूलभूतानां जगन्निर्माणशक्तित्व प्रदर्शनपूर्वकं |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | मैत्रेयद्वारा<br>विराड्विग्रहोत्पत्तिक<br>थनम्, निर्गुणस्य<br>भगवतो<br>गुणक्रियादिसङ्गः<br>कथनम्,<br>ब्रह्मोत्पत्तिवर्णनम्,<br>ब्रह्मकृता<br>भगवत्स्तुतिः,<br>भगवता ब्रह्मणे<br>वरप्रदानम्,<br>दशविधसृष्टिवर्णनमि<br>त्यादिविषयेभ्यो द्वौ<br>विवेचनात्मकौ प्रश्नौ<br>प्रष्टव्यौ, एकः<br>समाधेयः |
| ख | श्रीमद्भाग<br>वतमहापुरा<br>णस्य<br>तृतीयस्कन्<br>धस्य<br>१–<br>१७अध्यायप<br>र्यन्ता<br>विशिष्टाः<br>श्लोकाः | व्याख्या-<br>त्मकाः | २ | १ | ८ | श्रीमद्भागवतमहापुर<br>णस्य<br>तृतीयस्कन्धस्य १-<br>१७अध्यायपर्यन्तेभ्यो<br>विशिष्टश्लोकेभ्यो द्वौ<br>श्लोकौ प्रौढी<br>व्याख्यायाः कृते<br>स्थापनीयौ, एको<br>व्याख्येयः । |
| ग | श्रीमद्भाग<br>वतमहापुरा<br>-<br>णस्य<br>तृतीयस्कन्<br>धस्य<br>१-१७ | संक्षिप्तोत्त<br>रापेक्षिणः | ३ | २ | ७×२=<br>१४ | श्रीमद्भागवतमहापुर<br>णस्य<br>तृतीयस्कन्धस्य १-<br>१७अध्यायपर्यन्तेभ्यः<br>संक्षिप्तोत्तरापेक्षिणस्त्र<br>यः प्रश्नाः प्रष्टव्याः,<br>द्वौ समाधानीयौ । |

| | | | | | | |
|---|---|---|---|---|---|---|
| | अध्यायपर्यन्ता विषयाः | | | | | |
| घ | श्रीमद्भागवतमहापुराणस्य तृतीयस्कन्धस्य १-१७ अध्यायपर्यन्ता विषयाः | अतिसंक्षिप्तोत्तरापेक्षिणः/ वस्तुगताः | ६ | ६ | ६ | श्रीमद्भागवतमहापुराणस्य तृतीयस्कन्धस्य १-१७अध्यायपर्यन्तेभ्य उपर्युक्त विषयेभ्यः संक्षिप्तोत्तरापेक्षिणः षट्प्रश्नाः प्रष्टव्याः, सर्वे समाधेयाः । |
| ङ | श्रीविष्णुपुराणस्य तृतीयांशस्था विशिष्टाः श्लोकाः | व्याख्यात्मकाः | २ | २ | ८×२= १६ | श्री विष्णुपुराणस्य तृतीयांशस्थेभ्यः विशिष्टश्लोकेभ्यो द्वौ श्लोकौ प्रौढी व्याख्यायाः कृते स्थापनीयौ, द्वावेव व्याख्येयौ । |
| च | श्रविष्णुपुराणस्य तृतीयांशस्था विषयाः | संक्षिप्तोत्तरापेक्षिणः | ३ | २ | ७×२= १४ | मैत्रेयपराशरसंवादप्रसङ्गे चतुर्दशमनुनामनिर्देशनपराका विषयाः, शक्रादिदेवर्षिप्रमुखानां नामनिर्देशनविषयकं वर्णनम्, चतुर्दशमनूनां विस्तरेण वर्णनं तथाष्टविंशतिसंख्यकानां व्यासानां वर्णनम्, ब्रह्मकृतभगवतत्स्तुतिः, ब्रह्मज्ञानमाहात्म्यकीर्तनम्, वेदानां |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | शाखाभेदवर्णनम्, याज्ञवल्क्यकृतगुरुपाठितयर्जुदत्यागप्रसङ्गवर्णनम्, याज्ञवल्क्येन सूर्यतः शुक्लयजुर्वेदाध्ययनवर्णनम्, तैत्तिरीययजुःशाखावर्णनम्, यजुर्वेदविभागवर्णनम्, नैमिनिकृतसामवेदशाखाविभागवर्णनन्तथा स्वशिष्येभ्योऽध्यापनविषयकं वर्णनम्, पुराणविभाजनवर्णनक्रमेऽष्टादशमहापुराणभेदकथपूर्वकं पुराणलक्षणकथनम्, उपपुराणौपपुराणादिवर्णनम्, चतुर्दशविद्याविभाग कथनम्, यमयातनाविषयकं वर्णनम्, भगवन्नाममाहात्म्य कथनम्,,चाचुवर्ण्यधर्मकथनम्, विस्तरेण ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसन्यासाद्याश्रमधर्मव र्णनम्, श्राद्धविषयकं विस्तरेण वर्णनम्, नग्नविषयकं वर्णनम्, |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | महामोहस्योत्पत्तितस्तत्कृतदैत्यमोहविषयकं वर्णनम्, महामोहकृतदैत्यपराजयविषयकं वर्णनम्, राज्ञः शतधन्वोर्वर्णनपर्यन्ताः विषयाः समाविष्टाः सन्ति प्रकरणेऽस्मिन् । एभ्यो विषयेभ्यः संक्षिप्तोत्तरापेक्षिणस्त्रयो प्रश्नाः प्रष्टव्याः, द्वौ समाधेयौ । |
| छ | श्रीमद्देवी भागवतपुराणस्य नवमस्कन्धस्य १-२५ अध्यायपर्यन्ता विषयाः | विवेचनात्म-काः | १ | १ | १२ | शक्तिवर्णनादारभ्य, पंचप्रकृतिसंभवः, देवतादिसृष्टिः, सरस्वतीस्तोत्रपूजादि वर्णनम्, धर्मात्मजेन नारदाय सर-स्वतीमहास्तोत्रकथनम्, पृथ्वीलोके लक्ष्मीगंगाभारतीनां जन्मविषयकं वर्णनम्, तासां कलौ वर्तनञ्च, तुलस्युपाख्यानम्, महालक्ष्म्या राजगृहे जन्मकथनम्, धर्मध्वजसुतायास्तुलस्याः कथाप्रसङ्गे शङ्खचूडेन तुलस्याः सङ्गतिकथनम्, शङ्खचूडस्य देवैः सह युद्धकथनम्, |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | शङ्खचूडमहेशयोर्युद्ध कथनम्, जनार्दनेन शङ्खचूडस्य कवचहरणम्, जनार्दनस्य तुलसीसङ्गवर्णनपुरस्सरं तुलसीमाहात्म्यकथनम्, महाभन्त्रसहिततुलसी पूजनवर्णनादिपर्यन्तेभ्यो विषयेभ्य एको विवेचनात्मकः प्रश्नः प्रष्टव्यः, समाधेयश्चैक एव । |
| ज | श्रीमद्देवी भागवतपुराणस्य नवमस्कन्धस्य<br>१-२५अध्यायपर्यन्ता विषयाः | संक्षिप्तोत्तरापेक्षणः | ३ | २ | ७×२= १४ | श्रीमद्देवीभागवतपुराणस्य नवमस्कन्धस्य १-२५ अध्यायपर्यन्तेभ्य उपर्युक्त विषयेभ्यस्त्रयः संक्षिप्तोत्तरापेक्षिणः पश्नाः प्रष्टव्याः, द्वौ समाधेयौ |
| झ | श्रीमद्देवी भागवतपुराणस्य नवमस्कन्धस्य<br>१-२५अध्यायपर्यन्ता विषयाः | अतिसंक्षिप्तोत्तरापेक्षिणः/वस्तुगताः | ४ | ४ | ४×१= ४ | श्रीमद्देवीभागवतपुराणस्य नवमस्कन्धस्य<br>१-२५ अध्यायपर्यन्तेभ्य उपर्युक्त विषयेभ्योऽतिसंक्षिप्तोत्तरापेक्षिणः पञ्च पश्नाः प्रष्टव्याः, द्वौ समाधेयौ । |

प्रश्नपत्रनिर्माणक्रमे प्रकरण “क” तथा प्रकरण “छ” सम्बद्धाः प्रश्ना एकत्रैव समावेश्य प्रस्तूयन्ते तथैव प्रकरण “ख” तथा प्रकरण “ङ” सम्बद्धा प्रश्ना अप्येकत्रैव प्रस्तूयन्ते तथैव प्रकरण “ग”, “च” तथा प्रकरण “ज” सम्बद्धा प्रश्ना अप्येकत्रैव प्रस्तूयन्ते पुनश्च प्रकरण “घ” तथा प्रकरण “झ” सम्बद्धाः प्रश्नाश्चैकत्रैव प्रस्तूयन्ते ।

## आदर्शप्रश्नपत्रम्

**पाठ्यांशनाम- विदुरतीर्थयात्रादिवर्णनम्, शक्तितत्त्ववर्णनं मन्वन्तरादिवर्णनं च**

**पाठ्यांशसंकेतः- इ.पु.४०२**

**कक्षा- शास्त्री** **पूर्णाङ्काः- १००**

**खण्डः- द्वितीयः** **उत्तीर्णाङ्काः- ४०**

**पत्रम्- चतुर्थम्** **समयः- घण्टात्रयम्**

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ! दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान्द्योतयन्ति ।

**१) विवेचनात्मकमुत्तरं दीयताम् !** **१२×२=२४**

क) यदुवंशसंहारकथनम् पाठ्यग्रन्थाधारेण प्रस्तूयताम् ।

अथवा

ब्रह्मोत्पत्तिकथनं पाठ्यगन्थानुसारेणोपस्थाप्यतम् ।

ख) गंगादीनां समुत्पत्तिप्रसङ्गमुल्लिख्यताम् ।

**३. अधोनिर्दिष्टपद्येषु यथेच्छया त्रयाणां पद्यानां प्रौढी व्याख्या विधेया !** **८×३=२४**

क) नातः परं परम यद्भवतः स्वरूप-मानन्दमात्रमविकल्पमविद्धवर्चः ।
पश्यामि विश्वसृजमेकमविश्वमात्मन् भूतेन्द्रियात्मकमदस्त उपाश्रितोऽस्मि ॥

**अथवा**

एकान्तलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः
श्रुतेश्च विद्वद्भिपाकृतायां कथासुधायामुपसम्प्रयोगम्

ख) स भिद्यते वेदमयस्स्ववेदं करोति भेदैर्बहुभिस्सशाखम् ।
शाखाप्रणेता स समस्तशाखा- ज्ञानस्वरूपो भगवानसङ्गः ॥

ग) सर्वे च देवा मनवस्समस्ता- स्सप्तर्षयो ये मनुसूनवश्च

इन्द्रश्च योऽयं त्रिदशेशभूतो विष्णोरशेषास्तु विभूतयस्ताः

**४. यथेच्छं षट्प्रश्नाः संक्षेपेण समाधेयाः ! ७×६=४२**

क) दितिकश्यपसंवादमुपस्थाप्यताम् ।

ख) पाठ्यग्रन्थाधारेण शक्तिवर्णनं क्रियताम् ।

ग) भगवत्कृतं सनकादीनां सान्त्वनं प्रस्तूयताम् ।

घ) शतरूपायाजन्मप्रसङ्गमुल्लिख्यताम् ।

ङ) सावर्ण्यादिमनूत्पत्तिवृत्तान्तमुपस्थाप्यताम् ।

च) देवीभागवतानुसारं देवानां वैकुण्ठगमनमुल्लिख्यताम् ।

छ) विष्णुपुराणानुसारं शौचविधानमुल्लिख्यताम् ।

ज) पञ्चमहायज्ञविधानमुपस्थापनीयम् ।

झ) महापुराणलक्षणं प्रस्तूयताम् ।

**५. सर्वेषां प्रश्नानामतिसंक्षिप्तोत्तराणि लिख्यताम् । १×१०=१०**

क) विराट्पुरूषः कतितत्वेन निर्मितोऽस्ति ?

ख) ध्रुवस्य पिता कः ?

ग) श्रीमद्भागवतस्य तृतीयस्कन्धे कति अध्यायाः सन्ति ?

घ) कस्य नामः स्वयम्भू ?

ङ) दितिः कस्य पुत्री ?

च) गणेशस्य मातुर्नाम किम् ?

छ) श्रीमद्भागवतस्यप्रणेता कः ?

ज) याज्ञवल्क्यस्य वेदवेदाङ्गगुरुः कः ?

झ) देवीभागवतानुसारेण शक्तिशब्दस्य “श” वर्णेन कोऽर्थो बुध्यते ?

ञ) तुलसी कस्य पत्नी आसीत् ?

# सर्वदर्शनम्

**पाठ्यांशनाम** - साङ्ख्य-योगदर्शनाध्ययनम्,

**पाठ्यांशसङ्केतः** -स.द.४०१

**स्तरः -** शास्त्री

**पूर्णाङ्काः** - १००

**खण्डः** - द्वितीयः

**वार्षिकः पाठ्यभारः** - १६० घण्टा

**पत्रम्** - तृतीयम्

**साप्ताहिकः पाठ्यभारः** - ६

## १. पाठ्यांशपरिचयः

पाठ्यांशोऽयं सर्वदर्शनविषयमधीयानानां छात्राणां कृते शास्त्रिद्वितीयवर्षस्य तृतीयपत्रत्वेन निर्धारितो वर्तते ।

अत्र पाठ्यांशे साङ्ख्यदर्शनाभिमतानि तत्त्वानि व्यक्ताव्यक्तज्ञाख्यानि, तेषां ज्ञानेनैव मुक्तिरिति विषयाः पाठ्यत्वेन समाविष्टाः सन्ति । अथ च योगदर्शनप्रतिपादितानि तत्त्वानि, साधनानि च पाठ्यत्वेन समाविष्टानि वर्तन्ते ।

पाठ्यांशश्चायं पञ्चसु प्रकरणेषु विभक्तो वर्तते । तत्र प्रथमप्रकरणे साङ्ख्यादर्शनप्रवृत्तिप्रयोजनम्, साङ्ख्यदर्शनाभिमततत्त्वानामुद्देशः, प्रमाणानि, सत्कार्यवादः, त्रिगुणनिरूपणम्, प्रकृतिपुरुषस्वरूपनिरूपणम्, तत्र क्रमे सृष्टिप्रक्रिया चैतावन्तो विषया निर्धारिता वर्तन्ते । द्वितीये च प्रकरणे साङ्ख्यदर्शनाभिमतमहदादितत्वानां निरूपणादारभ्य बन्धमोक्षव्यवस्थानिरूपणान्तविषयाश्च निर्धारिताः सन्ति । तृतीये च प्रकरणे साङ्ख्यज्ञानप्रयोजनप्रतिपादनादारभ्य साङ्ख्यदर्शनगुरुपरम्पराकथनान्तविषया निर्धारिताः सन्ति । एवं रीत्या चतुर्थे प्रकरणे पातञ्जलयोगसूत्रस्य समाधिपाद-साधनपादस्थाः विषयाः निर्धारिताः सन्ति । एवं रीत्या पञ्चमे च प्रकरणे पातञ्जलयोगसूत्रस्य विभूतिपाद-कैवल्यपादस्थाः विषयाः सन्निविष्टाः सन्ति । अत्र तावत् सामान्यविशिष्टोद्देश्यप्रकरणविभागशिक्षणविधिमूल्याङ्कनविधि-प्रश्नपत्रनिर्माणप्रक्रियापाठ्यग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि समाविष्टानि सन्तीति ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः सामान्यतयाधोनिर्दिष्टविषयेषु समर्था भविष्यन्ति -

- साङ्ख्यदर्शनाभिमततत्त्वज्ञाने, सत्कार्यवादावबोधने, प्रकृति-पुरुष-सृष्टिक्रमनिरूपणे च,
- साङ्ख्यदर्शनाभिमतमहदादितत्त्वज्ञाने बन्धमोक्षव्यवस्थाव्याख्याने च,

- साङ्ख्यदर्शनज्ञानप्रयोजनविज्ञाने साङ्ख्येतिहासावबोधने च,
- योगदर्शनस्य योगलक्षण-योगावश्यकता-चित्तवृत्तिविज्ञाने, चित्तवृत्तिनिग्रहोपायावबोधने, अष्टाङ्गयोगविज्ञाने च,
- योगसिद्धान्तविज्ञाने, सिद्धिप्राप्तेरुपायज्ञाने, योगदर्शनाभिमतकैवल्यस्वरूपावबोधने च ।

## ३. प्रकरणगतविशिष्टोद्देश्यानि अथ च पाठ्यविषयज्ञापनपूर्वकमङ्कानां पाठघण्टानाञ्च निर्देशनम्

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| (क) | साङ्ख्यदर्शनाभिमततत्त्वज्ञाने, प्रमाणनिरूपणे, सत्कार्यवादव्याख्याने, त्रिगुणस्वरूपवर्णने, प्रकृतिपुरुषस्वरूपविज्ञाने, सृष्टिक्रमविवेचने च सामर्थ्यसम्पादनम् । | साङ्ख्यकारिकाग्रन्थस्य प्रथमकारिकारभ्य द्वाविंशकारिकान्तस्थाः विषयाः । | २० | ३२ |
| (ख) | साङ्ख्यदर्शनाभिमतमहदादितत त्वानां वर्णने, अन्तःकरणविज्ञाने, शरीरेन्द्रियावबोधने, बुद्धिभेदनिरूपणे, द्विविधसर्गव्याख्याने, सृष्टिप्रयोजनविवेचने, बन्धमोक्षव्यवस्थावबोधने च नैपुण्यसम्पादनम् । | साङ्ख्यकारिकाग्रन्थस्य त्रयोविंशकारिकारभ्य त्रिषष्टितमकारिकान्तस्थ ाः विषयाः । | २० | ३२ |
| (ग) | साङ्ख्याज्ञानस्य प्रयोजनावबोधने, साङ्ख्यज्ञानस्य | साङ्ख्यकारिकाग्रन्थस्य चतुःषष्टितमकारिकारभ् य द्वासप्ततितमकारिकान्त | १० | १६ |

| | | | | |
|---|---|---|---|---|
| | प्रामाणिकताप्रतिपादने, साङ्ख्यदर्शनस्येतिहासवर्णने च । | स्थाः विषयाः । | | |
| (घ) | योगलक्षण-योगस्यावश्यकता-चित्तवृत्तिलक्षणानां व्याख्याने, अभ्यासवैराग्यसमाधिविषयाणां वर्णने, ईश्वरप्रणिधानविवेचने, चित्तस्य मनसश्च निग्रहोपायवर्णने, क्रियायोगस्यावबोधने, योगस्य अष्टाङ्गेषु आद्यपञ्चाङ्गानां व्याख्याने च सामर्थ्यार्जनम् । | पातञ्जलयोगसूत्रस्य समाधिपाद-साधनपादस्थाः विषयाः । | ३० | ४८ |
| (ङ) | योगस्य अष्टाङ्गेषु अन्त्यत्रिविधाङ्गानां व्याख्याने, चित्तस्य परिणामविषयविज्ञाने, भिन्नभिन्नसंयमानामवबोधने, विवेकज्ञानस्य तस्य परमफलरूपकैवल्यस्य च वर्णने, सिद्धिप्राप्तेरुपायविज्ञाने, कर्मफलप्राप्तेः प्रकारवर्णने, योगसिद्धान्तप्रतिपादने, | पातञ्जलयोगसूत्रस्य विभूतिपाद-कैवल्यपादस्थाः विषयाः । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | कैवल्यावस्थायाः निरूपणे च सामान्यसामार्थ्यसम्पादनम् । | | | |
| | | | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

### 'क'प्रकरणे

साङ्ख्यदर्शनप्रवृत्तेः प्रयोजनप्रदर्शनम्, दुःखत्रयनिरूपणम्, लौकिकवैदिकोपायनिरूपणम्, व्यक्ताव्यक्तज्ञपरिचयः, पञ्चविंशतितत्त्वोद्देशः, प्रमाणविभागः, प्रत्यक्षानुमानशब्दाख्यानां प्रमाणानां स्वरूपनिरूपणम्, प्रमाणैः विषयज्ञानप्रकारकथनम्, विद्यमानस्यापि वस्तुनः प्रत्यक्षाभावे कारणप्रदर्शनम्, प्रकृतेः प्रत्यक्षाभावे कारणप्रदर्शनम्, प्रकृतेः कार्याणि, सत्कार्यवादः, व्यक्ताव्यक्तयोः साम्यवैषम्यनिरूपणम्, व्यक्ताव्यक्तयोः साम्यस्य पुरुषस्य वैषम्यस्य च निरूपणम्, गुणत्रयकथनम्, गुणस्वभावनिरूपणम्, प्रकृतिसिद्धिः, पुरुषसिद्धिः, पुरुषबहुत्वसिद्धिः, पुरुषस्वभावनिरूपणम्, प्रकृतिपुरुषसम्बन्धनिरूपणम्, सृष्टिक्रमः ॥

### 'ख'प्रकरणे

महत्तत्त्वम्, अहङ्कारतत्वं तद्भेदाश्च, अहङ्कारादिन्द्रियाणामुत्पत्तिः, एकादश इन्द्रियाणि, मनः, इन्द्रियाणामन्तःकरणानाञ्च कार्याणि, करणचतुष्टयस्य वृत्तिः, करणानां प्रवृत्तिः, करणविभागः कार्याणि च, बाह्यान्तःकरणानां भेदः, इन्द्रियाणां विषयग्रहणप्रकारनिरूपणम्, करणानां गौणमुख्यभेदः, करणेषु बुद्धेः प्राधान्यम्, तत्त्वानां विशेषाविशेषभेदः, शरीरभेदः, सूक्ष्मशरीरनिरूपणम्, सूक्ष्मशरीरस्यावश्यकताप्रतिपादनम्, सूक्ष्मशरीरस्य प्रयोजनसंसरणशीलत्वप्रतिपादनम्, भावपदार्थभेदः, भावपदार्थानां कार्याणि, बुद्धिभेदाः, बुद्धेरवान्तरभेदाः, नवविधा तुष्टिः, अष्टविधा सिद्धिः, द्विविधसर्गः, भौतिकसृष्टिभेदः, सृष्टेः

पुरुषभोग्यत्वम्, प्रकृतेः सृष्टिकारणत्वं प्रयोजनञ्च, प्रकृतेः सृष्टौ प्रवृत्तिनिरूपणम्, सृष्टिप्रयोजननिरूपणम्, प्रकृतेः निवृत्तिनिरूपणम्, प्रकृतेः पुरुषोपकारिकत्वम्, साङ्ख्यज्ञानस्य आत्यन्तिकदुःखनाशकत्वम्, आत्मनो जन्ममरणादिदोषरहितत्वप्रतिपादनम्, आत्मनो बन्धमोक्षव्यवस्थानिरूपणम् ॥

**'ग'प्रकरणे**

साङ्ख्यज्ञानस्य प्रयोजनं फलञ्च, प्रकृतिपुरुषयोः संयोगेऽपि सृष्ट्यभावप्रतिपादनम्, ज्ञानानन्तरमपि संसारावस्था भवत्येवेति वर्णनम्, शरीरनाशानन्तरमेव मुक्तिः भवतीतिविवेचनम्, साङ्ख्यदर्शनस्य प्रामाणिकतानिरूपणम्, साङ्ख्यगुरुपरम्परा, कपिलपरिचयः, ईश्वरकृष्णपरिचयः, वाचस्पतिमिश्रपरिचयः, साङ्ख्यकारिकाग्रन्थस्य वैशिष्ट्यप्रतिपादनम् ॥

**'घ'प्रकरणे**

**योगसूत्रस्य समाधिपाद-साधनपादस्था विषयाः**

योगलक्षणम्, योगस्यावश्यकताप्रतिपादनम्, चित्तवृत्तीनां पञ्चभेदाः तेषां लक्षणानि च, अभ्यास-वैराग्यविवेचनम्, समाधिविषयाः, ईश्वरप्रणिधानं तत्फलञ्च, चित्तविक्षेपाः तेषां नाशोपायाः मनसः स्थैर्योपायाश्च, समाधेः फलं भेदाश्च, क्रियायोगस्य स्वरूपं फलञ्च, अविद्यादिपञ्चक्लेशानां वर्णनम्, क्लेशनाशोपायाः तेषामावश्यकतायाश्च प्रतिपादनम्, दृश्यद्रष्ट्रोः स्वरूपम्, दृश्यस्य सार्थकता, अविद्याकृतस्य प्रकृतिपुरुषसंयोगस्य स्वरूपप्रतिपादनम्, तत्संयोगस्य नाशोपायभूतविवेकज्ञानस्य निरूपणम्, विवेकज्ञानायाष्टाङ्गयोगस्यावश्यकताप्रतिपादनम्, योगस्य अष्टाङ्गानि, यम-नियम-आसन-प्राणायाम-प्रत्याहाराणां वर्णनम् ॥

**'ङ'प्रकरणे**

**योगसूत्रस्य विभूतिपाद-कैवल्यपादस्था विषयाः**

धारणा-ध्यान-समाधीनां निरूपणम्, समाधेः साधनभूतस्य संयमस्य निरूपणम्, चित्तस्य परिणामविषयाः, प्रकृतिजन्यपदार्थानां परिणामनिरूपणम्, फलस्य अन्येषाञ्च संयमानां वर्णनम्, विवेकज्ञानस्य तस्य परमफलरूपकैवल्यस्य च वर्णनम्, सिद्धिप्राप्तेरुपायाः, ध्यानजपरिणामानां संस्कारशून्यताप्रतिपादनम, योगिनां कर्मणः महिमाप्रतिपादनम्, साधारणजनस्य कर्मफलप्राप्तेः प्रकाराः, योगसिद्धान्तप्रतिपादनम्, विवेकज्ञानविषयाः, धर्ममेघसमाधिः, कैवल्यावस्थायाः निरूपणम्, योगदर्शनस्येतिहासः, पतञ्जलेः परिचयः, योगसूत्राणां वैशिष्ट्यम् ॥

## ५. शिक्षणविधिः शैक्षणिकसामग्री च

पाठ्यांशस्यास्य शिक्षणे व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणादयो विधयो प्रकरणानुसारेण प्रतिपाद्यविषयानुरूपेण चात्र प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुत्प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषयानुरूपाणां प्रयोगोऽपेक्षितः । अत्यावश्यके स्थितिविशेषे अन्तर्जालादिमाध्यमेन दूरशिक्षणमपि कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्रादीनि प्रयुज्यानि । तद्व्यवस्थापनं सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेयम् । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थापि कार्या । यथाकालं शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तद्व्यवस्थापनं विभागेन कार्यम् । तदर्थं विद्यापीठेन विश्वविद्यालयेन वा साहाय्यं विधेयम् ।

## ६. मूल्याङ्कनविधिः

आन्तरिक (निर्माणात्मक) बाह्य (निर्णयात्मक) भेदेन मूल्याङ्कनं द्विधा विभज्यते । आन्तरिकमूल्याङ्कनं मूलतः कक्षागतमेव भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायामान्तरिकमूल्याङ्कनं विधेयम् । गृहकार्य-कक्षापरीक्षापरियोजनाकार्यादीन्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुमर्हन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालयपरीक्षानियन्त्रण-कार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय

अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । बाह्यपरीक्षा लेखात्मिकैव भवति । । वार्षिकपरीक्षायाः कृते सति सम्भवे विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानां कृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया । तदर्थमधोनिर्दिष्टप्रकारेण प्रश्नपत्रनिर्माणं विधेयम् -

**वार्षिकपरीक्षार्थं प्रश्नपत्रनिर्माणप्रकारविवरणम्**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| क, ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| क, ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ | वस्तुगताः ( बहुवैकल्पिकाः) | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यसामग्रीसूची

### (क) पाठ्यग्रन्थौ

ईश्वरकृष्णः **साङ्ख्यकारिका** ।

पतञ्जलिः **योगसूत्रम्** ।

### (ख) सन्दर्भग्रन्थाः

ईश्वरकृष्ण सांख्यकारिका, नेपालीव्याख्यासहिता (व्या. पं छविलाल पोखेल, प्रकाशिका : श्रीमती बालकुमारी पोखेल, धरान, वि.सं. २०४२)

ईश्वरकृष्ण सांख्यकारिका, हिन्दीव्याख्यासहिता (व्या. डा. कृष्णमणित्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, सन् २०००)

ईश्वरकृष्ण सांख्यकारिका, गौडपादभाष्यसहिता (अनु. आचार्य जगन्नाथशास्त्री, मोतीलाल वनारसीदास, वाराणसी, सन् १९७५)

वाचस्पतिमिश्र साङ्ख्यतत्त्वकौमुदी, संस्कृतहिन्दीव्याख्योपेता (व्या. पं. ज्वालाप्रसादगौड, चौखम्बा सुरभारती प्रकाशन, वाराणसी, सन् २००४)

महर्षि पतञ्जलि **योगदर्शन** (हिन्दीव्याख्यासहित, व्या. हरिकृष्णदास गोयन्दका, गीताप्रेस, गोरखपुर, सन् २०७७ )

माधवाचार्यः **सर्वदर्शनसङ्ग्रहः** (चौखम्बा विद्याभवन, वाराणसी : सन् २०१४)

काशिकानन्दगिरिः **द्वादशदर्शनसङ्ग्रहः,** (श्रीस्वामी काशिकानन्दगिरिजी ट्रस्ट, मुम्बई, सन् १९८८ )

श्रीपादशास्त्री हसुरकरः **द्वादशदर्शनसोपानावलिः** ( गुड कम्पेनियन्स, बडोदरा, सन् १९९३)

चन्द्रधर शर्मा, **भारतीय दर्शन : आलोचना और अनुशीलन,** पुनर्मुद्रण, मोतीलाल वनारसीदास, दिल्ली, सन् १९९८ ।

पद्मप्रसाद भट्टराई, **पौरस्त्य दर्शन : एक चिनारी,** विद्यार्थी पुस्तक भण्डार, काठमाडौँ, वि. सं. २०७४ ।

प्रा. चूडानाथ भट्टराय **दर्शनसमुच्चयः** ( ........)

प्रा.डा. दीर्घराजघिमिरे **षड्दर्शनीसङ्ग्रहः** (.......)

# सर्वदर्शनम्

**पाठ्यांशनाम** - चार्वाकजैनबौद्धदर्शनाध्ययनम्
**पाठ्यांशसङ्केतः** - स.द.४०२
**स्तरः** - शास्त्री
**पूर्णाङ्काः** - १००
**खण्डः** - द्वितीयः
**वार्षिकः पाठ्यभारः** - १६० घण्टाः
**पत्रम्** - चतुर्थम्
**साप्ताहिकः पाठ्यभारः** - ६

## १. पाठ्यांशपरिचयः

पाठ्यांशोऽयं सर्वदर्शनविषयमधीयानानां छात्राणां कृते शास्त्रिद्वितीयवर्षस्य चतुर्थपत्रत्वेन निर्धारितो वर्तते ।

अत्र पाठ्यांशे चार्वाकजैनबौद्धदर्शनाभिमताः विषयाः पाठ्यत्वेन समाविष्टाः सन्ति । पाठ्यांशश्चाऽयं षट्षु प्रकरणेषु विभक्तो वर्तते । तत्र प्रथमप्रकरणे चार्वाकदर्शनसिद्धान्तः मुख्यविषयत्वेन सन्निविष्टः अस्ति । द्वितीये प्रकरणे जैनदर्शनाभितपदार्थाः, तद्दर्शनाभिमतप्रमाणानि, मुख्यवादाश्च पाठ्यांशत्वेन निर्धारिताः वर्तन्ते । तृतीये प्रकरणे बौद्धदर्शनान्तर्गतवैभाषिकसिद्धान्तः पाठ्यविषयत्वेन निर्धारितः अस्ति चेत् चतुर्थे प्रकरणे सौत्रान्तिकसिद्धान्तः पाठ्यविषयत्वेन निर्धारितः अस्ति । एवं रीत्या पञ्चमे प्रकरणे योगाचारसम्मतसिद्धान्तः पाठ्यविषयत्वेन निर्धारितः अस्ति चेत् षष्ठे प्रकरणे माध्यमिकसिद्धान्तः पाठ्यविषयत्वेन निर्धारितः अस्ति । अत्र तावत् सामान्य-विशिष्टोद्देश्यप्रकरणविभाग-शिक्षणविधि-मूल्याङ्कनविधि-प्रश्नपत्रनिर्माणप्रक्रियापाठ्यग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि समाविष्टानि सन्ति ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः सामान्यतयाधोनिर्दिष्टविषयेषु समर्था भविष्यन्ति -

- चार्वाकदर्शनसिद्धान्तावबोधने,
- जैनदर्शनसिद्धान्तव्याख्याने,
- बौद्धदर्शनान्तर्गतवैभाषिकमतप्रतिपादितविषयवर्णने,
- बौद्धदर्शनान्तर्गतसौत्रान्तिकमतवर्णितविषयाणां निरूपणे,
- बौद्धदर्शनान्तर्गतयोगाचारमतसिद्धान्तप्रतिपादने ।
- बौद्धदर्शनान्तर्गतमाध्यमिकमतसिद्धान्तव्याख्याने च ।

**३. प्रकरणगतविशिष्टोद्देश्यानि अथ च पाठ्यविषयज्ञापनपूर्वकमङ्कानां पाठघण्टानाञ्च निर्देशनम्**

| प्रकरणानि | **प्रकरणगतविशिष्टोद्देश्यानि** | **पाठ्यविषयाः** | **अङ्काः** | **पाठघण्टाः** |
|---|---|---|---|---|
| (क) | चार्वाकदर्शनारम्भबीजप्रतिपादने , एतद्दर्शनाभिमततत्त्वानां निरूपणे, एतद्दर्शनसम्मतप्रमाणनिरूपणे, आत्मतत्त्वविषयकसिद्धान्तावबोधने, इतरमतखण्डने च सामर्थ्यसम्पादनम् । | सर्वदर्शनसंग्रहस्य चार्वाकदर्शनप्रकरणे प्रतिपादिताः विषयाः । | १५ | २४ |
| (ख) | जैनदर्शनस्येतिहासवर्णनपूर्वकं तद्दर्शनाभिमतमुख्यसिद्धान्तानां विवेचने, अर्हत्स्वरूपनिरूपणे, श्वेताम्बरदिगम्बरभेदविवेचने, प्रमाणनिरूपणे, स्याद्वादसप्तभङ्गीन्यायादिविषय-व्याख्याने, जीव-अजीव-आस्रव-बन्ध-संवर-निर्जर-मोक्षस्वरूपाणां वर्णने, पुद्गलतत्त्वव्याख्याने च नैपुण्यसम्पादनम् । | सर्वदर्शनसंग्रह-द्वादशदर्शनसोपानावली-द्वादशदर्शनसङ्ग्रह-तत्त्वार्थसूत्रादिग्रन्थेषु निबद्धाः जैनदर्शनसम्बद्धाः विषयाः । | २५ | ४० |
| (ग) | वैभाषिकपरिभाषाविकासक्रमेतिहास- विज्ञाने, सर्वास्तिवादविज्ञाने, वैभाषिकाचार्याणां तत्कृतीनाञ्चेतिवृत्तावबोधने, बौद्धदर्शनान्तर्गतवैभाषिकमतावबोधने च नैपुण्यसम्पादनम् । | सर्वदर्शनसंग्रह-द्वादशदर्शनसोपानावली-द्वादशदर्शनसङ्ग्रह-बौद्धदर्शनमीमांसादिग्रन्थेषु निबद्धाः वैभाषिकमतसम्बद्धाः विषयाः । | १५ | २४ |

| | | | | |
|---|---|---|---|---|
| (घ) | सौत्रान्तिकपरिभाषाविकासक्रमेति हास-विज्ञाने, सौत्रान्तिकाचार्याणाणां तत्कृतीनाञ्चेतिवृत्तावबोधने, बौद्धदर्शनान्तर्गतवैभाषिकमताव बोधने च सामर्थ्यार्जनम् । | सर्वदर्शनसंग्रह-द्वादशदर्शनसोपानावली-द्वादशदर्शनसङ्ग्रह-बौद्धदर्शनमीमांसादिग्रन्थेषु निबद्धाः सौत्रान्तिकमतसम्बद्धाः विषयाः । | २० | ३२ |
| (ङ) | योगाचारविज्ञानवादमतैतिह्यवि ज्ञाने, योगाचाराचार्याणाणां तत्कृतीनाञ्चेतिवृत्तावबोधने, योगाचारविज्ञानवादमतावबोधने च सामर्थ्यार्जनम् । | सर्वदर्शनसंग्रह-द्वादशदर्शनसोपानावली-द्वादशदर्शनसङ्ग्रह-बौद्धदर्शनमीमांसादिग्रन्थेषु निबद्धाः योगाचारविज्ञानवादमत सम्बद्धाः विषयाः । | १५ | २४ |
| (च) | माध्यमिकशून्यवादमतैतिह्यवि ज्ञाने, माध्यमिकाचार्याणाणां तत्कृतीनाञ्चेतिवृत्तावबोधने, माध्यमिकशून्यवादमतावबोधने च सामर्थ्यार्जनम् । | सर्वदर्शनसंग्रह-द्वादशदर्शनसोपानावली-द्वादशदर्शनसङ्ग्रह-बौद्धदर्शनमीमांसादि-ग्रन्थेषु निबद्धाः माध्यमिकशून्यवाद-मतसम्बद्धाः विषयाः । | १५ | २४ |
| | | | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

### 'क'प्रकरणे

चार्वाकशब्दार्थः, चार्वाकदर्शनस्य इतिहासः, उपनिषदितिहासपुराणेषु उपलब्धानि चार्वाकमतबीजानि, चार्वाकदर्शनसम्मतानि पृथ्व्यप्तोजोवाय्वाख्यानि चत्वारि तत्त्वानि,

प्रत्यक्षप्रमाणम्, प्रत्यक्षातिरिक्तप्रमाणानां खण्डनम्, देहात्मवादः, पुनर्जन्मखण्डनम्, जडाच्चैतन्यस्योत्पत्तिप्रतिपादनम्, चैतन्यम्, वेदानामप्रामाण्याविचारः, स्वर्गनरकौ, पुरुषार्थः, ईश्वरः, मोक्षः ।

**'ख'प्रकरणे**

जैनशब्दार्थः, जैनदर्शनस्येतिहासः, तीर्थङ्कराः, जैनदर्शनस्याचार्याः, श्वेताम्बरदिगम्बरभेदः, अर्हत्स्वरूपनिरूपणं तत्साधनञ्च, जैनदर्शनसम्मतसप्तपदार्थाः, प्रमाणानि, स्याद्वाद-सप्तभङ्गीन्यायः, ईश्वरसाधकानुमाननिरसनम्, त्रीणि रत्नानि, पुद्गलतत्त्वम्, जीवस्वरूपम्, भावाः, अजीवस्वरूपम्, आस्रवस्वरूपम्, बन्धस्वरूपम्, संवरः, निर्जरः, मोक्षस्वरूपम्, जैनमतनिष्कर्षश्च ।

**'ग'प्रकरणे**

सर्वास्तिवादवैभाषिकपरिचयः, सर्वास्तिवादपरिभाषा, उद्भवविकासौ, वैभाषिकवादेपरिणतिश्च, वैभाषिकपरिभाषा, विकासः, चतुर्थबौद्धसंगीतिः, वैभाषिकाचार्यपरिचयः, वसुबन्धुः, सङ्घभद्रश्च, वैभाषिकमते धर्मवर्गीकरणम्, पञ्चस्कन्धाः, द्वादशायतनानि, अष्टादशधातवः, संस्कृतधर्मः, असंस्कृतधर्मः, प्रमाणविचारः, प्रत्यक्षप्रमाणनिरूपणम्, अनुमानप्रमाणनिरूपणम्, प्रत्यक्षानुमानप्रमाणलक्षणे इतरमतलक्षणखण्डनम्, प्रत्यक्षानुमानातिरिक्तप्रमाणनिरसनम् ।

**'घ'प्रकरणे**

सौत्रान्तिकपरिभाषा, उद्भवविकासौ, सौत्रान्तिकाचार्याः - भदन्त-स्थविर-धर्मोत्तर-श्रीलात-कुमारलात-वसुबन्धुप्रभृतयः तेषां कृतयश्च, संवृत्तिसत्यम्, परमार्थसत्यम्, क्षणभङ्गसिद्धिः, आर्यसत्यनिरूपणम्, बाह्यार्थविमर्शः, प्रमाणविचारश्च ।

**'ङ'प्रकरणे**

योगाचारविज्ञानवादपरिभाषा, उद्भवविकासौ, योगाचाराचार्याः - असंगः, मैत्रेयनाथः, वसुबन्धुः, स्थिरमतिश्च, तेषां कृतिपरिचयः - लङ्कावतारसूत्रम्, महायानसूत्रालङ्कारः, विज्ञप्तिमात्रतासिद्धिः, स्थिरमतित्रिंशिका, विज्ञप्तिमात्रता, विज्ञानपरिणामः, आलयविज्ञानम्,

विज्ञानात्मवादः, वेदना, आलम्बनम्, स्वभावः, व्यावृतिः, विज्ञानपरिणामः, संसारः, निर्वाणम्, प्रमाणविचारश्च ।

**'च'प्रकरणे**

माध्यमिकशब्दनिरूपणम्, एतन्मतोत्पत्तिः विकासश्च, शून्यवादपरिचयः, माध्यमिकाचार्याः - नागार्जुनः, आर्यदेवः, बुद्धपालितः, चन्द्रकीर्तिः, शान्तिदेवः, शान्तरक्षितः, कमलशीलश्च, माध्यमिकग्रन्थपरिचयः - मध्यमकशास्त्रम्, विग्रहव्यावर्तनी, तत्त्वसंग्रहः, तत्त्वसंग्रहपञ्जिका चेति, प्रत्ययपरीक्षा, आत्मपरीक्षा, शून्यात्मवादः, निर्वाणम्, प्रमाणविचारश्च ।

## ५. शिक्षणविधिः शैक्षणिकसामग्री च

पाठ्यांशस्यास्य शिक्षणे व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणाद्यः विधयो प्रकरणानुसारेण प्रतिपाद्यविषयानुरूपेण चात्र प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुत्प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषयानुरूपाणां प्रयोगोऽपेक्षितः । अत्यावश्यके स्थितिविशेषे अन्तर्जालादिमाध्यमेन दूरशिक्षणमपि कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्रादीनि प्रयुज्यानि । तद्व्यवस्थापनं सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेयम् । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थापि कार्या । यथाकालं शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तद्व्यवस्थापनं विभागेन कार्यम् । तदर्थं विद्यापीठेन विश्वविद्यालयेन वा साहाय्यं विधेयम् ।

## ६. मूल्याङ्कनविधिः

आन्तरिक(निर्माणात्मक)बाह्य(निर्णयात्मक)भेदेन मूल्याङ्कनं द्विधा विभज्यते । आन्तरिकमूल्याङ्कनं मूलतः कक्षागतमेव भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायामान्तरिकमूल्याङ्कनं विधेयम् । गृहकार्य-कक्षापरीक्षापरियोजनाकार्यादीन्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुमर्हन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालयपरीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते ।

बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । बाह्यपरीक्षा लेखात्मिकैव भवति । वार्षिकपरीक्षायाः कृते सति सम्भवे विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानां कृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया । तदर्थमधोनिर्दिष्टप्रकारेण प्रश्नपत्रनिर्माणं विधेयम् -

**वार्षिकपरीक्षार्थं प्रश्नपत्रनिर्माणप्रकारविवरणम्**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| क, ख,ग, घ, ङ, च | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ, च | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| क, ख,ग,घ,ङ, च | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ, च | वस्तुगताः ( बहुवैकल्पिकाः) | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यसामग्रीसूची

### (क) पाठ्यग्रन्थाः

माधवाचार्यः **सर्वदर्शनसङ्ग्रहः**, चार्वाकजैनबौद्धदर्शनप्रकरणानि ।

काशिकानन्दगिरिः **द्वादशदर्शनसङ्ग्रहः,** चार्वाकजैनबौद्धदर्शनप्रकरणानि ।

श्रीपादशास्त्री हसुरकरः **द्वादशदर्शनसोपानावलिः** चार्वाकजैनबौद्धदर्शनप्रकरणानि ।

रमाशंकरत्रिपाठी **सौत्रान्तिकदर्शनम्** ।

नागार्जुनः **मध्यमकशास्त्रम्** ।

**(ख) सन्दर्भग्रन्थाः**


जयराशिभट्टः — **तत्त्वोपप्लवसिंहः** (अनु. डा. काशीनाथ न्यौपाने, नेपाल प्रज्ञा प्रतिष्ठान, काठमाण्डौ, वि.सं. २०७० )

**चार्वाकदर्शन** (संकलक/अनुवादक प्रा. रेवतीरमण खनाल, जयतु संस्कृतम्, काठमाण्डौ, वि.सं. २०६९)

आचार्य उमास्वामी — **तत्त्वार्थसूत्रम्** ( व्या. डा. चन्द्रमणिनेपाल, जयतु संस्कृतम्, काठमाण्डौ, वि.सं. २०७३ )

मल्लिषेणः — **स्याद्वादमञ्जरी** (अनु. डा. काशीनाथ न्यौपाने, नेपाल प्रज्ञाप्रतिष्ठान, काठमाण्डौ, वि.सं. २०७१ )

**विज्ञप्तिमात्रतासिद्धि तथा भूमिका** (महेश तिवारी, चौखम्बा विद्याभवन, वाराणसी, सन् १९६७)

**विग्रहव्यावर्तनी** (स्वामी द्वारिकादासशास्त्री, बौद्ध भारती, वाराणसी, सन् १९९६)

आर्यसद्धर्म, — **लङ्कावतारसूत्रम्** (अनु. डा.काशीनाथ न्यौपाने, जयतु संस्कृतम्, काठमाण्डौ, वि.सं. २०६८ )

चन्द्रधर शर्मा, — **भारतीय दर्शन : आलोचना और अनुशीलन,** (मोतीलाल वनारसीदास, दिल्ली, सन् १९९८ )

बलदेव उपाध्यायः — **बौद्धदर्शनमीमांसा** (शारदा मन्दिर, वाराणसी, सन् १९९९)

प्रा. पद्प्रसादभट्टराई — **पौरस्त्यदर्शन : एक चिनारी** (विद्यार्थी पुस्तक भण्डार, काठमाण्डौ, वि.सं. २०७४)

प्रा. चूडानाथ भट्टराय — **दर्शनसमुच्चयः** ( ........)

प्रा. डा. दीर्घराजघिमिरे — **षड्दर्शनीसङ्ग्रहः** (.......)

# बौद्धदर्शनम्

**पाठ्यांशनाम** – माध्यमिकदर्शनाध्ययनम्

**पाठ्यांशसङ्केतः** बौ.द.४०१

**स्तरः** – शास्त्री

**पूर्णाङ्काः** – १००

**वर्षः** – द्वितीयः

**वार्षिकः पाठ्यभारः - १६५ घण्टा**

**पत्रम्**– तृतीयम्

**साप्ताहिकः पाठ्यभारः – ६**

**१. पाठ्यांशपरिचयः**

पञ्चसु प्रकरणेषु विभक्तोऽयं पाठ्यांशः । ऐच्छिककवर्गे बौद्धदर्शनादिसंस्कृतशास्त्रीयविषयमधीत्य उत्तरमध्यमा-स्तरपरीक्षां तत्समकक्षान्यपरीक्षां वा समुत्तीर्य शास्त्रिस्तरेऽध्येतुकामा ये छात्राः विद्यापीठे प्रविष्टाः सन्ति तेषां कृते तृतीयपत्रत्वेन पाठ्यांशोऽयं निर्धारितः ।

पञ्चप्रकरणेषु विभक्ते माध्यमिकदर्शनाध्ययनात्मके पाठ्यांशेकप्रकरणे माध्यमिकशब्दनिरूपणोत्पत्ति-माध्यमिकस्रोतः, परिचयः प्रज्ञापारमिता सूत्रादिज्ञानग्रन्थसम्पदाचार्याणां वैशिष्ट्यम्, माध्यमिकैतियविषयाणां ज्ञानं परिकल्पितं विद्यते । खप्रकरणे च विग्रहव्यावर्तनी ग्रन्थस्य पड्विधपूर्वोत्तरपक्षौ पाठ्यत्वेनोपस्थापितौ वर्तेते । प्रकरणमिदमधीत्य छात्राः परमतं खण्डनपूर्वकं स्वसिद्धान्तस्थापनादिकार्ये पारङ्कता भविष्यन्ति । मध्यमकशास्त्राध्ययनात्मके गप्रकरणे प्रत्ययपरीक्षा, गतागतपरीक्षा, चक्षुरादीन्ियपरीक्षा, स्कन्धपरीक्षा, धातुपरीक्षा, रागरक्तपरीक्षा, संस्कृतपरीक्षा, कर्मकारकपरीक्षा, पूर्वपरीक्षा, अग्नीन्धनपरीक्षा, पूर्वापरकोटिपरीक्षा चेति विषयाः पाठ्यांशत्वेन निर्धारिताः सन्ति । घप्रकरणे च दुःखपरीक्षा, संस्कारपरीक्षा, संसर्गपरीक्षा, स्वभावपरीक्षा, बन्धमोक्षपरीक्षेति विषयाणां सम्यक ज्ञानं भवेदिति धिया ते विषया निर्धारिताः तस्मात् छात्राः तत् तत् विषयाणां ज्ञाने व्याख्यानेच प्राविण्यमेष्यन्ति । माध्यमिकदर्शनस्य महत्त्वप्रकाशने छात्रेषु पारङ्कतत्वं भवेदिति धिया कर्मफलपरीक्षा, आत्मपरीक्षा, संभवविभवपरीक्षा, तथागतपरीक्षा, विपर्यासपरीक्षा, आर्यसत्यपरीक्षा, निर्वाणपरीक्षा, दृष्टिपरीक्षा चेति विषया ङप्रकरणे पाठ्यत्वेन निर्धारिताः । उक्त विषयाणामध्ययनेन छात्रा माध्यमिकदर्शनज्ञाने व्याख्याने च क्षमा भविष्यन्ति । अतः पाठ्यांशस्याध्ययनेन छात्राः पाठ्यक्रमनिर्धारितोद्देश्यपूर्तये क्षमा भविष्यन्ति ।

## २. पठ्यांशस्य सामान्योद्देश्यम्–

अस्य पाठ्यांशस्याध्ययनेन छात्रा अधोलिखितविषये प्रावीण्यमेष्यन्ति

- माध्यमिकशब्दोत्पत्तिज्ञाने व्याख्याने च,
- माध्यमिकस्रोतसां विज्ञाने विवेचने च,
- प्रज्ञापारमितासूत्रावबोधे व्याख्याने च ,
- माध्यमिकदर्शनभेदज्ञाने(स्वातन्त्रिकप्रासङ्गिकयोरवगमे) व्याख्याने च,
- नागार्जुनार्यदेवबुद्धपालितभावविवेकचन्ऽकीर्तिप्रभृत्याचार्याणामितिवृत्तावबोधेतेषां वैशिष्ट्यव्याख्याने च,
- माध्यमिकशास्त्रे प्रतिवादितविषयाणां बोधे विवेचने च।
- शून्यतायाः पूर्वपक्षे षड्विधपक्षाणां कौशलार्जने, तेषामुत्तरदाने च।

## ३. पठ्यांशस्य विशिष्टोद्देश्यं पाठ्य विषयसंयोजनञ्च

| **प्रकरणानि** | **प्रकरणगतविशिष्टेद्देश्यानि** | **पाठ्यांशः** | **अङ्काः** | **पाठ–घण्टा** |
|---|---|---|---|---|
| क | माध्यमिकदर्शनस्यैतिहास – सम्बद्धानां विषयाणां ज्ञानं व्याख्यानञ्च | **१) माध्यमिकदर्शनस्यैतिहासः–** माध्यमिकशब्दनिरुपणम्, उत्पत्तिः, माध्यमिकदर्शनस्रोतोभूतप्रज्ञापारमिता सूत्रम्, माध्यमिकविकासः, माध्यमिकभेदौ– स्वातन्त्रिकः प्रासङ्गिकश्च, शून्यवादः, अर्थोपयोगलक्षणानि, संवृत्तिसत्यं परमार्थसत्यञ्च। **२) माध्यमिकाचार्याणां वैशिष्ट्यम्** नागार्जुनः आर्यदेवः, बुद्धपालितः, भावविवेकः, चन्द्रकीर्तिः, शान्तिदेवः, शान्तरक्षितः, कमलशीलश्च। | १५ | २४ |

| | | | | |
|---|---|---|---|---|
| | | **३) माध्यमिकप्रमुखग्रन्थानां वैशिष्ट्यम्**<br>मध्यमकशास्त्रम्, विग्रहव्यावर्तनी, चतुस्तवः, चतुःशतकम्, प्रसन्नपदा, तत्त्वसंग्रहः, तत्त्वसंग्रहपञ्जिका चेति । | | |
| ख | माध्यमिकपूर्वोत्तरपक्षयोरवबोधनं विवेचनञ्च | (विग्रहव्यावर्तन्यध्ययनम्<br>पूर्वपक्षः १. भावानां निःस्वभावता न युक्ता २. भावनां सस्वभावता युक्ता, ३.प्रतिषेधासिद्धेः, ४. प्रतिषेध्यासिद्धेः ५.सिद्धान्तपक्षः १. भावानां शून्यता युक्ता, २. इतो=पि भावान शून्यता युक्ता, प्रतिषेधसिद्धिर्न युक्ता। | १० | १५ |
| ग | | **मध्यमकशास्त्राध्ययनम्**<br>**१)** प्रत्ययपरीक्षा–प्रतीत्यसमुत्पादस्य विशेषणानि,भावानामुत्पत्तिः, चत्वारप्रत्ययाः, अप्रत्यवती क्रिया, हेत्वालम्बनान्तराधिपतिप्रत्ययानां निरोधः, प्रत्ययफलं तन्निरोधश्च।<br>२) **गतागतपरीक्षा**-गतिनिरोधः, चेष्टायां गतिः, गमनद्वयम्, गन्तुः स्थितिनिरोधः, त्रिविधगमननिरोधश्च ।<br>**३ चक्षुरादीन्द्रियपरीक्षा-** षडिन्ियानि, दर्शननिरोधः<br>**४ स्कन्धपरीक्षा**–रूपनिरोधः, रूपकारणनिरोधः, वेदनानिरोधः, | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | | **५ धातुपरीक्षा-**धातुनिरोधः, लक्ष्यलक्षणनिरोधः, भावाभावनिरोधः,<br>**६ रागरक्तपरीक्षा**–रागनिरोधः, रक्तनिरोधः,<br>**७ संस्कृतपरीक्षा-** संस्कृतनिरोधः, उत्पादस्थितिभङ्गनिरोधः, निरोधनिषेधः<br>**८ कर्मकारकपरीक्षा-** कर्ताकर्मक्रियानिरोधः, उभयरूपकर्मनिरोधः,<br>**९ पूर्वपरीक्षा-** दर्शनादिनिरोधः, ऽष्टाश्रोतावेदकविचारः, दर्शनश्रवणवेदनानिरोधः<br>**अग्नीन्धनपरीक्षा-** अग्नीन्धनयोर्भेदनिरोधः, सिद्धासिद्धयोर्निरोधः,<br>२ **पूर्वापरकोटिपरीक्षा-** आदिरन्तनिरोधः, जतिजरामरणनिरोधः, | | |
| घ | माध्यमिकदर्शनस्य ज्ञानं व्याख्यानञ्च | **मध्यमकशास्त्राध्ययनम्**<br>**१दुःखपरीक्षा**–स्वकृतदुःखनिरोधः, परकृतदुःखनिरोधः,<br>**२संस्कारपरीक्षा-** मोषधर्मानाममृषात्वम्, भावनां निःस्वभावता, भावानां शून्यता, अन्यथा भावनिरोधः, सर्वदृष्टिनां शून्यता | १५ | २४ |

| | | | | |
|---|---|---|---|---|
| | | **३ संसर्गपरीक्षा-** अन्योन्यसंसर्गनिरोधः,<br><br>४ **स्वभावपरीक्षा-** भावस्वभावनिरोधः, अस्तित्वनस्तित्वविरोधः<br><br>**५ बन्धमोक्षपरीक्षा**–संस्कारानाम नित्यानित्यनिरोधः, पुद्गलनिरोधः, उपादननिरोधः, संस्काराणां बन्धमोक्षनिरोधः, बन्धमोक्षनिरोधः, निर्वाणस्योपादनग्रहः, | | |
| ङ | माध्यमिकदर्शनस्य ज्ञानं महत्त्वप्रकाशनञ्च | **मध्यमकशास्त्राध्ययनम्**<br><br>१) **कर्मफलपरीक्षा-**कर्मणः त्रैविध्यम्, कर्मकर्तानिरोधः, कर्मफलनिरोधः,<br><br>२) **आत्मपरीक्षा-**आत्मनिरोधः, आत्मीयत्वनिरोधः, सत्कायदृष्टिः, आत्मभाव–अनात्मभावयोर्निरोधः, तत्त्वलक्षणम्,<br><br>**३) संभवविभवपरीक्षा**– सम्भवविभवनिरोधः, सिद्धिनिरोधः, स्वतभाव– परभावयोर्निरोधः, भवनिरोधः<br><br>**४) तथागतपरीक्षा-**तथागतनिरोधः शून्याशून्ययोर्निरोधः तथागतस्य निःस्वभावता<br><br>५) **विपर्यासपरीक्षा-**क्लेशानां अतत्त्वत्वम्, शुभाशुभकर्मनिरोधः, | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | | नित्यानित्ययोर्निरोधः, आत्मनः शुचित्वरोधः, विपर्यासनिरोधनादविद्या निरोधः<br><br>**६) आर्यसत्यपरीक्षा-** सत्यद्वयम्, सर्वस्वभावशून्यत्वम्, उत्पाद-निरोधयोः प्रतिषेधः, सर्वधर्मशून्यत्वम्, दःखस्यास्वभावता, आर्यसत्यनिरोधः, प्रतीत्यसमुत्पादनिरोधः, शून्यतानिरोधः, जगतः स्वभावनिरोधः, अशून्यनिरोधः,<br><br>**७) निर्वाणपरीक्षा-** निर्वाणलक्ष्यणम्, निर्वाणस्य भावत्वनिषेधः, निर्वाणस्याभावत्वनिषेधः, निर्वाणस्य भावाभावयोर्निरोधः, संसारनिर्वाणयोरेकत्वम्,<br><br>**८) दृष्टिपरीक्षा-** दृष्टिनिरोधः, दृष्टिचतुष्टयनिरोधः, शाश्वतादिदृष्टिचतुष्टयनिरोधः, परलोकनिरोधः, सर्वभावानां शाश्वतत्वनिरोधः | | |

## ४. शिक्षणविधयः

शैक्षिकसामग्री च निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदिरा अन्वेषणपरियोजनयोः प्राक्कल्पनाछात्रकेन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते। यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः। विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते ।

तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया।

## ५. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – आन्तरिकं (निर्माणात्मकम्) बाह्यम् ( निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते। गृहकार्यं कक्षा परीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति। प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्या प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति।

### (क) वार्षिक–प्रश्नपत्रनिर्माण–सारिणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| ग, ङ (१+१ २) | विवेचनात्मकाः | ३ | २ | २४ |
| क,ख,ग,घ,ङ (२+१+१+१+१ ६) | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| ग,घ,ङ (१+१+१ ३) | व्याख्यात्मकाः | ४ | ३ | २४ |
| क,ख,ग,ङ (१+३+३+३ १०) | वस्तुगताः | १० | १० | १० |
| | | २६ | २१ | १०० |

**पाठ्यग्रन्थाः**


१)**नागार्जुनीयं मध्यमकशास्त्रम्,** परशुरामशर्मा वैद्य, मिथिला विद्यापीठः, दरभंगा, १९६०।

२. **विग्रहव्यावर्तनी**- स्वामी द्वारिकादासशास्त्री (सम्पा) बौद्धभारती, वाराणसी, १९९४(इ.सं.)

३.**विग्रहव्यावर्तनी और मध्यमकशास्त्र,** यशदेवशल्य, मोतिलाल बनारसीदास, दिल्ली, १९९०।


**सन्दर्भग्रन्थाः**


४. **शून्यतासप्तति** :- आचार्य सेम्पादोर्जे, केन्दीय उच्च तिब्बती शिक्षा संस्थान, सारनाथ, वाराणसी,१९९६ (इ.सं.)

५. **सुहल्लेख**:- स्वामी द्वारिकादास शास्त्री, बौद्धभारती वाराणसी,१९९५(इ.सं.)

६.**बौद्धदर्शनम्**- देवीप्रसाद, मोतीलाल बनारसीदास, वाराणसी, सन् १९९६।

७.**बौद्धदर्शनमीमांसा** - बलदेव उपाध्याय, चौखम्बा विद्याभवन वाराणसी, १९७८।

८. **बौद्धदर्शन प्रस्थान** - रामशंकर त्रिपाठी, केन्द्रीय तिब्वती उच्चशिक्षा संस्थान, वाराणसी, १९९७।

# बौद्धदर्शनम्

**पाठ्यांशनाम** – योगाचारदर्शनम्

**पाठ्यांशसङ्केतः** बौ.द.४०२

**स्तरः** – शास्त्री

**पूर्णाङ्काः –** **१००**

**वर्षः** – द्वितीयः

**वार्षिकः पाठचभारः - १६५ घण्टा**

**पत्रम्**– चतुर्थम्

**साप्ताहिकः पाठचभारः – ६**

**१. पाठ्यांशपरिचयः**

पञ्चषु प्रकरणेषु विभक्तोऽयं पाठ्यांशः । शास्त्रिस्तरे ऐच्छिककवर्गे बौद्धदर्शनविषयमध्येतुकामा ये छात्राः विद्यापीठे प्रविष्टाः सन्ति तेषां कृते चतुर्थपत्रत्वेन पाठ्यांशोऽयं निर्धारितः ।

योगाचारदर्शनात्मके विषमेऽस्मिन् कप्रकरणे योगाचारदर्शनस्यैतिह्यवैशिष्ट्यत्वस्थापनपुरस्सरं तदाचार्याणां योगदानं तेषां ग्रन्थानाञ्च विशिष्टज्ञानं परिकल्पितं वर्तते । खप्रकरणे च देशकालादिनियममवलम्ब्याऽऽक्षेपः, परमाणुवादखण्डनम्, स्वप्नजाग्रद् विषययोर्विभेदो विज्ञतिमात्रतायाः सिद्धिश्चेति विषयाः समाविष्टाः सन्ति। योगाचारदर्शनस्य सिद्धान्तानामवबोधात्मके गप्रकरणे त्रिविधविज्ञानपरिणामः, आलयविज्ञानवर्णना, विज्ञानोत्पत्तिः, षट्क्लेशाः, त्रिविधस्वभावः, धर्मकामश्चेति विषयाः सन्निविष्टाः । प्रकरणस्याध्ययनेन छात्रा तत् तत् विषयावबोधे प्राविण्यं लप्स्यन्ते । तत्र पुनः घप्रकाणे योगाचारदर्शनेन स्वीकृतानां पदार्थानां ज्ञाने व्याख्याने च छात्रेषु दक्षत्वं स्यादिति धिया योगाचारदर्शनस्याधारभूते मध्यान्तविभागशास्त्रे वर्णिताः सदसल्लक्षणम्, स्वलक्षणम्, प्रवृत्तिलक्षणम्, संक्लेशलक्षणम्, नवसंयोजनावरणानि, बोधिसत्त्वावरणम्, चतुस्सत्यार्थः, संस्कृतासंस्कृताथश्चेति विषयाः समाविष्टाः सन्ति। तथा च ङप्रकरणे प्रतिपक्षभावना, तस्यावस्था, तस्यैव फलप्राप्तिः, त्रिविधानुत्तर्यमालम्बनानुत्तर्यसमुदागमानुत्तर्यशास्त्रनामव्याख्यानञ्चेति विषयाः निर्धारिताः सन्ति ।

योगा चार- विज्ञानवादाधेतृणां छात्राणाङ्कृते विशिष्टज्ञानाय आवश्यकानि विषयवस्तुनि पत्रेऽस्मिन् पाठ्यत्वेन निर्धारितानि । विषमस्यास्याध्ययनेन छात्राः पाठ्यक्रमे निर्धारितोद्देश्यपूर्तये क्षमा भविष्यन्ति ।

## २. पाठचांशस्य सामान्योद्देश्यम्–

अस्य पाठचांशस्याध्ययनेन छात्रा अधोलिखितविषये प्रावीण्यमेष्यन्ति

- योगाचारविज्ञानवादाध्ययनक्रमे विस्तृतैतिह्यविज्ञाने, आचार्याणामितिवृत्तविज्ञाने, तेषां ग्रन्थानां वैशिष्ट्यमवबोधे व्याख्याने च,
- विज्ञप्तिमात्रताया विषयज्ञाने तदीयपरिणतिव्याख्याने,
- क्लिष्टमनोऽवबोधे, प्रवृत्तिविज्ञाने, तदीयभेदोपभेदज्ञाने विवेचने च,
- क्लेशोपक्लेशादिविज्ञाने व्याख्याने च ,
- वस्तुस्वभावः परतन्त्र-परिकल्पित-परिनिष्पन्नादिवस्तूनामवबोधे विवेचनेच

## ३. पठचांशस्य विशिष्टोद्देश्यं पाठच विषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठचांशाः | अङ्काः | पाठ-घण्टाः |
|---|---|---|---|---|
| क | योगाचारदर्शनस्यैतिह्यवैशिट्यो र्विज्ञानं व्याख्यानञ्च | १) **योगाचारः विज्ञानवादपरिभाषा, उद्भवः, विकासः,**<br>२) **योगाचाराचार्यपरिचयो वैशिष्ट्यञ्च**-असंगः, मैत्रेयनाथः, वसुबन्धुः, स्थिरमतिः,<br>**३.योगाचारग्रन्थवैशिष्ट्यम्-** लङ्कारवतारसूत्रम्, महायानसूत्रालङ्कारः, विज्ञप्तिमात्रतासिद्धिः (विंशतिका, त्रिशंतिका च), स्थिरमतिः त्रिंशिका भाष्यञ्च । | १० | ३३ |
| ख | विज्ञप्तिमात्रतायाविषयज्ञानं व्याख्यानञ्च | विज्ञानस्य स्थापना, देशकालदिनियममवलम्ब्यआक्षेप:,तस्य परिहारः, भगवतो वचनोपरि शंका, तस्य | १५ | ३२ |

| | | | | |
|---|---|---|---|---|
| | | समाधानम्, पुद्गतधर्मनैरात्यवर्णनम्, परमाणुवादखण्डनम् , प्रत्यक्षत्वं कथम् ? स्मृतिः कथम् ? स्वप्नजाग्रद्विषयोर्विभेदः, मनोदण्डस्य सिद्धिः, विज्ञप्तिमात्रतायाः सिद्धिश्चेति । | | |
| ग | योगाचारदर्शनस्य सिद्धान्तानामवबोधनं विवेचनञ्च | त्रिंशिकाप्रकरणस्य प्रयोजनम्, विविधोपचारणं मिथ्यात्वम्, त्रिविधविज्ञानपरिणामः, आलयविज्ञानवर्णना, मननारव्यो द्वितीयपरिणामः, तृतीयपरिणामः, पञ्चसर्वत्रगाः चैत्ताः, षड्विनियताः चैत्ताः, एकादश कुशलाःचैत्ता, षट् क्लेशाः, चतुर्विंशतिरुपक्लेशाः, विज्ञानोत्पत्ति, षट् क्लेशाः, चतुर्विंशतिरुपक्लेशाः, विज्ञानोत्पात्तिः कथम्? सर्वं विज्ञप्तिमात्रकम्, विज्ञप्तिमात्रे प्रतिसन्धिनियमः, त्रिविधस्वभावः, त्रिविधा निःस्वभावता, आश्रयपरावृत्तिः, विमुक्तिकायः, धर्मकायश्च । | ३० | ५० |
| घ | योगाचारदर्शनस्वीकृतपदाथानां ज्ञानं व्याख्यानञ्च | मङ्गलाचारः, शास्त्रशरीरम्, **अभूतपरिकल्पः**-सदसल्लक्षणम्, स्वलक्षणम्, सङ्ग्रहलक्षणम्,असल्लक्षाणानुप्रवेशोपायलक्षणम् प्रभेदलक्षणम्, पर्यायलक्षणम्, प्रवृत्तिलक्षणम्, | ३० | ५० |

| | | | | |
|---|---|---|---|---|
| | | संक्लेशलक्षणम्, **व्याप्यादिपञ्चावरणानि**, **नवसंयोजनावरणानि**, **बोधिसत्त्वावरणम्**- दशशुभादिष्वावरणम्, बोधिपक्ष्येष्वावरणानि, पारमितास्वावरणानि, भूमिष्वावरणानि, **आवरणसमासः**, **आवरणपिण्डार्थः,तत्त्वप्रभेदः, मूलत्त्वम्, लक्षणम्, अविपर्यासः, फलहेतु, औदारिक सूक्ष्म, प्रसिद्ध, विशुद्धिगोचरः, सङ्ग्रहः, प्रभेदः, कौशल्यतत्त्वम्**- स्कन्धार्थः, धात्वर्थः, आयतनार्थः, प्रतीत्यसमुत्पादार्थः, स्थानास्थानार्थः, इन्द्रियार्थः, अध्वार्थः, चतुस्सत्यार्थः, संस्कृतासंस्कृतार्थः, | | |
| ङ | | **प्रतिपक्षभावना**- चत्वारि स्मृत्युपस्थानानि, चत्वारि सम्यक्प्रहाणानि,चत्वार ऋद्धिपादाः, पञ्च दोषाः, अष्टौ प्रहाणसंस्काराः, पञ्चेन्द्रियाणि, पञ्च बलानि,सप्त बोध्यङ्गानि, अष्टौ मार्गाङ्गानि, प्रतिपक्षभावनाप्रभेदः **तत्रावस्था** | १५ | |

| | | | | |
|---|---|---|---|---|
| | | **फलप्राप्तिः**<br>**त्रिविधानुत्तर्यम्**प्रतिपत्त्यानुत्तर्यम्, परमां प्रतिपत्तिः, मनसिकारप्रतिपत्तिः, अनुधर्मप्रतिपत्तिः, अविक्षेपपरिणता, अविपर्यासपरिणता,दश वज्रपदानि, अन्तद्वयवर्जने प्रतिपत्तिः, विशिष्टा चाऽविशिष्टा च, प्रतिपत्तिः<br>**आलम्बनानुत्तर्यम्**<br>**समुदागमानुत्तर्यम्**<br>**शास्त्रनामव्याख्यानम्** | | |

## ४. शिक्षणविधयः

शैक्षिकसामग्री च निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदिरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

## ५. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – आन्तरिकं (निर्माणात्मकम्) बाह्यम् ( निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षा परीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं

शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

(क) वार्षिक-प्रश्नपत्रनिर्माण-सारिणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| ग, घ (१+१=२) | विवेचनात्मकाः | ३ | २ | २४ |
| क,ख,ग,घ,ङ (१+२+१+१+१=६) | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| ग,घ,ङ (१+१+१=३) | व्याख्यात्मकाः | ४ | ३ | २४ |
| क,ख,ग,घ (१+३+३+३=१०) | वस्तुगताः | १० | १० | १० |
| | | २६ | २१ | १०० |

**पाठ्यग्रन्थाः**

१. **विज्ञप्तिमात्रतासिद्धिः** तथा भूमिका, महेश तिवारी, चौखम्बा विद्याभवन वाराणसी, १९६७

२. **विज्ञप्तिमात्रतासिद्धिः**, रामशंकर त्रिपाठी एवं छोगडुग शास्त्री, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी ।

३.**मध्यान्तविभागशास्त्रम्**- स्वामी द्वारिकादास शास्त्री,बौद्ध भारती, वाराणसी,१९९४(ई.सं.)

**सदर्भग्रन्थाः**

१.**लङ्कावतारसूत्रम्,** काशीनाथ न्यौपाने, अनु. काठमाडौँ : जयतु संस्कृतम्, वि.सं.

२. **बौद्धदर्शनम्**- देवीप्रसाद, मोतीलाल बनारसीदास, वाराणसी, सन् १९९६ ।

३.**बौद्धदर्शनमीमांसा** - बलदेव उपाध्याय, चौखम्बा विद्याभवन वाराणसी, १९७८ ।

४. **बौद्धदर्शन प्रस्थान** - रामशंकर त्रिपाठी, केन्द्रीय तिब्वती उच्चशिक्षा संस्थान, वाराणसी, १९९७ ।

५. **बौद्ध धर्म के विकास का इतिहास**,चतुर्थ संस्करण, गोविन्द चन्द्र पाण्डे, उत्तर प्रदेश हिन्दी संस्थान, लखनउ, २००६ ।

६. **बौद्धधर्म के २५०० वर्ष**-पी.वी. बापट, सूचना विभाग, भारत सरकार, २०१० इ.सं.

६. **बौद्धधर्मदर्शन** आ. नरेन्द्रदेव, मोतिलाल बनारसीदास पब्लिशर्स, प्राइवेट लिमिटेड, दिल्ली, पु.मु, २०११ ।

# तन्त्रम्

**पाठ्यांशनाम** – साङ्ख्यसिद्धान्त–पातञ्जलयोग–कुण्डलिनीयोगविमर्शः

**पाठ्यांशसङ्केतः** -तन्त्र.४०१

**स्तरः** – शास्त्री

**पूर्णाङ्काः** – १००

**वर्षः** – द्वितीयः

**वार्षिकः पाठ्यभारः** - १६५ घण्टाः

**पत्रम्**– तृतीयम्

**साप्ताहिकः पाठ्यभारः** – ६

## १. पाठ्यांशपरिचयः

शास्त्रीकक्षायां तन्त्रविषयं पिपठिषूणां छात्राणां कृते निर्धारितोऽयं पाठ्यांशः पञ्चषु प्रकरणेषु विभक्तो वर्तते । साङ्ख्यशास्त्रसम्मतज्ञानमीमांसायाः समीक्षणे, साङ्ख्यशास्त्रोपस्थापितसर्गक्रम–बन्धमुक्तिविवेकपरिज्ञाने, पातञ्जलसूत्रोक्तदृष्ट्या समाधि–तत्साधन–विभूति–कैवल्यस्वरूपविश्लेषणे, षट्चक्र–कुण्डलिनीस्वरूपपरिज्ञाने च पाठ्यांशोऽयमतीवोपयोगी विद्यते ।

पाठ्यांशेऽस्मिन् **क**–प्रकरणे साङ्ख्यशास्त्रसम्मतज्ञानमीमांसाया व्याख्याननैपुण्यसिद्धये साङ्ख्यकारिकामाश्रित्य साङ्ख्यशास्त्रारम्भहेतुः, दुःखत्रयम्, दुःखात्यन्तनिवृत्तिर्मोक्षः, चतुर्विंशतितत्त्वानि पुरुषश्च, तत्त्वानां प्रकारः– प्रकृतिः, प्रकृतिविकृतयः, न प्रकृतिर्न विकृतिः, सत्कार्यवादः, व्यक्ताव्यक्तज्ञस्वभावः, गुणत्रयनिरूपणम्, पुरुषसिद्धिः, पुरुषस्य द्रष्टृत्वमकर्तृत्वञ्चेति विषयाः पाठ्यन्ते ।

**ख**–प्रकरणे साङ्ख्यशास्त्रोपस्थापितसर्गक्रम–बन्धमुक्तिविवेकपरिशीलने प्रकृतिपुरुषयोः सम्बन्धः, सर्गक्रमः, दुःखानुभवकारणम्, बन्धमोक्षविवेकः, सप्तधा प्रकृतिबन्धः, केवलज्ञानोत्पत्तिप्रकारः, तत्त्वज्ञानफलम्, विवेकख्यातिस्तथा महाभागवतमहापुराणप्रतिपादितसेश्वरसांख्ययोगश्चेति विषयाः पाठ्यन्ते ।

**ग**–प्रकरणे पातञ्जलसूत्रोक्तदृष्टया समाधिस्तत्साधनविचारणे सामर्थ्योपस्थापनाय योगलक्षणम्, वृत्तिस्तद्भेदाश्च, तन्निरोधोपायः, सम्प्रज्ञातसमाधिः, असम्प्रज्ञातसमाधिः, समाध्युपायाः, ईश्वरस्वरूपम्, ईश्वरप्रणिधानम्, सबीजसमाधिः, निर्बीजसमाधिः, क्रियायोगः, क्लेशभेदाः, विवेकख्यातिः, योगाङ्गानि, तेषां फलानि चेति विषयाः पाठ्यन्ते ।

**घ**–प्रकरणे पातञ्जलसूत्रोक्तदृष्टया विभूतिः कैवल्यस्वरूपावबोधे तयोर्विश्लेषणे व्याख्याननैपुण्यसिद्धये अभ्यासकौशल्याभिवृद्धये च धारणा, ध्यानम्, समाधिः,

संयमस्तस्योपयोगश्च, चित्तवृत्तिनिरोधपरिणामः, समाधिपरिणामः एकाग्रतापरिणामः, धर्मलक्षणाऽवस्थापरिणामाः, जात्यन्तरपरिणामः, योगिनामवस्थाविशेषः, कर्मफलम्, वासनाविशेषः, तद्धानोपायः, कैवल्योपक्रमः, धर्ममेधः समाधिः, तत्फलम्, कैवल्यस्यासाधारणं स्वरूपञ्चेति विषयाः पाठ्यन्ते ।

**ङ**–प्रकरणे देहस्थनाडीनां विवरणम्, आधारचक्रम्, तस्य स्वरूपविशेषः, कुण्डलिनी, तत्स्वरूपम्, तद्ध्यानफलम्, स्वाधिष्ठानचक्रम्, तस्य स्वरूपविशेषः, मणिपूरचक्रम्, अनाहतचक्रम्, विशुद्धचक्रम्, सहस्रारचक्रम्, तत्स्वरूपविशेषः, निर्वाणकला, शिवपदम्, सामरस्यम्, चक्रभेदश्चेति विषयाः पाठ्यन्ते ।

## २. पाठ्यांशसामान्योद्देश्यम्

अस्य पाठ्यांशस्याध्ययनेन छात्रा अधोलिखितविषये कौशलमेष्यन्ति–

- साङ्ख्यशास्त्रसम्मतज्ञानमीमांसाया व्याख्याने,
- साङ्ख्यशास्त्रोपस्थापितसर्गक्रम–बन्धमुक्तिविवेकपरिशीलने
- भागवतमहापुराणप्रतिपादितसेश्वरसाङ्ख्ययोगपरिशीलने,
- पातञ्जलयोगसूत्रोक्तदृष्टचा समाधिस्तत्साधनविचारणकौशल्यापादने
- पातञ्जलयोगसूत्रोक्तदृष्टचा विभूतिः कैवल्यस्वरूपावबोधे तयोर्विश्लेषणे, व्याख्याने, अभ्यासे च,
- षट्चक्र–कुण्डलिनीस्वरूपपरिज्ञाने व्याख्याने कुण्डलिनीयोगाभ्यासे च ।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यं पाठ्यविषयसंयोजनञ्च

| प्रकरणगतविशिष्टोद्देश्यम् | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|
| **क–प्रकरणे** साङ्ख्यसम्मततत्त्वानां परिशीलनं सत्कार्यवादादिविवेचनञ्च | साङ्ख्यशास्त्रारम्भहेतुः, दुःखत्रयम्, दुःखात्यन्तनिवृत्तिर्मोक्षः, चतुर्विंशतितत्त्वानि पुरुषश्च, तत्त्वानां प्रकारः– प्रकृतिः, प्रकृतिविकृतयः, न प्रकृतिर्न विकृतिः, प्रधानादीनां प्रत्यक्षतो˜नुपलब्धौ कारणानि, सत्कार्यवादः, कार्यकारणभाव–सम्बन्धविचारः, | २० | ३३ |

| | | | |
|---|---|---|---|
| | प्रधानसिद्धौ हेतवः, व्यक्ताव्यक्तज्ञस्वभावः, गुणत्रयनिरूपणम्, पुरुषसिद्धिः, पुरुषबहुत्वम्, पुरुषस्य द्रष्टृत्वमकर्तृत्वञ्च । | | |
| **ख–प्रकरणे**<br><br>साङ्ख्योपस्थापितसर्गक्रम— बन्धमुक्तिविवेचनम्,<br>भागवत–महापुराणप्रतिपादित–साङ्ख्ययोगपरिशीलनम् | प्रकृतिपुरुषयोः सम्बन्धः, सर्गक्रमः– बुद्धितत्त्वम्, अहंकारः, मनः, ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चभूतानि, दुःखानुभवकारणम्, बन्धमोक्षविवेकः, भोगापवर्गार्था सृष्टिः, प्रकृत्युपरमः, सप्तधा प्रकृतिबन्धः, केवलज्ञानोत्पत्तिप्रकारः, तत्त्वज्ञानफलम्, विवेकख्यातिः, जीवन्मुक्तिः, कैवल्यम् ।<br><br>अध्यात्मयोगमाहात्म्यम्, मनसो बन्धमोक्षहेतुत्वम्, सांख्ययोगनिरूपणम्, महदादितत्त्वानामुत्पत्तिवर्णनम्, प्रकृतिपुरुषविवेकस्य मोक्षहेतुत्वम् । | २० | ३३ |
| **ग–प्रकरणे**<br>पातञ्जलयोगसूत्रोक्तदृष्टया समाधिस्तत्साधननिरूपणम् | योगलक्षणम्, वृत्तिस्तद्भेदाश्च, तन्निरोधोपायः, सम्प्रज्ञातसमाधिः, असम्प्रज्ञातसमाधिः, समाध्युपायाः, ईश्वरस्वरूपम्, ईश्वरप्रणिधानम्, तत्फलम्, चित्तविक्षेपास्तदन्तरायाः, तत्प्रतिषेधः, सम्प्रज्ञातसमाधेः पूर्वाङ्गम्, तत्फलम्, सबीजसमाधिः, निर्बीजसमाधिः । क्रियायोगः, तस्य | २० | ३३ |

| | | | |
|---|---|---|---|
| | प्रयोजनम्, क्लेशभेदाः, अविद्यास्वरूपम्, अस्मिता, रागः, द्वेषः, अभिनिवेशः, हेयहेतुः, द्रष्टुः कैवल्यम्, विवेकख्यातिः, योगाङ्गानि – यमाः, नियमाः, यमानां नियमानाञ्च योगाङ्गत्वकारणम्, आसनम्, आसनस्य योगाङ्गत्वम्, प्राणायामः, प्रत्याहारः, तेषां फलानि च । | | |
| **घ–प्रकरणे**<br>पातञ्जलयोगसूत्रोक्तदृष्टया विभूतेः कैवल्यस्य च विवेचनम् | धारणा, ध्यानम्, समाधिः, संयमस्तस्योपयोगश्च, योगस्यान्तरङ्गसाधनत्वम्, निर्बीजस्य समाधेः बहिरङ्गसाधनत्वम्, चित्तवृत्तिनिरोधपरिणामः, समाधिपरिणामः एकाग्रतापरिणामः, धर्मलक्षणाऽवस्था-परिणामाः, परिणामत्रय-संयमफलम्, सिद्धयः, इन्द्रियजयः, अन्तःकरणजयः, योगिनः कैवल्याधिगमः । समाधिजाः सिद्धयः, जात्यन्तरपरिणामः, योगिनाम-वस्थाविशेषः, कर्मफलम्, वासनाविशेषः, तद्धानोपायः, कैवल्योपक्रमः, आत्मभावभावनानिवृत्तिः, चित्तस्य स्थितिः, चिन्तान्तरायाणां त्यागोपायः, धर्ममेधः समाधिः, तत्फलम्, क्रमस्तस्य लक्षणम्, कैवल्यस्यासाधारणं स्वरूपञ्च । | २० | ३३ |

| | | | |
|---|---|---|---|
| **ङ–प्रकरणे**<br><br>षट्चक्र–कुण्डलिनीस्वरूपविवेचनम् | देहस्थनाडीनां विवरणम्, तासां स्थितिश्च, आधारचक्रम्, तस्य स्वरूपविचारः, कुण्डलिनी, तत्स्वरूपम्, तद्ध्यानफलम्, स्वाधिष्ठानचक्रम्, तस्य स्वरूपविशेषः, तद्ध्यानफलम्, मणिपूरचक्रम्, तस्य स्वरूपविशेषः, तस्य ध्यानफलम्, अनाहतचक्रम्, तस्य स्वरूपविशेषः, तद्ध्यानफलम्, आज्ञाचक्रम्, तस्य स्वरूपविशेषः, तद्ध्यानफलम्, सहस्रारचक्रम्, तत्स्वरूपम्, तद्ध्यानफलम्, सहस्रारचक्रस्थचन्द्रमण्डलम्, बिन्दुः, परमहंसः, तस्य शिवस्थानादिव्यपदेश्यता, षोडशी कला, निर्वाणकला, निर्वाणशक्तिः, शिवपदम्, सामरस्यम्, चक्रभेदः, परमामृतपानम्, योगिनां न पुनर्जन्मादिकम्, फलश्रुतिश्च । | २० | ३३ |

### **४. शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या ।

साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

## ५. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति– आन्तरिकं (निर्माणात्मकम्) बाह्यम् ( निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षा परीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेसंवि परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

वार्षिक-प्रश्नपत्रनिर्माण-सारिणी

| प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | | अङ्काः |
|---|---|---|---|
| | प्रष्टव्याः | समाधेयाः | |
| विवेचनात्मकाः | ३ | २ | २ x १२ = २४ |
| व्याख्यात्मकाः | ४ | ३ | ३ x ८ = २४ |
| संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ x ७ = ४२ |
| अतिसंक्षिप्तोत्तरापेक्षिणः | १० | १० | १० x १ = १० |
| योगः | २६ | २१ | १०० |

६. पाठ्यसूची

### (क) पाठ्यग्रन्थाः

१. साङ्ख्यकारिका (तत्त्वकौमुदीसहिता) ।

२. श्रीमद्भागवतमहापुराणम् (तृतीयस्कन्धस्य २५–२७ अध्यायाः) ।

३. पातञ्जलयोगदर्शनम् (वाचस्पतिमिश्रविरचित–तत्त्ववैशारदी–विज्ञानभिक्षुकृत–योगवार्तिकविभूषित–व्यासभाष्यसमेतम्) ।

४. षट्चक्रनिरूपणम् (टीकाचतुष्टयोपेतम्) ।

**(ख) सहायकग्रन्थाः**

१. साङ्ख्यकारिका (तत्त्वकौमुदीसहिता). (सम्पा.)रमाशंकर भट्टाचार्य. वाराणसी : मोतिलाल बनारसीदास. ई. १९७६ ।

२. श्रीमद्भागवतमहापुराणम् (तृतीयस्कन्धस्य २५–२७ अध्यायाः).गोरखपुर : गीताप्रेस. वि.सं. २०४५ ।

३. पातञ्जलयोगदर्शनम् (वाचस्पतिमिश्रविरचित–तत्त्ववैशारदी–विज्ञानभिक्षुकृत–योगवार्तिकविभूषित–व्यासभाष्यसमेतम्). (सम्पा.) डा.नारायण मिश्रः. वाराणसी : भारतीय विद्या प्रकाशन. ई. १९९८ ।

४. षट्चक्रनिरूपणम् (टीकाचतुष्टयोपेतम्). (सम्पा.) गोस्वामी प्रह्लाद गिरि. वाराणसी : चौखम्बा कृष्णदास अकादमी. ई. २००३ ।

५. सांख्यकारिका, गौडपादभाष्यसहिता. (सम्पा.) जगन्नाथशास्त्री. वाराणसी : मोतिलाल बनारसीदासः. ई. १९८२ ।

६. योगकुण्डल्युपनिषद् (ईशाद्यष्टोत्तरशतोपनिषदान्तर्गत). (सम्पा.) वासुदेवलक्ष्मणपणशीकरः. वाराणसी : चौखम्बा विद्याभवन. ई. १९९० ।

**(ग) सन्दर्भग्रन्थाः**

१. सांख्यशास्त्रस्येतिहासः. उदयवीरशास्त्री. द्वितीयं संस्करणम्. गाजियावादःवरजानन्दवैदिकशोधसंस्थानम्. ई. १९७९ ।

२. भारतीय दर्शन. बलदेव उपाध्याय (योगदर्शनप्रकरण) ।

३. अक्षमालातन्त्र (योगसम्बद्धांशः). प्रा. विद्यानाथ उपाध्याय भट्ट. काठमाडौं : अन्नपूर्णा उपाध्याय. वि.सं. २०६६ ।

विशिष्टीकरणतालिका

विषयः :– ऐ. क तन्त्रम्

पाठ्यांशनाम – साङ्ख्यसिद्धान्त–पातञ्जलयोग–कुण्डलिनीयोगविमर्शः

परीक्षा :– शास्त्री । खण्डः :– द्वितीयः । पत्रम् :– तृतीयम् । पूर्णाङ्काः :– १०० ।
उत्तीर्णाङ्काः :–३५

| प्रश्नप्रकाराः | प्रकरणानि | परीक्षणीयाः पाठ्यविषयाः | प्रश्नसङ्ख्याः | | पूर्णाङ्काः |
|---|---|---|---|---|---|
| | | | प्रष्टव्याः | समाधेयाः | |
| विवेचनात्मकाः | क, घ | साङ्ख्यसम्मततत्त्वोपस्थानं सत्कार्यवादादिविचारः, पातञ्जलसूत्रोक्तदृष्टचा विभूतिः कैवल्यविचारश्च । | ३ | २ | २४ |
| व्याख्यात्मकाः | ख, घ, ङ | साङ्ख्योपस्थापितः सर्गक्रमो बन्धमुक्तिविवेकश्च, पातञ्जलसूत्रोक्तदृष्टचा विभूतिः कैवल्यविचारश्च, षट्चक्र–कुण्डलिनीस्वरूप–विचारश्चेति । | ४ | ३ | २४ |

| | | | | | |
|---|---|---|---|---|---|
| संक्षिप्तोत्तरापेक्षण : | क, ख, ग, ङ | साङ्ख्यसम्मततत्त्वोपस्थानं सत्कार्यवादादिविचारः, साङ्ख्योपस्थापितः सर्गक्रमो बन्धमुक्तिविवेकश्च, पातञ्जलयोगसूत्रोक्तदृष्टया समाधिस्तत्साधनविचारश्च, षट्चक्र–कुण्डलिनीस्वरूप–विचारश्चेति । | ९ | ६ | ४२ |
| अतिसंक्षिप्तोत्तरापेक्षिणः | ख, ङ | साङ्ख्योपस्थापितः सर्गक्रमो बन्धमुक्तिविवेकश्च, षट्चक्र–कुण्डलिनीस्वरूप–विचारश्चेति । | १० | १० | १० |

निदर्शनप्रश्नपत्रम्

| | | | |
|---|---|---|---|
| परीक्षा :– | शास्त्री | | पाठ्यांशसङ्केतः ... |
| खण्डः :– | द्वितीयः | | पूर्णाङ्काः :– १०० |
| पत्रम् :– | तृतीयम् | | उत्तीर्णाङ्काः :–३५ |
| विषयः :– | ऐ. क तन्त्रम् | | समयः :– घण्टात्रयम् । |

क) परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

ख) दक्षिणपार्श्वे सन्निविष्टा अङ्का पूर्णाङ्कान् द्योतयन्ति ।

**क) अधस्तनेषु त्रिषु प्रश्नद्वयस्य समाधानं विधेयम् ।** **१२×२ =२४**

१. साङ्ख्यशास्त्रसम्मतानि पञ्चविंशतितत्त्वानि निरूपयत ।

२. क्रियायोगस्य प्रयोजनं प्रतिपादयत ।

३. षट्चक्राणां मध्ये मूलाधारचक्रस्वरूपं प्रदर्शनीयम् ।

**ख) अधस्तनेषु चतुर्षु त्रयाणां प्रश्नानां समाधानं विधेयम् ।** **८×३ =२४**

४. साङ्ख्यशास्त्रे प्रतिपादिता जीवनमुक्तिर्व्याख्येया ।

५. पातञ्जलसूत्रोक्तदृष्टया योगस्यान्तरङ्गसाधनत्वं प्रकाशयत ।

६. “योगीशो भवति प्रियात् प्रियतमः कान्ताकुलस्याऽनिशम्” इति व्याख्यात ।

७. “योगिनां न पुनर्जन्मादिकम्” इत्युक्तिं व्याकुरुत ।

**ग) अधस्तनेषु नवसु यथेच्छं षट्प्रश्नाः समाधेयाः ।** **७×६=४२**

८. सत्कार्यवादं निरूपयत ।

९. पुरुषस्य द्रष्टृत्वमकर्तृत्वञ्च सङ्क्षेपेण प्रकाशयत ।

१०. साङ्ख्यशास्त्रे स्थापितः सर्गक्रमो निरूपणीयः ।

११. तत्त्वज्ञानफलं वर्णयत ।

१२. पातञ्जलयोगसूत्रानुसारेण योगलक्षणमुपपादयत ।

१३. प्राणायामप्रक्रियां प्रदर्शयत ।

१४. कथं प्रकारेणान्तःकरणं जेतुं शक्यते ? विचारयत ।

१५. समाधिस्वरूपं समुद्घाट्य तस्य फलञ्च वर्णयत ।

१६. सहस्रारचक्रस्य स्वरूपं किम् ?

**घ. अधोलिखितप्रश्नानामेकवाक्यात्मकमुत्तरं देयम् । १०**

१७. त्रीणि दुःखानि कानि ?

१८. प्रधानपदेन किं बुद्ध्यते ?

१९. अन्तःकरणानां नामानि लिखत ।

२०. कानि पञ्चमहाभूतानि ?

२१. कानि पञ्चतन्मात्राणि ?

२२. मूलाधारचक्रे भाव्या वर्णाः के ?

२३. स्वाधिष्ठानचक्रे किं मण्डलं चिन्त्यते ?

२४. मणिपूरचक्रं शरीरे कस्मिँस्थाने भाव्यते ?

२५. अनाहतचक्रे कति वर्णा भाव्यन्ते ? के च ते ?

२६. आज्ञाचक्रं शरीरे कुत्र भाव्यते ?

# तन्त्रम्

**पाठ्यांशनाम** – शाक्ततान्त्रिकदर्शनसिद्धान्तविचारः  **पाठ्यांशसङ्केतः -** तन्त्र.४०२

**स्तरः** – शास्त्री  **पूर्णाङ्काः** – १००

**वर्षः** – द्वितीयः  **वार्षिकः पाठ्यभारः** - १६५ घण्टाः

**पत्रम्–** चतुर्थम्  **साप्ताहिकः पाठ्यभारः** – ६

## १. पाठ्यांशपरिचयः

शास्त्रीकक्षायां तन्त्रविषयं पिपठिषूणां छात्राणां कृते निर्धारितोऽयं पाठ्यांशः पञ्चसु प्रकरणेषु विभक्तोऽस्ति । स्पन्दात्मकशाक्ततत्त्वावबोधे, शिव–शक्तितत्त्व–तत्सिद्धान्तसमीक्षणे च पाठ्यांशोऽयमुपयोगी वर्तते ।

